00057785

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY.
TOWN HALL, BOMBAY.

Digitized with financial assistance from
Hemendra Kothari
on 06 November, 2019

294.1
Gab/Gi
52288

# GRIHYASANGRAHA

## AN APPENDIX TO THE GOBHILA GRIHYASUTRA

WITH THE COMMENTARY BY THE EDITOR.

EDITED BY

MAHĀMAHOPĀDHYĀYA CHANDRAKĀNTA TARKĀLANKĀRA.

NEW SERIES, No. 1230.

57785
ac



SECOND EDITION

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS
No. 5, Nandakumar Chaudhury's 2nd Lane,

AND

PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET, CALCUTTA.

CR 914.1
Gob/Gaz
57785

# गृह्यासंग्रहः

गोभिलपुत्रकृतः ।

महामहोपाध्याय-

चन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यकृतभाष्यसहितः ।

तेनैव परिशोधितः ।

( द्वितीयसंस्करणम् । )

श्रील श्री-

वङ्गदेशीयास्थातिकसमाजानामनुमत्या व्ययेन च

कलिकाता-राजधान्यां

श्रीउपेन्द्रनाथचक्रवर्त्तिना

संस्कृतयन्त्रे मुद्रितः ।

एसियाटीकसोसाइटीनामिकया सभया प्रकाशितश्च ।

---

शकाब्दाः १८३१ ।

# गृह्यासंग्रहः ।

( गोभिलगृह्यपरिशिष्टरूपः )

## गोभिलपुत्रकृतः ।

प्रथमप्रपाठकः ।

ॐ नमः सामवेदाय ।

श्रीगणेशायनमः ।

नत्वा गुर्व्वाचार्य्यान् विचार्य्य बुद्ध्या वचांसि पूर्व्वेषाम् ।
गृह्यासंग्रहभाष्यं स्वल्पग्रन्थं करिष्यामः ॥

इह खलु तत्रभवान् गोभिलपुत्रः गोभिलगृह्यसूत्राख्यव्यक्तानि व्यक्तं व्याचिख्यासुर्गोभिलानुपदिष्टमपि किञ्चिदुपदिदिक्षुर्गोभिलगृह्यपरिशिष्टरूपं गृह्यासंग्रहाख्यमिमं ग्रन्थं रचयाञ्चकार । यस्यायमादिमः श्लोकः,—

अथातः संप्रवक्ष्यामि यदुक्तं पद्मयोनिना ।
ब्राह्मणानाए हितार्थाय सए्स्कारार्थं तु भाषितम् ॥१॥

तत्रायमथशब्द आनन्तर्य्यार्थः संबन्धकरणार्थश्च । उच्चार्य्यमाणश्च मङ्गलप्रयोजनो भवति । आनन्तर्य्यार्थस्तावत् । गोभिलगृह्यसूत्राध्ययनानन्तरम् अनुद्दिष्टपदार्थगृह्यसूत्रार्थावधारणार्थं तदनुक्त-

विशेषप्रतिपत्त्यर्थश्चैतत् शास्त्रमध्येतव्यमित्ययमर्थः। संबन्धकरणार्थः खल्वपि। गोभिलगृह्यसूत्रशास्त्रेणास्य शास्त्रस्य संबन्धं करोति। प्रयोजनञ्चास्य,—गोभिलगृह्यसूत्रवदेतदपि शास्त्रं गोभिलीयधर्म्मोपदेशपरमेव,—इति प्रतिपत्तिः। अथशब्दो ग्रन्थारम्भावद्योतको वा। आर्षेयस्य ग्रन्थस्य खल्वादावयमुपनिबध्यते।

अतः शब्दो हेत्वर्थः। यस्मात् अग्निनामादीनि गोभिलेन नोक्तानि, यस्माच्च अनुक्तिन्नपदार्थं गोभिलगृह्यसूत्रम्, अतः—एतस्मात् कारणात्,—

गोभिलपुत्रोऽहं ब्राह्मणानां हितार्थाय सम्यक् प्रकर्षेण वक्ष्यामि। किम्? पद्मयोनिना ब्रह्मणा यदुक्तमग्निनामादिकम्। यच्छब्दस्योत्तरवाक्यगतत्वेनोपादानादिह तच्छब्दापेक्षा नास्ति। तु पुनः। संस्कारार्थं संस्काररूपप्रयोजने,—तत् सिद्ध्यर्थमित्येतत्। ब्रह्मणा भाषितमिति प्राधान्यात् पुनरुपादानम्। किमतः? गर्भाधानादिषु केषुचित् संस्कारेषु गोभिलेनाग्निर्नोपदिष्टः, तेष्वपि संस्कारप्रयोजनसिद्ध्यर्थमस्मदुक्तनामाऽग्निर्भवति। एतदतः।

अपर आह। "यस्मिन् कर्म्मणि गोभिलेनाग्निरुक्तस्तत्रैवाग्निनाम ज्ञातव्यं नान्यत्र। ब्रह्मणा साधारणेन सर्व्वकर्म्मसु अग्निनाम उक्तम्, तेन हेतुना गोभिलपुत्रेणापि सर्व्वकर्म्मसु अग्निनाम उक्तम्। ततश्च, गोभिलोक्ते गर्भाधानादौ अग्निनाम न भवति"—इति। तदसङ्गतम्। गोभिलपरिशिष्टरूपत्वादेतस्य। न खलु गोभिलेन नोक्तमिति गोभिलपुत्रेणोक्तमपि

नोपादेयमिति किञ्चिदत्र कारणमुपलभामहे । तथात्वे वा गोभिलानुक्तानां बह्वनामपि विशेषाणामत्रोक्तानां परिशिष्टान्तरोक्तानाञ्चानुपादेयतापत्तेः । उपादीयन्ते च । तस्मादसङ्गतैषा कल्पना,—गोभिलोक्तं गर्भाधानादौ अग्निनाम न भवति,—इति । गोभिलोऽप्यस्माकमुपदेष्टा, तत्सूत्रोऽपि । यत् खलु पित्रा नोपदिष्टं तदेव पुत्रेणोपदेष्टव्यम् । सन्दिग्धश्चार्थो निर्णेतव्यः । न हि गोभिलेनापि तत्र तत्राग्निर्निर्दिष्टः । न खल्वेतत् पारशाखिकं शास्त्रम् । न च गोभिलेन नोक्तमिति स्वशाखायामेव ग्रन्थान्तरोक्तमपि परित्यक्तव्यम् । परिशिष्टानामानर्थक्यप्रसङ्गात् । अनुक्तानां खल्वर्थानामुपदेशस्तेषु भूयसोपलभ्यते । अलमतिविस्तरेण ॥ १ ॥

एवं शास्त्रारम्भं प्रतिज्ञाय प्रथमन्तावदग्निनामान्यभिधीयन्ते नवभिः श्लोकैः,—

लौकिकः पावको ह्यग्निः प्रथमः परिकीर्त्तितः ।
अग्निस्तु* मारुतो नाम गर्भाधाने विधीयते ॥२॥

हिशब्दो निश्चयार्थः । लौकिकोऽग्निः पावकः कथितः । रघुनन्दनस्तु,—"लौकिके"—इति पठित्वा, लौकिके—गृहप्रवेशे,—इति वर्णयाञ्चकार । गर्भाधाने पुनर्मारुतो नामाग्निर्विधीयते । यद्यपि, गोभिलेन तत्राग्निर्नोपदिष्टः, तथाप्यस्मा-

* अग्नेस्तु,—इति पाठान्तरम् ।

भिस्तत्पुत्रैस्तदुपदिष्टार्थवेदिभिर्मारुतो नामाग्निस्तत्र विधीयते। तस्मादस्ति गोभिलोक्तेऽपि गर्भाधानेऽग्निरिति बोद्धव्यम्। विधीयते,—इति करणाच्चैवमवगच्छामः। यदि नाम केवलं ब्रह्मणा उक्त इति गर्भाधाने अग्निरुच्यते,—इत्यभिप्रायः, तदा परिकीर्त्तितः,—इत्येव कुर्य्यात्, न—विधीयते,—इति ॥ २ ॥

पुंसवने चान्द्रमसः शुङ्गाकर्म्मणि शोभनः।
सीमन्ते मङ्गलो नाम प्रागल्भो जातकर्म्मणि ॥ ३ ॥

पुंसवने चान्द्रमसो नामाग्निः। 'चन्द्रनामा'—इति रघुनन्दनः पठति। "प्रागुदीच्यां दिशि न्यग्रोधशुङ्गामुभयतःफलामस्वामाम-क्षमिपरिस्रसां त्रिःसप्तैर्यवैर्मार्षैर्वा परिक्रीयोत्थापयेत्"—इत्यादि-गृह्यसूत्रोक्ते शुङ्गाकर्म्मणि शोभनो नामाग्निः। सीमन्ते सीमन्त-करणे। स्पष्टमन्यत् ॥ ३ ॥

नाम्नि स्यात्* पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा।
सभ्यनामाऽथ चूड़े तु व्रतादेशे समुद्भवः ॥ ४ ॥

नामकरणे पार्थिवो नामाग्निः। अन्नप्राशने शुचिर्नामाग्निः। चूड़ाकरणे सभ्यो नामाग्निः। 'सत्यनामा'—इति रघुनन्दनः पठति। व्रतानाम्—गोदाने विशेषस्य वक्ष्यमाणत्वात् सावित्र-व्रतव्रातिकव्रतादित्यव्रतमहानाम्निकव्रतौपनिषदव्रतज्येष्ठसामव्रता-नाम्, आदेशे उपदेशे, समुद्भवो नामाग्निः कथितः ॥ ४ ॥

---

* नाम्नि च,—इति पाठान्तरम्।

गोदाने सूर्य्यनामा तु केशान्ते ह्यग्निरुच्यते ।
वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः ॥ ५ ॥

गोदाने गोदानिकव्रते सूर्य्यनामा अग्निः । गोदानाङ्गे गृह्योक्ते केशान्ते कर्म्मणि अग्निर्नामाग्निः । विसर्गे,—व्रतप्रस्तावात् व्रतानन्तरं करणीये मौञ्जीत्यागे समावर्त्तनापरनामधेये गृह्योक्ते आप्लावनाख्ये कर्म्मणि,—इत्येतत् । "मौञ्जीविसर्गे त्यागे वैश्वानरो नामाग्निः"—इति दीक्षितभाष्यम् । विसर्गे दाने,—इति केचित् । विवाहे योजको नामाग्निः ॥ ५ ॥

चतुर्थ्यान्तु शिखी नाम धृतिरग्निस्तथाऽपरे ।
आवसथ्ये भवो ज्ञेयो वैश्वदेवे तु पावकः ॥ ६ ॥

चतुर्थ्याम्—गृह्योक्ते चतुर्थीकर्म्मणि शिखी नामाग्निः । 'अपरे आचार्य्यास्तथा चतुर्थीकर्म्मणि धृतिनामानमग्निमाहुः'—इति दीक्षितरामकृष्णः । अपरे धृतिहोमादौ,—धृतिर्नामाग्नि,—इति रघुनन्दनः । तत्र ब्रूमः । धृतिहोमे धृतिर्नामाग्निर्युक्तः । कुतः ? शब्दसाम्यात् । धृतिनामा खल्वग्निर्धृतिहोमे आगच्छति हृदयम् । आगच्छति चेत्, न युज्यते विना कारणमुत्सृष्टुम् । एवञ्च, अग्निनाम्नां सप्तत्रिंशत्सङ्ख्याऽप्याज्ञस्येनोपपद्यते । मतान्तरत्वे खल्वेतस्य सा नातीव समञ्जसा स्यात् ।

आवसथ्ये गृह्येऽग्नौ भवो नामाग्निर्ज्ञातव्यः । गृह्यः, औपासनः, आवसथ्यः,—इति ह्यनर्थान्तरम् । वैश्वदेवे कर्म्मणि पुनः पावको नामाग्निः ॥ ६ ॥

ब्रह्मा वै गार्हपत्ये स्यादीश्वरो दक्षिणे तथा ।
विष्णुराहवनीये तु अग्निहोत्रे त्रयोऽग्नयः ॥ ७ ॥

गार्हपत्येऽग्नौ ब्रह्मा नामाग्निः स्यात् । एवमुत्तरत्रापि । दक्षिणे दक्षिणाग्नौ । श्रौते खल्वग्निहोत्रे एते त्रयोऽग्नयो भवन्ति ॥ ७ ॥

लघ्वहोमे वह्निर्नाम* कोटिहोमे हुताशनः ।
प्रायश्चित्ते विधिश्चैव पाकयज्ञे तु साहसः ॥ ८ ॥

प्रायश्चित्ते प्रायश्चित्तहोमे विधिर्नामाग्निः । 'विधुः',—इति रघुनन्दनः पठति । पाकयज्ञे साहसो नामाग्निः । श्लिष्टमन्यत् । आह । कः पुनः पाकयज्ञो नाम ? उच्यते । यः खल्वेकाग्निसाध्यः यज्ञः, तं पाकयज्ञमाचक्ष्महे । किं कारणम् ? "पाकयज्ञा इत्याचक्षते एकाग्नौ यज्ञान्"—इति लाट्यायनसूत्रात् । द्राह्यायणोऽप्येतत् सूचयाञ्चकार । "पाकयज्ञा इत्याख्या यः कश्चैकाग्नौ"—इति च छन्दोगगृह्यान्तरम् । "श्रावण्याश्वयुज्याग्रहायण्यष्टकान्वष्टकैकाष्टकाः पाकयज्ञाः",—इति दीक्षितरामकृष्णः । "पाकयज्ञे,—पाकाङ्कयज्ञे वृषोत्सर्गदेवप्रतिष्ठाहोमादौ"—इति रघुनन्दनः । पाकयज्ञः प्रशस्तयज्ञः,—इति शाखान्तरीयगृह्यवृत्तिकृतः ॥ ८ ॥

देवानां हव्यवाहस्तु पितॄणां कव्यवाहनः ।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा ॥ ९ ॥

निगदव्याख्यातोऽयं श्लोकः ॥ ९ ॥

---

* लघ्वहोमे तु वह्निः स्यात्,—इति पाठान्तरम् ।

पौष्टिके बलदश्चैव क्रोधाग्नि*श्चाभिचारके ।
वश्यार्थे कामदो नाम वनदाहे तु दूतकः ॥ १० ॥

पौष्टिके,—शरीरस्य धनस्य वा पुष्टिजनके कर्म्मणि, बलदो-नामाग्निः । पुष्टिरुपचयः । अभिचार एवाभिचारकः । तस्मिन्नभिचारके कर्म्मणि क्रोधाग्निः । अभिचरणमभिचारो मारणमित्येतत् । वश्यं वशीकरणम् । तदर्थे कर्म्मणि कामदो नामाग्निः । वनदाहे दूतको नामाग्निः ॥ १० ॥

कोष्ठे तु जठराग्निश्च† क्रव्यादो मृतभक्षणे ।
समुद्रे वाड़वो ज्ञेयः क्षये संवर्त्तको भवेत् ॥ ११॥

कोष्ठे उदरे । मृतभक्षणे शवदाहे । क्षये,—सर्व्वेषां नाशे प्रलये,—इति यावत् । श्लिष्टमन्यत् ॥ ११ ॥

एवमग्निनामान्यभिधाय तेषां श्रावणं ज्ञानत्वेदानीं विधत्ते,—

एतेऽग्नयः समाख्याताः श्रावयेद् ब्राह्मणः सदा ।
सप्तचिंशतिविख्याता ज्ञातव्याश्च द्विजैन तु ॥ १२॥

एते पूर्व्वोक्ता अग्नयः सम्यक् कथिताः । तानेतान् ब्राह्मणः सदा द्विजं श्रावयेत् । द्विजैन तु, सप्तचिंशतिविख्याताः । आर्षोऽयं प्रयोगः । सप्तचिंशत्सङ्ख्यया विशेषेण कथिताः,—प्रसिद्धा वा, अग्नयोज्ञातव्याः । तदिदमर्थं कर्म्मस्वविनियुक्तानामप्यग्निनाम्नां पूर्व्वं परिकीर्त्तनमिति द्रष्टव्यम् ॥ १२ ॥

---

* क्रोधोऽग्निः,—इति पाठान्तरम् ।
† जठरो नाम,—इति पाठान्तरम् ।

सप्त जिह्वाः स्फुरन्त्येता हुताशनमुखे स्थिताः।
याभिर्हव्यꣳसमश्नन्ति हुतꣳसम्यक् द्विजोत्तमैः॥१३॥

अग्निमुखे स्थिता एता वक्ष्यमाणाः सप्तजिह्वाः स्फुरन्ति। द्विजोत्तमैः,—निषादस्थपतिवत् कर्मधारयसमासस्यैव युक्तत्वादविशेषाच्च उत्तमद्विजैः, सम्यक् हुतं हव्यं याभिर्जिह्वाभिः समश्नन्ति,—दिवौकसः,—इति वाक्यशेषः॥ १३॥

काली कराली च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा।
स्फुलिङ्गिनी चैव रुचिस्मिता च
लेलायमाना इति सप्त जिह्वाः॥ १४॥

इत्येताः सप्त जिह्वाः नामतो निर्दिष्टाः। लेलायमानाः,—हव्यं भक्षितुमीप्सन्त्यः। लल ईप्सायाम्। लेलायमानाः चलन्त्यो-वा॥ १४॥

तासां खल्वासां जिह्वानां मध्यात्,—

द्वे शान्तिके पौष्टिके द्वे च तिस्रोऽभिचारिण्यः।
एताश्चोक्ता विशेषेण ज्ञातव्याश्च द्विजेन तु॥ १५॥

शान्तिके कर्मणि द्वे जिह्वे। पौष्टिके च कर्मणि द्वे जिह्वे। तिस्रश्चाभिचारकर्मण्युपयुक्ताः। एताश्चोक्ता जिह्वा द्विजेन विशेषतो-ज्ञातव्याः॥ १५॥

आहूयैव तु* होतव्यं यो यत्र विहितो विधिः ।

यत्र कर्म्मणि यो विधिरुक्तः, तत्र तेन विधिना होतव्यम् । किं कृत्वा ? विहितमग्निमाहूय । "यत्र यो विहितोऽनलः"—इति तत्त्वकारः पठति । तत्र च, यत्र योऽनलो विहितस्तत्र तमनलमाहूय होतव्यमिति व्यक्त एवार्थः ॥

अविदित्वा तु यो ह्यग्निꣳ होमयेदविचक्षणः ॥ १६ ॥
न हुतं न च सꣳस्कारो न च कर्म्मफलं लभेत् ।

यः खल्वविचक्षणोऽग्निमज्ञात्वा होमयेत्, तेन हुतं न भवति । हुतं होमः । भावे निष्ठा । कृतोऽपि होमो न सिध्यतीत्यर्थः । न च तेन होमेन शरीरस्य संस्कारो भवति । न चासौ कर्म्मफलं लभते ॥ १६ ॥

ज्ञात्वा स्वरूपमाग्नेयं योऽग्नेराराधनं चरेत् ॥१७॥
ऐहिकामुष्मिकैः काम्यैः सारथिस्तस्य पावकः ।
निःसꣳशयकरैरर्थैः पुत्रशिष्यहितैषिणः ॥ १८ ॥

यः पुनरग्नेरिदमाग्नेयं स्वरूपं वक्ष्यमाणलक्षणं ज्ञात्वा अग्नेराराधनमाचरति, तस्य पुत्रशिष्यहितैषिणः,—इत्याग्नेयं स्वरूपं विदुषः पुत्रशिष्यहितैषित्वं वदन्—तदविदुषः पुत्रशिष्यानिष्टमपि द्योतयति । 'निःसंशयकरैः'—निःसंशयं यथा भवति तथा क्रियमाणैः, 'काम्यैः'—कमनीयैः अभिलषणीयैः, 'ऐहिकामुष्मिकैः'—

* आहूय चैव,—इति पाठान्तरम् ।

इहलोके परलोके च भवैः सौभाग्यस्वर्गादिभिः, 'अर्थैः'—प्रयोजनैः फलैः,—इत्येतत्। 'पावकः' 'सारथिः'—सारथिवदनुकूलः तत्तत्फलनिर्व्वाहक इत्यर्थः। तथाविधैरर्थैः पुत्रशिष्यहितैषिणस्तस्य पावकः सारथिः—फलदाता, इति वा वर्णनीयम्। तदनेन तस्य पुत्रशिष्याणामपि तत्तदर्थाः सम्पद्यन्ते,—इत्युक्तं भवति ॥ १७ ॥ १८ ॥

न चात्र संशयः कर्त्तव्यः इत्याह,—

गोभिलाचार्य्यपुत्रेण कृतञ्शास्त्रञ् सुनिश्चितम्।
पावकस्य मुखं वक्ष्ये यदुक्तं पद्मयोनिना ॥ १९ ॥

शास्त्रं पूर्व्वोक्तमग्निनामादिप्रतिपादकं गोभिलाचार्य्यपुत्रेण मया सुनिश्चितं कृतमिति गोभिलानुक्तोऽपि मदुक्तोऽग्निर्गर्भाधानादिष्वस्तीत्यभिप्रायः। उक्तस्यापि पुनरुक्तिः शिष्याणां दृढ़प्रत्ययार्था आदरार्था वा। अपर आह। शास्त्रं गृह्यासंग्रहाख्यम्,—इति। अथेदानीमहमग्नेर्मुखं वक्ष्ये। व्याख्यातमन्यत् ॥ १९ ॥

सप्तजिह्वा-प्रमाणन्तु प्रादेशं परिकीर्त्तितम्।
प्रमाणं चतुरस्रञ्च वर्त्तुलं मुखमण्डलम् ॥ २० ॥

पूर्व्वोक्तानां वक्ष्यमाणानाञ्च सप्तजिह्वानां प्रमाणं प्रादेशं विस्तृततर्ज्जन्यङ्गुष्ठरूपम्। अपर आह। बद्धमुष्टिः करो रत्निः, रत्न्यार्द्धं प्रादेशम्,—इति। प्रमाणं पूर्व्वोक्तप्रादेशप्रमाणं, चतुरस्रं चतुष्कोणञ्चाग्निमुखं कथितम्। मुखमण्डलन्तु वर्त्तुलम् ॥ २० ॥

यदर्थं हूयते वह्नौ तां जिह्वां परिकल्पयेत् ।

यत्कर्मार्थं हूयते, तां तद्धितां जिह्वामग्नौ परिकल्पयेत् चिन्तयेदावाहयेद्वा ॥

पूर्वोक्ताभ्यः सप्तभ्यो जिह्वाभ्योऽन्याः सप्त जिह्वा आह,—

करालो धूमिनी श्वेता लोहिता महालोहिता ॥२१॥
सुपर्णी पद्मरागी च सप्तैताः परिकीर्त्तिताः ।

सप्तैता जिह्वाः कथिताः । ऋज्वन्यत् ॥ २१ ॥

करालीं राक्षसाश्नन्ति धूमिनीममुरास्तथा ॥२२॥
श्वेतां नागाः समश्नन्ति पिशाचा लोहितां तथा ।
महालोहितां गन्धर्वाः सुपर्णीञ्च यमस्तथा ॥२३॥

करालीं—कराख्या जिह्वया, करालीं जिह्वां प्राप्येति वा वर्णनीयम् । एवमुत्तरत्रापि व्याख्येयम् । राक्षसाः अश्नन्ति । अत्र विसर्गलोपे सन्धिरार्षः ॥ २२ ॥ २३ ॥

पद्मरागी च विख्याता दिव्या जिह्वा हुताशने ।
तस्यान्तु होमयेन्नित्यए सुसमिद्धे हुताशने ॥ २४ ॥

यया देवाः समश्नन्ति, सा दिव्येत्युच्यते । हुताशने हुताशनस्य । यथाश्रुतो वाऽर्थः । पद्मरागी हुताशनस्य जिह्वा दिव्या विख्यातेत्यर्थः । तस्यां दिव्यायां जिह्वायां पद्मराग्यामित्येतत् । सुसमिद्धे प्रज्वलिते । श्लिष्टमन्यत् ॥ २४ ॥

विधूमे लेलिहाने च होतव्यं तन्त्रसिद्धये।
न धूमो न तथा ज्वाला विशुद्धो भुवि चक्षुषः॥ २५॥

विधूमे धूमरहिते, लेलिहाने दीप्यमाने चाग्नौ, तन्त्रस्य कर्म्म-विस्तारस्य सिद्धये होतव्यम्। तत्र हेतुरुत्तरार्द्धेनोक्तः। न धूमः चक्षुषो विशुद्धः विशुद्धिहेतुः, अपि तु धूमश्चक्षुषोऽविशुद्धि-हेतुरित्यर्थः। तथेति धूमयुक्तेत्यर्थः। धूमयुक्ता ज्वालापि न चक्षुषो विशुद्धिहेतुः, अपि तु सापि चक्षुषोऽविशुद्धिहेतुरेव। तदत्र धूमशब्देन केवलधूमस्य, ज्वालाशब्देन तु धूमयुक्तज्वालाया-अपि दोष उक्तः। 'भुवि'—इत्यत्रापि ज्वालेत्यनुषज्यते। भुवि ज्वाला न चक्षुषो विशुद्धिहेतुः,—इति भुवं लिहत्यग्नौ होमो-निन्द्यते। तथा च स्मर्य्यते।

"क्षुत्-त्रुट्-क्रोध-त्वरा युक्तो हीनमन्त्रं जुहोति यः।
अप्रवृत्ते सधूमे वा सोऽन्धः स्यादन्यजन्मनि॥
अल्पे रुक्षे सस्फुलिङ्गे वामावर्त्ते भयानके।
आर्द्रकाष्ठैः सुसम्पन्ने फुत्कारवति पावके॥
कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्।
आहुतिं जुहुयाद् यस्तु तस्य नाशो भवेद् ध्रुवम्"॥

इति। 'तथाज्वालः'—इति पाठे, अज्वाल इति च्छेदः। अज्वालो ज्वालाहरितोऽग्निर्न विशुद्ध इत्यर्थः। तथा च कर्म्म-प्रदीपः।

"योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्च स जायते" ॥

इति। 'विशुद्धोष्णविचक्षुषा'—इति पाठे, "विशुद्धेन विगतोष्णेन चक्षुषा यत्राग्नौ धूमो न दृष्टस्तत्र होतव्यम्"—इति दीक्षित-भाष्योक्तैव वर्णना ॥ २५ ॥

प्रभया भाति यत्रैव भगवाँस्तत्र तिष्ठति।
तत्र पूर्णाहुतिं दद्यात् सर्व्वकामप्रसिद्धये ॥ २६ ॥

यत्रैवाग्नौ प्रभया भाति ज्वालेत्यर्थः। तत्रैव भगवान् विष्णु-स्तिष्ठति। 'तत्र पूर्णाहुतिं दद्यात्';—सर्व्वेषां कामानामभि-लषितफलानां प्रकर्षेण सिद्ध्यर्थम्। पूर्णाहुतिदानोपदेशेन होमोऽपि तत्रैव कर्त्तव्यः,—इत्यपि भङ्ग्यन्तरेणोपदिशति। अत्र च, यस्मिन् कर्म्मणि यः कामः शास्त्रेणानुशिष्टः, स एव कामस्तत्र सिध्यति, न पुनरन्योऽपीति द्रष्टव्यम्। तत् कस्य हेतोः? "सर्व्वत्रमाधिकारिकम्"—इति सिद्धान्तात्।

पूर्णाहुतिन्तु ऊर्द्ध्वः सन् दद्यात्, नोपविष्टः। कुतः?

"दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन"।

इति भविष्यपुराणात्। एवमेके। गोभिलीयकर्म्मण्युपविष्ट एव पूर्णाहुतिं दद्यात्, न पुनरूर्द्ध्वः सन्। कस्मात्?

"आसीन ऊर्द्ध्वः प्रह्वो वा नियमो यत्र नेदृशः।
तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता" ॥

इति कर्म्मप्रदीपवचनात् । एवमपरे । तदत्र भगवन्तो भूमिदेवाः प्रमाणम् ॥ २६ ॥

अथेदानीं वर्ज्जनीयाः समिध आह,—

**मारणी राक्षसी रौद्री क्रव्यादी ब्रह्मराक्षसी ।**
**स्थूलजङ्घा करालो च वज्रहस्ता तथैव च ॥ २७ ॥**
**यमदूती च विज्ञेया इत्येताः समिधो नव ।**

इत्येता नव समिधो नामतो विज्ञेयाः ॥ २७ ॥

यथाक्रममासां लक्षणं ब्रुवन् वर्ज्जनीयत्वमाह,—

**विशीर्णा विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा ॥२८॥**
**कृमिदष्टा च दीर्घा च वर्ज्जनीयाः प्रयत्नतः ।**

विशीर्णा त्रुटिता पाटितेत्येतत् । इयं मारणीत्युच्यते । विदला दलरहिता,—त्वचा वियुक्तेति यावत् । इयं राक्षसी । ह्रस्वा प्रादेशप्रमाणात् न्यूना । इयं रौद्री । वक्रा प्रसिद्धा । इयं क्रव्यादी । स्थूला अङ्गुष्ठात् स्थूला । इयं ब्रह्मराक्षसी । कृशा । अङ्गुष्ठात् कृशा, अङ्गुष्ठस्थौल्यस्य विहितत्वात् । इयं स्थूलजङ्घा । द्विधा द्विशाखिका । इयं करालो । कृमिदष्टा कृमिभिर्दष्टा । इयं वज्रहस्ता । दीर्घा प्रादेशात् दीर्घा । इयं यमदूती । ता एताः समिधो यत्नतो वर्ज्जनीयाः । तथाच कर्म्मप्रदीपः ।

"नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥

प्रादेशान्नाधिका नोना न तथा स्याद् द्विशाखिका ।
न सपर्णा न निर्वीर्या होमेषु च विजानता" ॥

इति ॥ २८ ॥

अथेदानीं विशीर्णादीनां वर्ज्जनीयत्वे हेतुमुक्त्वा वर्ज्जनममूषामुपसंहरति,—

विशीर्णाऽऽयुःक्षयं कुर्य्याद्विदला व्याधिसम्भवा ॥ २९ ॥
क्रस्वा मृत्युकरी रौद्री दुर्भगत्वन्तु वक्रया ।
विघ्नानि कुरुते स्थूला कृशा च रिपुवर्द्धिनी ॥ ३० ॥
द्विधा नाशयते ह्यर्थं भार्य्याञ्च प्रियबान्धवान् ।
कीटदष्टाऽतिभयदा दीर्घा चैव सुतान् हरेत् ॥ ३१ ॥
तस्मात् सर्व्वप्रयत्नेन वर्ज्जनीयाश्च वर्ज्जयेत् ।

व्याधिसम्भवा,—व्याधेः सम्भवो यया, सा तथाविधा। क्रस्वा रौद्रीति सामानाधिकरण्यम्। अस्मादप्यवगच्छामः,—विशीर्णत्वादीनि यथाक्रमं मारणादीनां लक्षणानि,—इति। वक्रया दुर्भगत्वं प्राप्नोति। विघ्नानि विघ्नान्। अतिभयदेतिच्छेदः। निगदव्याख्यातमन्यत्। यस्मादेवं, तस्माद्वर्ज्जनीया एताः समिधो-यत्नेन वर्ज्जयेदिति विशीर्णादीनां वर्ज्जनस्योपसंहारः॥२९॥३०॥३१॥

अथेदानीं सर्व्वकामदाः समिध आह,—

अकृशा चैव न स्थूला अशाखा चापलाशिनी ॥ ३२ ॥
सक्षीरा नाधिकाऽन्यूनाः समिधः सर्व्वकामदाः ।

क्षणादयो व्याख्याताः। तद्विपरीत्येनाक्षणादयो व्याख्यातव्याः। अशाखा,—एकमात्रशाखारहिता। द्विशाखिकेत्यर्थः। अपलाशिनी, न सपत्रा। सक्षीरा—न निर्वीर्या। क्षीरमत्र दुग्धम्। न अधिकाः नाधिकाः—अनधिका इत्यर्थः। निपातसमानार्थेन नशब्देन समासः। न न्यूनाः अन्यूनाः। निपातेन समासः। नाधिकाश्च अन्यूनाश्च,—इति पश्चात् द्वन्द्वः। न,—इति भिन्नं वा पदम्। न अधिकाः, न च न्यूनाः,—इत्यनुषङ्गेन व्याख्येयम्। एवंविधाः समिधः,—सर्व्वान् कामान् ददति इति सर्व्वकामदा-उच्यन्ते ॥ ३२ ॥

गोभिलानुक्तं विशेषमभिधाय, अथेदानीं गोभिलोक्तेष्वपि केषुचित् विशेषं विविक्षुः प्रतिजानीते,—

**गृह्याकर्म्मसु सर्व्वेषु होत्रे प्रतिविधिं ध्रुवम् ॥ ३३ ॥**
**क्रमशः संप्रवक्ष्यामि यो यत्र विहितो विधिः।**

गृह्या गौभिलोक्तगृह्यशास्त्रम्। तदुक्तेषु सर्व्वेषु कर्म्मसु, होत्रे, होतुः सुखार्थम्,—यस्मिन् कर्म्मणि यो विधिर्विहितः, तत्र प्रति-विधिं प्रतिकर्म्म विधानं, क्रमशः सम्यक् प्रकर्षेणाहं वक्ष्यामि ॥३३॥

ननु स विधिराचार्य्येणैवोक्तः, किमपरं वक्तव्यमवशिष्यते, यदर्थोऽ-यमुपक्रमोऽर्थवान् भवति,—इत्याशङ्कायामाह,—

**अनुच्छिन्नपदार्थानि गृह्यावाक्यानि यानि तु ॥ ३४ ॥**
**तेषां वक्ष्यामि सिद्ध्यर्थं श्लोकसंग्रहसंज्ञकैः।**

अनुच्छिन्नपदार्थानि यानि गृह्यावाक्यान्याचार्य्येण पठितानि, तेषा-

मर्थोऽनेदसिद्ध्यर्थम्,—श्लोकसंग्रहसंज्ञकैरिति व्यत्यासेन प्रयुङ्क्ते । संग्रहसंज्ञकैः श्लोकैरित्यर्थः । गृह्यासंग्रहः—इति खल्वयं ग्रन्थोऽभिधीयते । अहं वक्ष्यामि । तथा च, आचार्योक्तो विधिरनुज्ञिन्नपदार्थ इति तदर्थोऽनेदार्थमयमुपक्रमोऽर्थवानेवेति भावः । उज्झिन्नः व्यक्तः । न उज्झिन्नः अनुज्झिन्नः । पदानामर्थाः पदार्थाः । अनुज्झिन्नाः पदार्थाः येषु वाक्येषु, तानि अनुज्झिन्नपदार्थानि ॥ ३४ ॥

तत्र प्रथमन्तावत्,—"अथातो गृह्याकर्म्माण्युपदेक्ष्यामः"—इति गोभिलसूत्रस्थं गृह्यापदमनुज्झिन्नार्थं व्याकरोति द्वाभ्याम्,—

**पत्न्याः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः ॥ ३५ ॥**
**गृह्या इति समाख्याता यजमानस्य दायकाः ।**

जनिष्या जनिष्यमाणाः । दायकाः दायहराः । निगदव्याख्यातमन्यत् ॥ ३५ ॥

**तेषाए सएस्कारयोगेन शान्तिकर्म्मक्रियासु च ॥ ३६ ॥**
**आचार्य्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः ।**

तेषां पत्न्यादीनां "संस्कारयोगेन,"—संस्कारलाभार्थमित्यर्थः । तदिदमर्थं या विवाहादिक्रियाः क्रियन्ते, तासु ;—शान्तिकर्म्मणां शान्त्यर्थकर्म्मणामलक्ष्मीनिर्णोदादीनां क्रियासु करणेषु च, यः कल्पः शास्त्रविधिरपेक्षितः, स खल्वाचार्य्यविहितः—आचार्येण गोभिलेन विहितः । तदर्थं गृह्यसूत्रं कृतमित्यर्थः । यस्माद्गृह्यानधिकृत्य आचार्येण सूत्राणि रचितानि, तस्मात् कारणादाचार्य्य-

गृह्यसूत्राणां गृह्या इति स्थितिः। गृह्यसम्बन्धात् स्मृतिरपि गृह्येत्युच्यते। दण्डयोगाद्दण्डः पुरुष इति यथा ॥ ३६ ॥

"अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमूह्योपलिप्य"—इत्यादिगोभिलोक्तं क्रमं स्पष्टयति,—

**भूमेः समूहन कृत्वा गोमयेनोपलिप्य च ॥ ३७ ॥**
**द्रव्याण्युत्तरतः स्थाप्य वृषीं कुर्य्यादुदङ्मुखीम्।**

यागार्थं भूमेः समूहनं कुशैर्मार्ज्जनं कृत्वा, गोमयोदकेनोपलिप्य द्रव्याण्युदकादीनि प्रयोजनोपयोगीनि उपलिप्तायां भूमौ तस्याएव वोत्तरतः स्थापयित्वा, वृषीम्—ऋषीणामासनम्—विहितमासनमित्येतत्। उपवेशापरपर्य्याय आसनविशेषो वृषी, इति नारायणोपाध्यायाः। उदङ्मुखीमुदग्ग्रां कुर्य्यात्। मुखमग्रम्। तदिदानीं प्रयोजनोपयोगिद्रव्यासादनमस्माकं न ब्रह्मस्थापनाद्यनन्तरमिति द्रष्टव्यम्। कात्यायनस्तु कर्म्मप्रदीपे अग्नेरुत्तरतो-द्रव्याणामासादनमाह। तथाच कर्म्मप्रदीपः।

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद् द्रव्यं यद् यथा विनियुज्यते" ॥

इति। अत्र च फलतो न विरोधः। उपलिप्तायां भूमौ तस्यावोत्तरतः द्रव्याणामासादनेऽपि तत् खल्वासादनमग्नेरुत्तरतएव भवतीति सुधीभिर्विभावनीयम्। यद्यप्यग्निरिदानीं न स्थापितः, तथापि भविष्यतैवाग्निना 'उदक्'—इत्यस्य संबन्धो बोद्धव्यः।

"पुरोडाशकपालेन तुषानुपववति"—इति भविष्यता पुरोडाशेन कपालस्य संबन्धो यथा ॥ ३७ ॥

यज्ञादौ स्थानपरिमाणादिकमाह,—

**गोचर्ममात्रं कुर्व्वीत चतुरस्रमनूषरे ॥ ३८ ॥**
**सर्व्वतोरत्निमात्रं स्यात् सायं प्रातस्तु होमयोः ।**

ऊषरमिति बालुकामयं स्थानमुच्यते । तत् न भवतीत्यनूषरम् । तस्मिन् प्रदेशे, "चतुरस्रं" चतुष्कोणं "गोचर्ममात्रं" गोचर्मपरिमाणं स्थानं कुर्व्वीत । सायंप्रातर्होमयोः पुनः सर्व्वतो दिक्षु "रत्निमात्रं" अरत्निमात्रं वा स्थानं स्यात् । उभयत्र परिमाणे मात्रच् । बद्धमुष्टिः करो रत्निः । निष्कनिष्ठः करोऽरत्निः । साईद्वाविंशत्यङ्गुलोऽरत्निः,—इति केचित् ॥ ३८ ॥

अप्रसिद्धत्वात् स्वयमेव गोचर्मपरिमाणं व्याकरोति,—

**ऋषभैकशतं यत्र गवां तिष्ठति संवृतम् ॥ ३९ ॥**
**बालवत्सप्रसूतानां गोचर्म इति तं विदुः ।**

ऋषभो वृषभः । तेन सममेकशतं बालवत्सप्रसूतानाम्—बालाः वत्साः प्रसूताः यासां सद्यःप्रसूतवत्सानामित्यर्थः । विशेषणसामर्थ्यात् बालवत्ससहितानां गवामेकशतमेकेन वृषभेन सह यत्र प्रदेशे संवृतम्—सम्यगसङ्कोचेन वर्त्तमानं, तिष्ठति, तं प्रदेशं गोचर्म इति विदुर्जानन्त्याचार्य्याः । अपर आह । यस्मिन् स्थाने ऋषभमानां शतं बालवत्सप्रसूतानां गवाञ्च शतं संवृतमेकी-

भूतं तिष्ठति, तत् स्थानं गोचर्म्म,—इति । तदसङ्गतम् । कुतः ? समासान्तर्निविष्टस्य शतशब्दस्यानुषङ्गकल्पनायां मानाभावात् ।

"गवां शतं वृषश्चैको यत्र तिष्ठेदयन्त्रितः ।
एतद्गोचर्म्ममात्रन्तु प्राहुर्वेदविदो जनाः" ॥

इति स्मृत्यन्तरदर्शनाच्च ॥ ३९ ॥

**षट् पञ्च चतुरो वाऽपि त्रयो द्वौ वा शफौ स्मृतौ ॥४०॥**
**गोचर्म्म इति शब्दोऽयं विधियोगे निपात्यते ।**

चतुरः,—इति व्यत्यासेन प्रयुङ्क्ते । चत्वारः,—इत्यर्थः । वाऽपि,—इत्यपि व्यत्यासेन प्रयुङ्क्ते । अपि वा,—इत्यर्थः । तदयमर्थः । षट् शफाः, पञ्च वा चत्वारो वा त्रयो वा शफाः गोचर्म्म इति स्मृताः, द्वौ वा शफौ गोचर्म्म इति स्मृतौ । योग्यत्वादुपस्थितत्वाच्च शफवतीनां गवामेव ग्रहणं वर्णनीयम् ।

तदेवं गोचर्म्मस्थानानामनियतपरिमाणत्वादाह,—विधियोगे,—इति । पूर्व्वोक्तेषु परिमाणेषु विधियोगे विधानयोगे सति, गोचर्म्म इत्ययं शब्दो निपात्यते । यत्र विहिते कर्म्मणि यावत् स्थानमपेक्षितं, तत्र तावत्परिमितमेव स्थानं ग्राह्यमित्यभिप्रायः ॥ ४० ॥

**प्राङ्नीचं ब्रह्मवर्च्चस्यमुदङ्नीचं यशोत्तमम् ॥ ४१ ॥**
**पित्र्यं दक्षिणतोनीचं प्रतिष्ठालम्भकृत्समम् ।**

पूर्व्वतो निम्नं स्थानं ब्रह्मवर्च्चस्यं ब्रह्मवर्च्चसविषये साधु भवति । ब्रह्मवर्च्चसमध्ययनप्रकर्षजं तेजः । उत्तरतोनीचं यशोत्तमम् ।

उत्तमं यशो यस्मात् इति तथाविधम् । राजदन्तादिवत् परनिपातः । 'सान्ता अप्यदन्ताः'—इत्युक्तेर्यशोत्तममिति निर्देशः साधुः । 'पिण्डं दद्याद् गयाशिरे'—इतिवत् । आर्षो वा विसर्गलोपे सन्धिः । पित्र्यं स्थानं दक्षिणतो नीचं भवति । समं पुनः प्रतिष्ठाया लम्भकं प्रापकम् । तदनेन, "प्रागुदक्प्रवणं देशं समं वा"—इति गोभिलसूत्रं व्याख्यातम् । तत्त्वकरोऽप्येवमेव श्लोकमिमं पपाठ । प्रागुदक्प्रवणं देशम्—इत्येतद्विवरणपरतयैव चेमं ग्रन्थं वर्णयाञ्चकार । एवमेव पित्र्ये कर्मणि दक्षिणाप्लवनदेशत्वं कर्मप्रदीपाद्यनुशिष्टमनुगृह्यते । केचित्तु,—

"प्राग्ग्रीवं ब्रह्मवर्चस्यमुदग्ग्रीवं यशोत्तमम् ।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भुकं समम्" ॥

इत्यन्यथा श्लोकमिमं पठन्तः,—'ब्रह्मवर्चसकामस्य प्राग्ग्रीवं प्राङ्मस्तकमासनं कर्त्तव्यम्, यशस्कामस्य उदङ्मस्तकम्, पित्र्यमासनं दक्षिणतो नीचं कर्त्तव्यम्, प्रतिष्ठाकामस्य लम्भुकं सुन्दरं समम्,—इत्यासनपरतया वर्णयन्ति । तदसमीचीनमिति लक्ष्यते । कुतः ? अनुद्भिन्नपदार्थगृह्यसूत्रार्थकथनपरत्वाद्भन्यस्य । स्थानप्रस्तावाच्चानुपस्थितासनपरतया वर्णनस्यान्याय्यत्वात् । अन्यथा, दर्भौ कुर्य्यादुदङ्मुखौ—इत्यस्मिन्नेव प्रक्रमे इदमपि कुर्य्यात् । वर्णनाऽपि तेषां न शब्दमनुसरतीत्यलं विस्तरेण ॥ ४१ ॥

वरं गान्तु विजानीयाच्चतुर्वर्षामिति स्थितिः ॥ ४२ ॥
दक्षिणानां विशिष्टं वै वरं तमपरं विदुः ।

चतुर्वर्षां गां वरं जानीयादिति शास्त्रमर्य्यादा। दक्षिणानां मध्ये विशिष्टं श्रेष्ठं, तं गाम्, अपरं पूर्व्वोक्तादन्यं वरं जानन्त्याचार्य्याः। तम्,—इति विधेयप्राधान्यविवक्षया पुंसा निर्देशः, लिङ्गव्यत्ययाद्वा। नात्र कल्पे वर्षनियम इत्यभिप्रायः। तथा चोक्तम्।

"गौर्विशिष्टतमा लोके शास्त्रेऽपि च निगद्यते।
न ततोऽन्यद्वरं किञ्चित् तस्माद्गौर्वरमुच्यते" ॥

इति। तदनेन,—"अनड्वान् कंसो वासो वर इति दक्षिणाः"—इति सूत्रस्थोऽनुद्दिष्टपदार्थो वरशब्दो व्याख्यातः ॥ ४२ ॥

"पूर्णपात्रो दक्षिणा"—इति सूत्रस्थं पूर्णपात्रपदं व्याकरोति,—

**चतुर्म्मुष्टिर्भवेत् किञ्चित् पुष्कलं तच्चतुर्गुणम् ॥ ४३ ॥**
**पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते।**

चतुर्मुष्टिः 'किञ्चित्' भवेत्। किञ्चिच्चतुर्गुणं—षोड़शमुष्टिः पुष्कलं भवेत्। चत्वारि पुष्कलानि—चतुःषष्टिमुष्टिः पूर्णपात्रमिति दीक्षितभाष्यम्।

'अष्टमुष्टिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम्'।

इति नारायणोपाध्यायादयः पठन्ति। अत्र च, "कंसं चमसं वाऽन्नस्य पूरयित्वा कृतस्य वाऽकृतस्य वाऽपिवा फलानामेवैतं पूर्णपात्रमित्याचक्षते"—इत्याचार्य्यसूत्रोक्तस्य एतस्य च पूर्णपात्रस्य सम्भवासम्भवाभ्यां व्यवस्था बोद्धव्या। अत्यन्तासम्भवे तु,—

"यावता बहुभोक्तृश्च तृप्तिः पूर्णेन जायते।
नावरार्द्धेन ततः कुर्य्यात् पूर्णपात्रमिति स्थितिः" ॥

इति कर्म्मप्रदीपोक्तं द्रष्टव्यम् ॥ ४३ ॥

यज्ञद्रव्यसमाहारे भोजनाचमने तथा ॥ ४४ ॥
जपे वा होमकाले वा दक्षिणं बाहुमुद्धरेत् ।

यज्ञद्रव्याणां स्रुवादीनां समाहरणे ग्रहणे इत्यर्थः । जपे जपकाले । स्पष्टमन्यत् । एषु दक्षिणं बाहुं यथासम्भवमूर्द्धं कुर्य्यात् । वस्त्राद्बहिः कुर्य्यादिति वाऽर्थः । वाशब्दौ समुच्चयार्थौ ॥ ४४ ॥

होमः प्रतिग्रहो दानं भोजनाचमनानि च ॥४५॥
अवहिर्जानु कर्म्माणि साङ्गुष्ठान्येवमाचरेत् ।
आरम्भः सर्व्वहोमानामाहुर्यज्ञविदो जनाः ॥४६॥

अवहिर्जानु यथा भवति, तथैतान्याचरेदिति क्रियाविशेषणमेतत् । 'कर्म्माणि' सन्ध्यावन्दनादीनि । होमादेर्विशेषतः कथनमादरार्थम् । अवहिर्जानु,—इति अन्तर्जानु इत्यर्थः । जानुनोर्मध्ये हस्तौ कृत्वेत्येतत् ।

"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः" ।

इति । "अन्तरूर्व्वोररत्नी कृत्वा"—इति चैवमादिस्मृत्यन्तरेषु तथा दर्शनात् । जानुमध्ये दक्षिणं बाहुं कृत्वा,—इति केचित् । 'साङ्गुष्ठानि' अङ्गुष्ठाङ्गुलिसहितानि चैतानि कर्म्माण्याचरेत् । सर्व्वहोमानामारम्भोऽप्येवमेव करणीय इति यज्ञविदो जनाः कथयन्ति । होमः इति वचनादारम्भे नियमो न स्यादिति वा ; आदरातिशयार्थं वा ; 'आरम्भः सर्व्वहोमानाम्'—इति पुनराह ॥ ४५ ॥ ४६ ॥

"मध्यतः प्राचीं रेखामुल्लिख्योदीचीञ्च संहतां पश्चात्"—इत्यादि-सूत्रेण स्थण्डिले रेखादिकरणमभिधाय, "लक्षणाद्दोषा सर्व्वत्र"—इति सूत्रेण तेषां लक्षणत्वमुक्तं गोभिलेन। तदिदं विशेषतो-विवक्षुः प्रतिजानीते,—

लक्षणं तत् प्रवक्ष्यामि प्रमाणं दैवतञ्च यत्।

गोभिलेन रेखाकरणादिरूपं लक्षणमुक्तं, तदहं प्रकर्षेण वक्ष्यामि। रेखाणां यत् प्रमाणं, यच्च दैवतं देवता, तत् सर्व्वं प्रवक्ष्यामि॥

न नखेन न काष्ठेन नाश्मना मृन्मयेन वा ॥४७॥
प्रोल्लिखेल्लक्षणं विप्रः सिद्धिकामस्तु यो भवेत्।

अश्मना पाषाणेन। लक्षणं रेखाम्। निगदव्याख्यातमन्यत् ॥४७॥

नखादिना रेखाकरणे दोषमाह,—

नखेन कुनखी चैव काष्ठेन व्याधिमृच्छति ॥४८॥
अश्मना धननाशः स्यात् मृन्मयेन कलिर्ध्रुवम्।

ऋच्छति गच्छति प्राप्नोति,—इत्येतत्। कलिः कलहः। अति-रोहितार्थमन्यत् ॥ ४८ ॥

नखादिना रेखाकरणे दोषमभिधाय, अथेदानीं फलादिना रेखाकरणे गुणमाह,—

फलेन फलनी चैव पुष्पेण श्रियमृच्छति ॥ ४९ ॥
पर्णेन धनलाभः स्यात् दीर्घमायुः कुशेन तु।

फलेन लक्षणं लिखन् फलनी स्यात्। फलनं फलम्। तद्विद्यतेऽ-

स्येति फलनी फलवान् इत्यर्थः । फलिनी,—इति पाठे, फलेन लिखिता रेखा फलिनी फलप्रदा स्यादिति व्याख्येयम् । पर्णेन पत्रेण । सुगममन्यत् ॥ ४९ ॥

यस्मादेवम्,—

तस्मात् फलेन पुष्पेण पर्णेनाथ कुशेन वा ॥ ५० ॥
प्रोल्लिखेल्लक्षणं विप्रः सिद्धिकामस्तु कर्म्मसु ।

ऋज्वर्थः श्लोकः ॥ ५० ॥

सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु ॥५१॥
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ।

सव्यं वामं पाणिं भूमौ प्रतिष्ठाप्य दक्षिणेन पाणिना लक्षणं प्रोल्लिखेत् । यावदग्निं स्थण्डिले स्थापयेत्, तावद् वामं पाणिं नोत्थापयेत्—भूमावेव स्थापयेदित्यर्थः ॥ ५१ ॥

अथेदानीं रेखानां देवतामाह,—

प्राक्कृता*पार्थिवी रेखा†आग्नेयी चाप्युदक् स्मृता‡॥५२॥
प्राजापत्या च ऐन्द्री च ‡‡ सौमी च प्राक्कृता स्मृता ।

पार्थिवी पृथिवीदेवताका रेखा प्राक्संख्या आचार्येण कृता । आचार्येण प्राक् संख्या या रेखा प्रथममभिहिता सेयं पार्थिवी,—इति वक्तव्ये—प्राक् कृता पार्थिवी रेखा,—इति भङ्ग्यन्तरेणाह ।

---

* प्राग्गता,—इति पाठान्तरम् । † श्रेया,—इति पाठान्तरम् ।
‡ गता,—इति पाठान्तरम् । ‡‡ प्राजापत्या तथा चैन्द्री,—इति पाठान्तरम् ।

अनेनैव श्लोकशेषो व्याख्यातः। आसाञ्च रेखानां पाठक्रमेणैवोल्लेखनक्रमो बोद्धव्यः। तदनेन, "मध्यतः प्राचीं लेखामुल्लिख्योदीचीञ्च संहतां पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत्"—इति सूत्रोक्तानां रेखाणां देवतमुक्तम् ॥ ५२ ॥

**उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत् ॥ ५३ ॥**
**द्वारमेवन्तु द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्।**

रेखाभ्यः पूर्व्वोक्ताभ्यः, उत्करं गृह्य गृहीत्वा, अरत्निमात्रे देशे निधापयेत् स्थापयेत्। उद्धृत्य कीर्य्यते विक्षिप्यते इत्युत्करो रेखोत्कीर्णमृत्तिका भण्यते। कस्यां दिशि निधापयेत्? उच्यते। प्रागुदीच्यामैशान्यां दिशि पुनर्द्रव्याणामुत्कराणामेवं द्वारं निधापनद्वारं मुनिभिः स्मृतम्। द्वारमेतत् पदार्थनाम्,—इति तत्त्वकारपाठेऽपि तथैवार्थः। 'एवमैशान्यां दिशि होमद्रव्याणामानयनार्थं द्वारं स्मृतम्'—इति तु दीक्षितरामकृष्णः ॥ ५३ ॥

रेखाणां मानमाह,—

**पार्थिवी चैव सौमी च लेखे द्वे द्वादशाङ्गुले ॥ ५४ ॥**
**एकविंशतिराग्नेयी प्रादेशिन्यै उभे स्मृते।**

पृथिवीदेवताका सोमदेवताका चेति द्वे रेखे द्वादशाङ्गुलपरिमिते। अग्निदेवताका रेखा एकविंशत्यङ्गुलपरिमिता। उभे अवशिष्टे प्राजापत्यैन्द्रीरेखे प्रादेशिन्यै प्रादेशपरिमिते स्मृते। एतदुक्तं भवति। प्रथमं प्राक्संख्यां द्वादशाङ्गुलपरिमितां पार्थिवीं रेखामुल्लिखेत्।

तत उदक्संस्थामेकविंशत्यङ्गुलामाग्नेयीं रेखामुल्लिखेत् । ततः प्राक्संस्थां प्रादेशपरिमितां प्राजापत्यामैन्द्रीञ्च रेखामुल्लिखेत् । ततः पुनरपि प्राक्संस्थां द्वादशाङ्गुलपरिमितां सौमीं रेखामुल्लिखेत्,—इति । कात्यायनस्तु कर्म्मप्रदीपे,—

"लक्षणे प्राग्गतायास्तु प्रमाणं द्वादशाङ्गुलम् ।
तन्मूललग्ना योदीची तस्या एवं नवोत्तरम् ॥
उदग्गतायाः संलग्नास्तिस्रः प्रादेशमात्रिकाः ।
सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैवं समुल्लिखेत्" ॥

इति प्रकारान्तरं स्मरति । तदनयोः प्रकारयोर्विकल्पो बोद्धव्यः । कुतः ? द्वयोरेव स्वशास्त्रोक्तत्वात् ॥ ५४ ॥

आग्नेयीलग्नानां रेखाणामन्तरपरिमाणमुल्लेखनप्रकारञ्चाह,—

**षड़ङ्गुलान्तराः कार्य्या आग्नेयीसंहितास्तु ताः ॥५५॥**
**पार्थिवायास्तु रेखायास्तिस्रस्ता उत्तरोत्तराः ।**

आग्नेय्यामुदक्संस्थायामेकविंशत्यङ्गुलपरिमितरेखायां संहिताः संलग्नाः, ताश्चतस्रो रेखाः प्रत्येकं षड़ङ्गुलव्यवहिताः कर्त्तव्याः ।

"सप्त सप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्" ।

इति कर्म्मप्रदीपोक्तमन्तरं तदुक्तकल्पे बोद्धव्यम् । पार्थिवायाः पार्थिव्या रेखाया अन्या यास्तिस्रो रेखाः, ता उत्तरोत्तराः कार्य्याः । सा खल्वियं पार्थिवी रेखा स्थण्डिलस्य दक्षिणतः स्यात् । कथं ज्ञायते ? अन्यासां तिसृणां रेखानामुत्तरोत्तरत्व-षड़ङ्गुलान्तरत्वयोरनुरोधात् ॥ ५५ ॥

रेखाणां वर्णमाह,—

शुक्लवर्णा पार्थिवी स्यादाग्नेयी लोहिता भवेत् ॥५६॥
प्राजापत्या भवेत् कृष्णा नीलामैन्द्रीं विनिर्दिशेत्।
पीतवर्णेन सौमी स्याद्रेखाणां वर्णलक्षणम् ॥ ५७ ॥

पीतवर्णेन,—इति इत्यभावे तृतीया। पीतवर्णेन विशिष्टा स्यादित्यर्थः। श्लिष्टमन्यत्। तदित्थमेनं सार्द्धश्लोकं दीक्षित-रामकृष्णः पपाठ व्याचष्टे च। रघुनन्दनस्वन्यग्रेमं ग्रन्थं पठति। तद्यथा,—

"पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता।
श्वेतवर्णा च सौमी स्याद्रेखाणां वर्णलक्षणम्" ॥

इति। भवदेवभट्टोऽप्येवमेव पठती लिलेख। पीतं रूपं पृथिव्याः, श्वेतं सोमस्य,—इति तन्त्वान्तरेऽपि दृश्यते। तदत्र भगवन्तो-भूमिदेवाः प्रमाणम् ॥ ५६ ॥ ५७ ॥

एष लेखविधिः प्रोक्तो गृह्यकर्म्मसु सर्व्वसु।
सूक्ष्मास्ता ऋजवः कार्य्या लेखास्ताः सुसमाहिताः ॥५८॥

लेखविधिः,—रेखाणामुल्लेखनविधिः। अथवा। लिख्यते,—इति लेखो रेखा भण्यते। तासां विधिरित्यर्थः। सर्व्वसु,—इति एत्वाभावश्छान्दसः। ताः पूर्व्वोक्ता रेखाः, सूक्ष्मा न स्थूलाः, ऋजवो न वक्राः, कर्त्तव्याः। ताः खल्विमा रेखाः

सुसमाहिताः,--शोभनं सम्यक्--यथोक्तप्रकारेणाहिताः कर्णीयाः,—इत्यादरार्थमुक्तम् ॥ ५८ ॥

## एतानि तत्त्वतो ज्ञात्वा गृह्याकर्म्माणि कारयेत् ।

एतानि परिसमूहनादीनि तत्त्वतो ज्ञात्वा, गृह्याकर्म्मणि कर्त्तव्येकारयेत् । एतानि.--इत्येव । गृह्याकर्म्माणि,--इति पाठे, एतानि ज्ञात्वा गृह्याकर्म्माणि कारयेदिति व्यक्त एवार्थः ॥ "प्रागुदक्प्रवणं देशं समं वा परिसमूह्योपलिप्य"—इति सूत्रेण भूमेरुपलेपनं गोभिलेनोक्तम् । 'गोमयेनोपलिप्य च'—इत्यनेन स्वयमप्येतदनुशिष्टम् । तत्र पृच्छति,—

विष्णुपादपरिक्रान्ता वाराहेणोद्धृता च या ॥५९॥
शुचिर्मेध्या च पूता च किमर्थमुपलिप्यते ?

येयं भूमिर्विष्णुपादेन परिक्रान्ता कृतपरिक्रमणा, वाराहेण वराहरूपिणा भगवता प्रलयार्णवादुद्धृता च, येयं शुचिरुपहता, मेध्या यज्ञार्हा च । मेधो यज्ञ इत्यमर्थान्तरम् । पूता पवित्रा च । अथ वा । शुचिर्मेध्या पवित्रेति पर्य्यायशब्दानां कथनभङ्ग्या पवित्रत्वातिशयो भूमेरभिप्रेयते । सा खल्वियं किमर्थं पुनरुपलिप्यते गोमयेन ? ॥ ५९ ॥

अत्रोत्तरमाह,—

इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः ॥ ६० ॥
मेदसा तस्य संक्लिन्ना तदर्थमुपलिप्यते ।

पुरा पूर्व्वस्मिन् काले वृत्रो नाम कश्चिन्महासुरः इन्द्रेण कर्त्रा वज्रेण करणेनाभिहतः, तस्य वृत्रस्य मेदसा धातुविशेषेण संक्लिन्ना आर्द्रा ( क्लिदू आर्द्रभावे ) इयं पृथिवी, एतस्मात् कारणादुपलिप्यते गोमयेन ॥ ६० ॥

ननु कस्मिंश्चिदतीते काले वृत्रस्य मेदसा संक्लिन्ना भूमिरासीत्, तदपि मेदः पूर्व्वमेवोद्धृतं, तत् किमिदानीमुपलेपनेन ?—इत्याशङ्कायामाह,—

**मेदसुद्ध्रियमाणस्य शेषं यत् किञ्च तिष्ठति ॥६१॥**
**अन्तर्धानं मृदा चैव दीयते वेदनिश्चयः ।**

'उद्ध्रियमाणस्य' उद्धृतस्य मेदसः, 'शेषम्' अवशिष्टम्, 'यत्' 'किञ्च' किमपि, 'मेदम्' मेदः, 'तिष्ठति' अस्थात्, 'मृदा' 'एव' 'तस्य' 'अन्तर्धानम्' 'दीयते' दत्तम् । उभयत्र कालसामान्ये लट् । अथ वा । उद्धृतस्य मेदसोऽवशिष्टं किञ्चिन्मेदोऽद्यापि तिष्ठत्येव । तिष्ठति चेत्, कथं न दृश्यते ? तत्राह । मृदैव तस्यान्तर्धानमद्यापि दीयते । अतो न दृश्यते,—इति भावः । इत्ययं 'वेदस्य' 'निश्चयः' । एतस्मात् कारणादिदानीमप्युपलिप्यते,—इत्यभिप्रायः ।

दीक्षितस्वन्वयेमं ग्रन्थं वर्णयाञ्चकार,—मेदसुद्ध्रियमाणस्य,—इत्यादिम् । "वृत्रस्य मेदं रुधिरमुद्ध्रियमाणस्योद्धृतस्य यत् शेषं किञ्च तिष्ठति, तन्मृदैव मृत्तिकया अन्तर्धानं दीयते—स्थण्डिलं क्रियते इत्यर्थः"—इति ॥ ६१ ॥

द्यूते च व्यवहारे च प्रवृत्ते यत्नकर्म्मणि ॥ ६२ ॥
यानि पश्यत्युदासीनः * कर्त्ता तानि न पश्यति ।

द्यूते,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते" ।

इत्युक्तलक्षणे । व्यवहारे,—

"वि नानार्थे, ऽव सन्देहे, हरणं हार उच्यते ।
नानासन्देह-हरणाद्व्यवहार इति स्मृतः" ।

इत्याद्युक्तलक्षणे विवादनिर्णये, यत्नकर्म्मणि च प्रवृत्ते, यान्युदासीनः पश्यति, द्यूतादिकर्त्ता तानि न पश्यति । 'प्रवृत्ते'—इत्यत्र 'प्रवर्त्ते'—इति रघुनन्दनः पठति । 'प्रवर्त्ते प्रकृष्टवर्त्ते'—इति व्याकरोति च ॥ ६२ ॥

यस्मादेवं, तस्मात्,—

एकः कर्म्मणि युक्तः स्यात् द्वितीयस्तन्त्वधारकः ॥ ६३ ॥
तृतीयः प्रश्नं प्रब्रूयात्† ततः कर्म्म समाचरेत्‡ ।

एकः पुरुषः कर्म्मणि युक्तः नियुक्तः स्यात् । कर्म्मनियुक्त इति दन्त्यपाठे व्यक्तोऽर्थः । द्वितीयः पुरुषः, तन्त्वस्य कर्म्मविस्तारस्य शुद्धाशुद्धकर्म्मणो धारको धर्त्ता स्यात्,—इति दीक्षितभाष्यम् । स खल्वयं पुरुषः सत्रब्रह्मके कर्म्मणि ब्रह्मैव स्यात् । कथं ज्ञायते ?

---

* पश्यन्त्युदासीनाः,—इति पाठान्तरम् ।
† प्रश्नकं ब्रूयात्,—इति पाठान्तरम् ।
‡ समारभेत्—इति पाठान्तरम् ।

"भावेत यज्ञसंसिद्धिम्"—इति गोभिलसूत्रस्वरसात्। अन्नाद्यके पुनरन्योऽपि। तन्त्रधारकः पुस्तकवाचकः,—इति रघुनन्दनः। तृतीयः पुरुषः कर्म्मणः शुद्धाशुद्धिविषयकं प्रश्नं प्रब्रूयात् प्रकर्षेण शास्त्रादिना ब्रूयात् कथयेत्—निर्णयेदित्यर्थः। स खल्वयं सदस्यो भण्यते ॥ ६३ ॥

अथेदानीं "भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति"—इति सूत्रोक्तमग्निप्रणयनं व्याकुर्वते सार्द्धैश्चतुर्भिः,—

**कपालैर्भिन्नपात्रैर्वा न त्वामैर्गोमयेन वा ॥ ६४ ॥**
**अग्निप्रणयनं कार्य्यं यजमान-भयावहम्।**

कपालैर्घटखण्डैः,—

"कपालं मृन्मयं पात्रं चक्राघटितमुच्यते"।

इत्युक्तलक्षणैर्वा। भिन्नपात्रैः—भग्नपात्रैर्वा। आमैरपक्वपात्रैर्वा। तुशब्दो वाशब्दार्थः। गोमयेन वा, अग्निप्रणयनं न कर्त्तव्यम्। कपालादिपात्रैः कृतं खल्वग्निप्रणयनं यजमानस्य भयमावहति ॥६४॥

**अल्पः प्रणीतो विच्छिन्नोऽसमिद्धश्चापरिश्रुतः ॥ ६५ ॥**
**त्वरया पुनरानीतो यजमान-भयावहः।**

अल्पः। विच्छिन्नोऽन्तरा च्छेदसहितः—विच्छिन्न इति यावत्। असमिद्धोऽप्रदीप्तः। अपरिश्रुतः शास्त्रोक्तेतिकर्त्तव्यतारहितः। श्रुतं शास्त्रमिति श्रुनर्थान्तरम्। त्वरया चानीतः प्रणीतोऽग्निर्यजमानस्य भयमावहति। पुनः-शब्दश्चशब्दार्थः ॥ ६५ ॥

यस्मादेवम्,—

तस्माच्छुभेन पात्रेण अविच्छिन्नाक्रशं बहु ॥ ६६ ॥
अग्निप्रणयनं कुर्य्याद् यजमान-सुखावहम् ।

अविच्छिन्नम्, अक्रशं—समिद्धम्, बहु—नाल्पं यथा भवति, तथा अग्निप्रणयनं कुर्य्यात् ॥ ६६ ॥

शुभं पात्रन्तु कर्त्तव्यं यजमान-सुखावहम् ॥ ६७ ॥

शुभं पात्रमित्यादरार्थं पुनरुपादानम् ॥ ६७ ॥

शुभं पात्रमाह,—

शुभं पात्रन्तु कांस्यञ्च स्यात्तेनाग्निं प्रणयेद्बुधः ।
तस्याभावे शरावेण नवेनाभिमुखञ्च तम् ॥ ६८ ॥

तस्य कांस्यस्याभावे नवेन शरावेणाग्निं प्रणयेदिति गतेन संबन्धः । अभिमुखं यथा भवति, तथा 'तम्' अग्निं प्रणयेदिति कल्पद्वयेऽपि संबध्यते । यत्र,—

"शरावे भिन्नपात्रे वा कपाले वोल्मुकेऽपि वा ।
नाग्निप्रणयनं कुर्य्याद् व्याधिहानिभयावहम्" ।

इति शरावनिषेधः । स पुरातनशरावविषयः, कांस्यपात्रसद्भावविषयः, गोभिलीयव्यतिरिक्तविषयो वा ॥ ६८ ॥

अग्नेः स्वरूपमाह,—

सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः ।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु ॥ ६९ ॥

अन्तशब्दः स्वरूपार्थः। सर्व्वतः पाणिपादस्वरूपं यस्य, स तथा। सर्व्वतोऽक्षीणि--चक्षूंषि, शिरांसि, मुखानि च, यस्य, स तथोक्तः। स खल्वयं विश्वरूपो महानग्निः सर्व्वकर्म्मसु प्रणीतो भवति। "ज्ञात्वा स्वरूपमाग्नेयम्"—इत्यग्नेः स्वरूपं विदुषः फलवादः पुरस्तादभिहितः। तदेव खल्वग्नेः स्वरूपमनेन श्लोकेनोक्तमिति बोद्धव्यम्। रघुनन्दनस्तु,—विशेषतोनामाज्ञाने सर्व्वत्र विश्वरूपोनामाग्निर्भवति,—इति कल्पयाञ्चकार। अग्निप्रणयनानन्तरं पठनीयोमन्त्रोऽयम्,--इति चाचचक्षे ॥ ६९ ॥

न वस्त्रेण धमेदग्निं न सूर्पेण न पाणिना।
मुखेनोपधमेदग्निं मुखाद्येषोऽध्यजायत ॥ ७० ॥

वस्त्रेण सूर्पेण पाणिना वा, अग्निं न धमेत् नोद्दीपयेत्। किन्तु मुखेनाग्निमुपधमेत्। तत्र हेतुः। हि यस्मादेषोऽग्निः प्रजापतेर्मुखादध्यजायत उत्पन्नः। मुखादुपजातस्य मुखेनोपधमनं युक्तमिति भावः। मुखादुत्पत्तिश्चाग्नेस्ताण्ड्ये ब्राह्मणे समाम्नायते। "सोऽकामयत--यज्ञं सृजेयेति, स मुखत एव त्रिवृतमसृजत, तं गायत्री च्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणो मनुष्यो वसन्त ऋतुस्तस्मात् त्रिवृत् स्तोमानां मुखं, गायत्री च्छन्दसा, मग्निर्देवतानां, ब्राह्मणो मनुष्याणां, वसन्त ऋतूनां, तस्माद् ब्राह्मणो मुखेन वीर्य्यं करोति, मुखतो हि सृष्टः"—इति। "मुखादग्निश्च वायुश्च"--इति च पुरुषसूक्ते। रघुनन्दनस्त्वेतदजानानः—'मुखात् मुखपाठ्यमन्त्रात्,—इति यट्टच्छयैव कल्पयाञ्चकार। तदनादरणीयम्।

तदिदं मुखेनाग्नेरुपधमनं लौकिकाग्निव्यतिरिक्तविषयम् ।

तथाच, कर्म्मप्रदीपः ।

"जुह्वंश्च हुते चैव पाणि-सूर्प-स्रुग्दारुभिः ।
न कुर्य्यादग्निधमनं कुर्य्याद् वा व्यजनादिना ॥
मुखेनैके धमन्त्यग्निं सुखाद्वेषोऽध्यजायत ।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्" ।

इति ॥ ७० ॥

वस्त्रादिना अग्निधमने दोषम्, मुखेन धमने फलञ्चाह,—

वस्त्रेण तु भवेद् व्याधिः सूर्पेण धननाशनम् ।
पाणिना मृत्युमादत्ते मुखेन सिद्धिभाग्भवेत् ॥ ७१ ॥

मृत्युमादत्ते गृह्णाति,—अचिरान् म्रियते, इत्यर्थः । अतिरोहितार्थमन्यत् ॥ ७१ ॥

अथेदानीं त्रिधा प्रातर्होमकालमाह,—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ ७२ ॥

ऋज्वर्थः श्लोकः ॥ ७२ ॥

वस्तुक्रमानुरोधादुद्देशक्रममुल्लङ्घ्य प्रथममनुदितं कालं लक्षयति,—

रात्रेः षोड़शमे भागे ग्रहनक्षत्रभूषिते ।
अनुदयं विजानीयाद्धोमन्तत्र प्रकल्पयेत् ॥ ७३ ॥

रात्रेः—षोड़शधा विभक्तायाः, षोड़शमे भागे । स खल्वयं कालो-

ऽन्तिममुहूर्त्तादपि किञ्चिन्यूनो भवति। तमिमं कालं विशिनष्टि। ग्रहनक्षत्रैर्भूषिते अलङ्कृते। यावद्ग्रहनक्षत्राणि दीप्यन्ते, तावदित्यर्थः। तमिमं कालमनुदयं जानीयात्। तत्रानुदयकाले होमं कुर्य्यात् ॥ ७३ ॥

समयाध्युषितं कालमाह,—

ततः प्रभातसमये नष्टे नक्षत्रमण्डले।
रविबिम्बं न दृश्येत समयाध्युषितं स्मृतम् ॥७४॥

ततः—तदनन्तरं, प्रभातसमये,—भातं दीप्तिः; "भा दीप्तौ"—इति स्मरणात्, रविकिरणानां प्रदीप्तिसमये इत्यर्थः। अतएव नक्षत्रमण्डले नष्टे विलीने विरले इत्येतत्। पुनर्विशिनष्टि। रविबिम्बं सूर्य्यमण्डलं यावन्न दृश्यते, तावदित्यर्थः। स खल्वयं कालः समयाध्युषितं स्मृतमाचार्य्यैः। विधेयप्राधान्यविवक्षया नपुंसकनिर्देशः ॥ ७४ ॥

उदयकालमाह,—

रेखामात्रन्तु दृश्येत रश्मिभिश्च समन्वितम्।
उदयं तं विजानीयाद्धोमं कुर्य्याद्विचक्षणः ॥ ७५ ॥

रश्मिभिः किरणैर्युक्तं सूर्य्यमण्डलस्य रेखामात्रं यदा दृश्यते, तं कालमुदयं जानीयात्। पुरस्तात्तावत् 'रविबिम्बं न दृश्येत'—इत्युक्तम्। तदत्र, रविबिम्बस्यैव रेखामात्रं दृश्यते,—इत्यर्थमवगच्छामः। स खल्वयमुदयकालस्यारम्भः। उत्तरावधिस्त्वस्य,—

"दृश्यादूर्ध्वं रविर्यावन्निरिं हित्वा न गच्छति ।
तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम्" ॥

इति कर्मप्रदीपे कात्यायनेनोक्तः । तस्मात्,—'खण्डिलहृद्रेखाया एकविंशत्यङ्गुलपरिमाणदर्शनात् रेखामात्रमेकविंशत्यङ्गुलमात्रं रवेरुदयं दृश्येत'—इत्यसङ्गतैषा कल्पना दीक्षितस्य ।

ननु "पुरोदयात् प्रातः प्रादुष्कृत्योदितेऽनुदिते वा प्रातराहुतिं जुहुयात्"—इति सूत्रयता गोभिलेन प्रातर्होमस्य कालद्वयमुक्तम्, अनेन तु कालत्रयमुच्यते । तदनयोः पितापुत्रवचसोर्विरोधः कथं समाधेयः । उच्यते । नैषदोषः । अभिप्रायभेदात् । गोभिलः खल्वाचार्यः उदयात् पूर्व्वमेवानुदयकालमभिप्रयन् समयाध्युषितस्यापि कालस्य तत्रैवान्तर्भावं मन्यमानः 'उदितेऽनुदिते वा'—इति कालद्वयं सूत्रयाञ्चकार । अनेन तु "उदिते जुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोति"—इति श्रुतिमनुसरता एकस्यैवोदयपूर्व्वकालस्यानुदयसमयाध्युषितत्वेन त्रैविध्यमभिप्रेत्य कालत्रयमुपदिष्टम् । तस्मादभिप्रायभेदात् द्वयोरविरोधः ॥ ७५ ॥

अथेदानीमग्न्याधानस्य कालानाह,—

**आधानस्य तु चत्वार उक्ताः कालाः पृथक् पृथक् ।**
**अग्न्या समिद्विवाहस्य विभागः परमेष्ठिनः ॥ ७६ ॥**

अग्न्याधानस्य पुनः पृथक् पृथक् चत्वारः काला आचार्यैरुक्ताः । तान् कालान् गणयति,—अग्न्या समिदित्यादिना । विभागोऽंशविभागः ।

अत्र किञ्चिदवक्तव्यमस्ति। तत्र तावत्,—"ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्"—इति सूत्रेण यः आधानकाल उक्तः, स इहान्त्यसमिद्योगादन्त्या समिदिति निर्दिश्यते। "जायायावा पाणिं जिघृक्षन्"—इति सूत्रेण य आधानकाल उक्तः, स इह विवाह इत्युच्यते। यः पुनः परमेष्ठिनोऽग्नेराधानकालः—"प्रेते वा गृहपतौ परमेष्ठिकरणम्",—इत्यनेन सूत्रेणोपदिष्टः; स इह परमेष्ठिन इत्यभिधीयते। विभागकालः पुनर्गोभिलेन नोपदिष्टः, तत् कथमाधानस्य चत्वारः काला उक्ता इत्युच्यते? उच्यते। एते चत्वारः कालाः गोभिलेनोक्ताः,—इत्येतदिह नोच्यते। किन्तर्हि? आचार्यैरुक्ताः,—इति। गौतमः खल्वाचार्यः,—"भार्यादिरग्निर्दायादिर्वा"—इति सूचयाञ्चकार। सोऽपि किल छन्दोग एव। गोभिलीयगौतमीये सूत्रे छन्दोगैरेव परिगृहीते,—इति तत्त्ववार्त्तिकेऽभिहितम्। तत्र, तावत्, एक एव भार्यादिरग्निः,—'अन्त्यां समिधमभ्याधास्यन्'—इति, 'पाणिं जिघृक्षन्'—इति च कालद्वयाङ्कितो भवतीत्याचार्येण दर्शितः। एकः खल्वपि दायादिरग्निः—गृहपतेर्मरणं, दायविभागश्चेति कालद्वयाङ्कितो भवति,—इत्याचार्यसूत्रादाचार्यपुत्रवाक्याच्चावगच्छामः। तस्मात्,—चत्वारः कालाः,—इति उपपन्नतरम्।

"प्रेते वा गृहपतौ"—इति सूत्रयता गोभिलेन गृहपतौ प्रेते यदाधानमुक्तं, तत् ज्येष्ठस्यैव भ्रातुर्न कनिष्ठस्य। कथं ज्ञायते?

"ज्येष्ठः कुर्य्यात्तथाऽऽधानं कनीयांश्च विवर्जयेत्"।

इति कर्म्मप्रदीपवचनात्। कनिष्ठस्य तु विभागकाल एव दायादि-

रग्निर्भवति। तस्मात्,—आचार्यो ज्येष्ठं प्रधानमभिप्रेत्य "प्रेते वा गृहपतौ'—इति सूत्रयाञ्चकार, आचार्यपुत्रस्तु कनिष्ठाभिप्रायेण 'विभागः'—इत्याह,—इति श्लिष्यते। तदिदं गोभिलानुक्तविशेषाभिधानपरं वचनम्। ननु, "तथा तिथिनक्षत्रपर्व्वसमवाये" "दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्व्वीत"—इति सूत्राभ्यामन्येऽप्याधानकाला गोभिलेनोक्ताः, तत् कथमाधानस्य 'चत्वारः कालाः'—इत्युच्यते। उच्यते। सत्यमुक्ता अन्येऽप्याधानकालाः, परन्तु गृह्यकर्म्मणां योऽग्निः, स्तत्रैते चत्वार एव कालाः सन्निक्षथन्ते नेतरे। कुतः? इतरेषां कालानामाश्रमान्तरसाधारण्यात्। श्रौताग्निसाधारण्याच्च। चत्वारः खल्वमी कालाः गृह्यकर्म्मणामग्नेरसाधारणाभवन्ति। कस्मात्? यस्मादन्त्यसमिदाधानात् विवाहाच्चासौ गृहस्थो भवति। पूर्व्वं खल्वयं ब्रह्मचारी आसीत्।

सत्यपि गार्हस्थ्ये पितरि जीवति न स्वातन्त्र्यं गृह्यकर्म्मादिषु पुत्राणामिष्यते। "पितरि जीवति पुत्राणामर्थादानविसर्गाक्षेपेषु न स्वातन्त्र्यम्"—इत्यादिस्मरणात्। तेषामपि गृह्यतया पितृकृतैरेव गृह्यकर्म्मभिः फलवत्तायां न्याय्यत्वाच्च। अतएव गृहपतौ प्रेते गृह्यकर्म्मणामग्नेराधानं ज्येष्ठस्य। जीवति ज्येष्ठे कनीयसामप्यविभक्तानामस्वातन्त्र्यं मुनयः स्मरन्ति। तथाच मनुः।

"पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः।
पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्म्मतः" ॥

इति। अतएवांशविभागकालोऽमीषामाधानकालः। अतएव मनुः।

"एवं सहवसेयुर्वा पृथग्वा धर्म्मकाम्यया"।

इति विभागे धर्म्मकाम्यां हेतुतया निर्दिशति। गौतमोऽप्याह। "विभागे तु धर्म्मवृद्धिः"—इति। यस्मात्,—परेते गृहपतावग्नेराधानं ज्येष्ठस्यैव, कनीयसान्तु विभागकाल एव, तस्मादविभक्तानामेकमेव गृह्यकर्म्मादिकं विभक्तानान्तु पृथक् पृथक्,—इति स्मर्त्तारः स्मरन्ति। तथाच बृहस्पतिः।

"एकपाकेन वसतां पित्रदेवद्विजार्च्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे" ॥

इति। नारदः।

"भ्रातॄणामविभक्तानामेकोधर्म्मः प्रवर्त्तते।
विभागे सति धर्म्मोऽपि भवेत् तेषां पृथक् पृथक्" ॥

इति। तस्मात्,—गृह्यकर्म्मणामग्नेरसाधारणाश्चत्वारः कालाः,—इति तथोक्तम्। तथाच गौतमः। "भार्य्यादिरग्निर्दायादिर्वा, तस्मिन् गृह्याणि"—इति। एतत्सूत्रोक्तस्यैव खल्वग्नेश्चत्वार इमे आधानकालाः भवन्ति,—इत्यवोचाम ॥ ७६ ॥

भार्य्यादेस्तावदग्नेः प्रथमप्रातराहुतिप्रकारः,—"तेन चैवास्य प्रातराहुतिर्हुता भवति"—इति सूत्रेणोक्तः। दायादेरग्नेः प्रथमप्रातराहुतिप्रकारमाह,—

परमेष्ठी विभक्तश्च जुहुयादुक्तान् सकृत्।
प्रातस्तूष्णीं घृतं वाऽपि प्रातराहुत्युपक्रमः ॥७७॥

येन परमेष्ठिनोऽग्नेराधानं कृतं, स इह परमेष्ठी भण्यते। येन च विभागकाले कृतमग्नेराधानं, स विभक्त इत्युच्यते। स खल्वयं

परमेष्ठी विभक्तश्च, अक्षतान्—'अक्षतास्तु यवाः प्रोक्ताः'—इति वचनात् यवान्, घृतम् वा सकृदेकवारं तूष्णीममन्त्रकं प्रातर्जुहुयात्। सेयं दायादेरग्नेः प्रथमा प्रातराहुतिर्भवति। अपरस्तु सकृत् पदमनर्थकं कुर्व्वन्नाह,—'द्वितीयामपि तूष्णीं जुहुयात्,'—इति।

तदनयोः परमेष्ठिविभक्तयोरग्न्योः प्रातराहुतिभ्यामुपक्रमः प्रारम्भः। तदनेन, "सायमाहुत्युपक्रम एवात ऊर्द्धं गृह्योऽग्नौ होमोविधीयते"—इति गोभिलसूत्रं दायादाग्निव्यतिरिक्तविषयं व्याख्यातम् ॥ ७७ ॥

"अपिवाऽन्यं मथित्वाऽभ्यादध्यात्"—इति सूत्रेणारणेयोऽग्निरुपदिष्टः। तत्रारणिस्वरूपादिकमाह,—

आश्वत्थीन्तु शमीगर्भामरणिं कुर्व्वीत सोत्तराम्।
उरोर्दीर्घां रत्निदीर्घां चतुर्विंशाङ्गुलां तथा ॥ ७८ ॥
चतुरङ्गुलोच्छ्रितां कुर्य्यात् पृथुत्वेन षडङ्गुलाम्।

आश्वत्थीमश्वत्थसंबन्धिनीम्। शमीगर्भां शमीगर्भसंबन्धिनीम्। तत्संबन्धात्ताच्छब्द्याम्। गर्भश्च,—

"संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते"।

इति कर्म्मप्रदीपोक्तलक्षणः। मुख्योऽयं पक्षः। असम्भवे आश्वत्थीमेव कुर्य्यात्।

"अलाभे त्वशमीगर्भादुडुरेदविलम्बितः"।

इति कर्म्मप्रदीपवचनात्। सोत्तरामुत्तरारणिसहितामरणिं

कुर्व्वीत। कीदृशीं कुर्व्वीत? उच्यते। उरोः सक्थिनो-दीर्घाम्। रत्निर्व्याख्याता। तत्परिमाणदीर्घाम्। चतुर्व्विंशाङ्गुल-दीर्घाम्। तथेति दैर्घ्यपरामर्शः। "खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति"—इतिवदमीषां परिमाणानां विकल्पो बोद्धव्यः। चतुरङ्गुलोच्छ्रितां चतुरङ्गुलोच्चाम्, पृथुत्वेन विस्तारेण षड़ङ्गुलां कुर्य्यात्। अत्र, चतुर्विंशाङ्गुलादिपरिमाण-मङ्गुष्ठाङ्गुलाभिप्रायेण। अविशेषाच्च द्वयोरप्यरत्न्योरेतत् परिमाणं बोद्धव्यम्। तथाच कर्म्मप्रदीपः।

"चतुर्व्विंशतिरङ्गुष्ठा दैर्घ्यं षड़पि पार्थवम्।
चत्वार उच्छ्रये मानमरत्न्योः परिकीर्त्तितम्" ॥

इति। अन्योऽपि विशेषः,—"तस्य या प्राङ्मुखी शाखा"—इत्यादिकः कर्म्मप्रदीपादुपलब्धव्यः ॥ ७८ ॥

प्रमन्थचात्रोबिलीनां परिमाणमाह,—

**अष्टाङ्गुलः प्रमन्थः स्याच्चात्रश्च स्यात् द्वादशाङ्गुलम् ॥७९॥**
**ओबिलो द्वादशैव स्यादेतन्मन्थनयन्त्रकम्।**

चात्रगर्भस्थो मन्थनार्थः काष्ठविशेषः प्रमन्थः। सोऽयं प्रमन्थो-ऽष्टाङ्गुलः स्यात्। स खल्वयं प्रमन्थः उत्तरारणेः काष्ठशकल-मुद्धृत्य कर्त्तव्यः।

"उत्तरारणिनिष्पन्नः प्रमन्थः सर्व्वदा भवेत्"।

इति कर्म्मप्रदीपवचनात्। "चात्रम्"—मन्थनदण्डरूपं द्वादशाङ्गुल-परिमितं स्यात्। ओबिली च—चात्रोर्ध्वस्थलौहशङ्कुशिरोनिबद्ध-

काष्ठविशेषरूपा द्वादशाङ्गुलैव स्यात्। एतत् सर्वं यथाविधि विन्यस्तं मन्थनयन्त्रमित्युच्यते। चात्रमोबिली च सारवद्दारुणा निर्मातव्यम्।

"सारवद्दारवं चात्रमोबिली च प्रशस्यते"।

इति कर्म्मप्रदीपवचनात्। विन्यासप्रकारस्त्वमीषां कर्म्मप्रदीपादुपलब्धव्यः॥ ७९॥

अथेदानीं देवयोनिसंज्ञकं मन्थनस्थानमाह,—

मूलादष्टाङ्गुलमुत्सृज्य त्रीणि त्रीणि च पार्श्वयोः॥८०॥
देवयोनिः स विज्ञेयस्तत्र मथ्यो हुताशनः।

अरण्या मूलदेशादष्टाङ्गुलं त्यक्त्वा, पार्श्वयोश्च त्रीणि त्रीण्यङ्गुलानि त्यक्त्वा यः सन्धिप्रदेशो लभ्यते, स खल्वयं देवयोनिर्विज्ञेयः। तत्राग्निर्मथ्यः॥ ८०॥

प्रकारान्तरमाह,—

मूलादष्टाङ्गुलं त्यक्त्वा अग्रात्तु द्वादशाङ्गुलम्॥ ८१॥
देवयोनिः स विज्ञेयस्तत्र मथ्यो हुताशनः।

ऋज्वर्थः श्लोकः। प्रकारान्तरं मन्थनप्रकारश्च कर्म्मप्रदीपादुपलब्धव्यम्॥ ८१॥

स्रुवस्वरूपमाह,—

खादिरोऽरत्निदीर्घः स्यात् स्रुवोऽङ्गुष्ठपर्व्ववृत्तः॥ ८२॥

खदिरकाष्ठनिर्म्मितोऽरत्निदीर्घः स्रुवः स्यात्। अरत्निर्द्विवितस्ति-

रिति दीक्षितभाष्यम्। अङ्गुष्ठपर्व्वपरिमाणेन वृत्तोवर्त्तुलः। स्रुवस्य धारणदण्डः खल्वयममङ्गुष्ठपर्व्ववृत्तः स्यात्। अग्रे पुनरस्य नाशारन्ध्रवत् मध्यस्थितमर्थादमङ्गुष्ठद्वयपरिमाणं वर्त्तुलं बिलं कर्त्तव्यम्। तदाह कर्म्मप्रदीपः।

"खादिरो वाऽथ पालाशो द्वितस्तिः स्रुवः स्मृतः।
स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु ग्रग्रहस्तयोः॥
स्रुवाग्रे घ्राणवत् खातं द्व्यङ्गुष्ठपरिमण्डलम्।
जुह्वाः शरववत् खातं सनिर्बाहं षड़ङ्गुलम्"॥

इति। अग्रभागे अङ्गुष्ठपर्व्वभ्यां वृत्तोवर्त्तुलः,—इति वा वर्णनीयम्॥ ८२॥

स्रुचः स्वरूपमाह,—

**पार्णीं स्रुचं बाहुमात्रीं पाणितलाकारपुष्कलाम्।**
**त्वग्विलां त्वग्रे कुर्व्वीत मेक्षणं सुक्स्रुवादिवत्॥८३॥**

पर्णः पलाशः—इत्यनर्थान्तरम्। पार्णीं पलाशसंबन्धिनीम्, बाहुमात्रीं बाहुपरिमिताम्, अग्रे अग्रदेशावच्छेदेन,—पाणितलाकारपुष्कलां—पाणितलस्याकारेण पुष्कलां विस्तीर्णाम्, त्वग्विलां—त्वक्पर्य्यन्तखातां त्वचि खातां वा। एतेन त्वचा युक्तमेवास्या अग्रं स्यादित्यर्थादवगम्यते। तदेवम्भूतां स्रुचं कुर्व्वीत। इयमेव जुह्वरित्युच्यते। अत्रापि विशेषः कर्म्मप्रदीपादुपलब्धव्यः। मेक्षणमपि सुक्स्रुवादिवत् काष्ठनिर्म्मितम्। विशेषस्तु कर्म्मप्रदीपे।

"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्॥
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे।
दर्व्वी द्व्याङ्गुलपृथ्वग्रा तुरीयोनन्तु मेक्षणम्"॥

इति॥ ८३॥

## शङ्कुश्चैवोपवेशश्च द्वादशाङ्गुल इष्यते।

अन्वष्टक्यादिकर्म्मणि कर्षूणां खननार्थः शङ्कुर्भवति, 'दर्षीं चोपदध्यात्,'—इति सूत्रोक्तो दृषदपरपर्य्याय उपवेशः',—इति नारायणोपाध्यायाः। 'उपवेशो हस्ताप्रतिरूपकः',—इति दीक्षितभाष्यम्। स खल्वयं शङ्कुरुपवेशश्च द्वादशाङ्गुल इष्यते आचार्य्यैः। अत्रापि,—

"शङ्कुश्च खादिरः प्रोक्तो रजतेन विभूषितः"।

इति कर्म्मप्रदीपोक्तोविशेषो द्रष्टव्यः॥

## नवैः शोभनैरगर्भं पवित्रन्तु कुशाग्रजम्॥ ८४॥
## ललाटाच्चिबुकं प्राहुर्बाहुभ्यां परिधयः।

नवैर्न पुनरास्तृतैरित्यर्थः। शोभनैः कुशैः पवित्रं प्राहुराचार्य्याः। बहुवचनं व्यक्तिभेदाभिप्रायम्। कथं ज्ञायते?

"अनन्तर्गर्भिणं सार्द्धं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्"॥

इति कर्म्मप्रदीपे द्विदलस्योक्तत्वात्। अपर आह,

"चतुर्भिर्दर्भपत्रैश्च त्रिभिर्द्वाभ्यामथापिवा।
पवित्रं कारयेन्नित्यं प्रशस्तं सर्व्वकर्म्मसु"॥

इति।

"पवित्रन्तु द्विजः कुर्य्यात् कुशपत्रद्वयेन वा।
पत्रत्रयेण वा कार्य्यं नैकपत्रेण कुत्रचित्" ॥

इति चैवमादिस्मृत्यन्तरदर्शनात् बहुभिरपि कुशैः पवित्रं भवतीति किं व्यक्तिभेदाभिप्रायेण बहुवचनवर्णनया,—इति। सङ्केतित-विशिष्टद्विदलासम्भवे अवस्थाविशेषशून्यैस्त्रिभिश्चतुर्भिर्वा कुशैः पवित्रं भवतीति किल वदन्ति साम्प्रदायिकाः। तदभिप्रायकत्वे तु नवैरगर्भैरित्याद्युपादानं नातीव समञ्जसं स्यादिति सुधीभि-रवधेयम्। पवित्रं विशिनष्टि, अगर्भं गर्भशून्यम्। कुशाग्रजं साग्रकुशेन जातम्। ललाटात् ललाटमारभ्य. ल्यब्लोपे पञ्चमी। चिबुकं चिबुकपर्य्यन्तम्—ललाटावधि चिबुकपर्य्यन्तपरिमाण-मित्यर्थः। तदनेन,—"तत एव बर्हिषः प्रादेशमात्रे पवित्रे कुरुते"—इत्यादिसूत्रोक्तं पवित्रं व्याख्यातम्। "ललाटप्रमाणेन चिबुकं सन्दंशं प्राहुराचार्य्याः"—इति दीक्षितभाष्यम्।

"परिधीनप्येके कुर्व्वन्ति शामीलान् पार्णान् वा"—इति सूत्रोक्तान् परिधीन् व्याचष्टे। परिधयो बाहुमात्रा भवन्ति। विशेषस्तु कर्म्मप्रदीपे।

"बाहुमात्राः परिधयो ऋजवः सत्वचोऽव्रणाः।
त्रयो भवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम्" ॥

इति ॥ ८४ ॥

दीप्ताग्नौ विस्फुलिङ्गेऽत्र वने दग्धेषु दारुषु ॥८५॥

न च संस्कारदोषोऽस्ति तथा चरु-कपालयोः ।

'विच्छिन्ने दीप्ताग्नौ'—इति दीक्षितभाष्यम् । विस्फुलिङ्गे अग्निकणे, वने दवाग्निना दग्धेषु काष्ठेषु, चरौ च मार्ज्जारादिदृष्ट्याद्यल्पोपघाते, कपाले च, संस्कारे प्रोक्षणादौ कृते सति दोषो नास्ति ॥ ८५ ॥

अथेदानीं कर्म्मक्रममाह,—

लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दधत् ॥८६॥
ततो भूमिग्रहं कृत्वा कुर्य्यात् परिसमूहनम् ।

समिदित्यार्षो विभक्तिलोपः । ददधदिति शतृन्तम् । तदयमर्थः । रेखोल्लेखनमभ्युक्षणञ्च कृत्वा निहिते स्थापितेऽग्नौ समिधं दध्यात् । ततः,—"पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामहइति"—इतिसूत्रोक्तं भूमिग्रहं कृत्वा, "इमं स्तोममितिऋचेन परिसमूहेत्"—इतिसूत्रोक्तं परिसमूहनं कुर्य्यात् ॥ ८६ ॥

ब्रह्माणमुपसंकल्प्य चरुश्रपणमारभेत् ॥ ८७ ॥
ब्रह्माणं स्तरणं विद्याच्चरुर्यत्र न कल्पितः ।

ततो ब्रह्माणमुपसंकल्प्य,—अग्निसमीपे सम्यक् गृह्योक्तप्रकारेण स्थापयित्वा, चरुश्रपणमारभेत । तस्मात्,—भूमिजपादेः पूर्व्वं ब्रह्मस्थापनमित्यसङ्गतं वचनम् । यत्र कर्म्मणि चरुर्न कल्पितस्तत्र ब्रह्माणमेव स्तरणं जानीयात् । न तत्र गृह्योक्तं स्तरणं कुर्य्यादित्यर्थः ॥ ८७ ॥

ब्रह्मविष्टरयो*श्चापि सन्देहे समुपस्थिते ॥ ८८ ॥
ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः।

ब्रह्मविष्टरयोः स्वरूपसन्देहे निर्णयमाह,—ऊर्द्धकेशो ब्रह्मा भवेत्। अधोलम्बितकेशो विष्टरो भवेत्। केशोऽग्रम् ॥ ८८ ॥

कतिभिस्तु भवेद्ब्रह्मा ? कतिभिर्विष्टरः स्मृतः ? ॥ ८९ ॥
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः।

ऋजुरत्नरार्थः। आभ्यां श्लोकाभ्यां गोभिलोक्तौ दर्भवटुविष्टरौ व्याख्यातौ। कर्म्मप्रदीपे तु,—

"यज्ञवास्तुनि मुञ्जाश्च स्तम्बे दर्भवटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि" ॥

इति दर्भवटौ विष्टरे च दर्भसंख्या निषिद्धा। तदनयोर्विकल्पः,—पञ्चाशद्भिर्वा कुशैर्भवति, अपरिमितैर्वा कुशैः,—इति। कुतः ? इयोरप्यस्मच्छाखेऽभिधानात्। 'सम्भवे पञ्चाशद्भिः कुशैरसम्भवे अपरिमितैरिति व्यवस्थितोऽयं विकल्पः'—इति नारायणोपाध्यायाः। रघुनन्दनस्तु च्छन्दोगोऽपि, आचार्य्यपुत्रस्यैतद्वचनमित्यजानानः,—शाख्यन्तरीयमेतत् संख्यावचनम्,—इति कल्पयाञ्चकार ॥ ८९ ॥

उदग्धारामविच्छिन्नामाग्न्यमारभ्य दक्षिणाम् ॥ ९० ॥
दद्याद्ब्रह्मासनस्थाने सर्व्वकर्म्मसु नित्यशः।

---

* ब्रह्माविष्टरयोः,—इत्यादर्शपुस्तके अशुद्धः पाठः।

अग्नेरिदं आग्न्यं स्थण्डिलमारभ्य दक्षिणां दक्षिणाग्रामिति-दीक्षितभाष्यम्। अग्निमारभ्य,—इति तत्त्वकारः पठति। तदेवं ब्रह्मासनस्य स्थाने अविच्छिन्नामुदकस्य धारां दद्यात्। तदनेन,—"दक्षिणतोऽग्नेर्ब्रह्मासनमास्तीर्य्य"—इति सूत्रोक्तं ब्रह्मासनास्तरणम्,—तत्स्थाने इत्यमुदकधारां दत्त्वा करणीयमिति व्याख्यातम्। प्रागग्रवारिधारादानम्—इति केचित्॥ ९०॥

**एकाग्नौ* पित्र्ययज्ञे च ब्रह्माणं नोपकल्पयेत्॥९१॥**
**सायं प्रातश्च होमेषु तथैव बलिकर्म्मसु।**

एकोऽग्निर्यस्मिन्, तस्मिन्नेकाग्नौ पित्र्ययज्ञे,—इति सामानाधिकरण्येन संबन्धः, श्रौतस्य बह्वग्निसाध्यस्य पिण्डपित्र्ययज्ञस्य निरासार्थः। चकारः पुनरर्थः। एकाग्नौ पित्र्ययज्ञे पुनर्ब्रह्माणं नोपकल्पयेत्। पित्र्ययज्ञे अन्वष्टक्यकर्म्मणि पिण्डपित्र्ययज्ञे च,—इति दीक्षितभाष्यम्। एकाग्नौ, पित्र्ययज्ञे च,—इत्युभयत्र ब्रह्माणं नेच्छन्त्यन्ये। तदसङ्गतम्। एकाग्न्योरपि दर्शपौर्णमासयोर्ब्रह्मोपवेशनस्याचार्य्येण गृह्ये अभिधानात्। अपिच, एवं खल्वेकाग्निसाध्ये गृह्योक्तकर्म्ममात्र एव विवाह-होमादौ ब्रह्मा न स्यात्। इष्यते च। लिङ्गञ्च विवाहहोमे ब्रह्मणः पश्यामः। तथाच वक्ष्यति।

"प्राजग्राहमुदग्राहं ब्रह्माणमृत्विजं तथा।
एतानि वाह्यतः कृत्वा शेषाणान्तु प्रदक्षिणम्"॥

---

* राकाग्नौ,—इति परिशिष्टप्रकाशधृतः पाठः।

इति। तस्माद् यथोक्तमेवास्तु। 'राकाग्नौ'—इति पाठे, राकायां पौर्णमास्यां योऽग्निः, तत्र ब्रह्माणं न कल्पयेदित्यर्थः। तथाच गोभिलसूत्रम्। "पौर्णमास्यां रात्रौ खदिरशङ्कुशतं जुहुयादायुःकामः"—इति।

सायं प्रातर्होमेषु, चशब्दादन्येष्वपि क्षिप्रहोमेषु, बलिकर्मसु-चेत्यहोमकेष्वित्यर्थः। तदेतेषु ब्रह्माणं नोपकल्पयेत्। तथाच गृह्यान्तरम्।

"एकसाध्येष्ववर्हिःषु न स्यात् परिसमूहनम्।
नोदगासादनञ्चैव क्षिप्रहोमा हि ते स्मृताः" ॥

इत्येकसाध्यत्वम्—होममात्रसाध्यत्वं क्षिप्रहोमानामाह ॥ ९१ ॥

"अथ हविष्यान्नस्याग्नौ जुहुयात् कृतस्य वाऽकृतस्य वा"—इत्यादिसूत्रोक्तं कृतादिपदं व्याचष्टे,—

**यवव्रीह्यकृतं क्षेयं तण्डुलादि कृताकृतम् ॥ ९२ ॥**
**ओदनन्तु कृतं विद्यात् न तस्य करणं पुनः।**

ऋजुरत्नरार्थः। यवव्रीहि,—इति द्वन्द्वैकवद्भावः। तच्च गोधूमादीनामप्युपलक्षणम्। तण्डुलादि,—इत्यादिपदात् माषमुद्गादिवैदलादीनां ग्रहणम्। ओदनपदम्—मोदकपिष्टकादीनामप्युपलक्षणम्। 'तण्डुलादि,—इत्यादिपदात् सक्तुग्रहणम्,'—इत्यसङ्गतैषा कल्पना दीक्षितस्य। कुतः? तस्य कृतत्वात्। कथं ज्ञायते? यदयमोदनस्य कृतत्वे 'न तस्य करणं पुनः'—

इति हेतुतया निर्दिशति । अविशिष्टं खल्वेतत् सत्रौ । न हि तस्यापि पुनः करणमस्ति । तथाच कर्मप्रदीपः ।

"कृतमोदनसक्तादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा मतम्" ॥

इति ॥ ९२ ॥

**सीमन्ते दर्भपिञ्जूल्यस्तिस्रस्ताभिस्त्रिरुन्नयेत् ॥ ९३ ॥**

**त्रिभिः खेतैश्च शलली, प्रोक्तोवीरतरः शरः ।**

सीमन्तकरणे कर्मणि तिस्रोदर्भपिञ्जूल्यो भवन्ति । ताभिस्तिसृभिरेव वारत्रयं सीमन्तमुन्नयेत् । तदनेन,—"अथ सीमन्तमूर्ध्वमुन्नयति भूरिति दर्भपिञ्जूलीभिरेव प्रथमं भुवरितिद्वितीयं स्वरितितृतीयम्"—इति सूत्रोक्ता दर्भपिञ्जूल्य उन्नयनञ्च व्याख्यातम् । भवदेवभट्टस्त्वेतदजानानः, नव दर्भपिञ्जूलीराह । दर्भपिञ्जूलीनां त्रित्वमभ्युपगच्छन्नपि भट्टनारायणः—एकैकया पिञ्जूल्या एकैकमुन्नयनं वदन्नादेयवचन एव ।

त्रिभिः स्थानत्रये स्थितैः खेतैः—अन्तरा वर्णान्तरसन्निवेशैरित्यर्थः । इत्थम्भावे तृतीया । तदेवम्भूतैः खेतैः,—"त्रिखेतया च शलल्या"—इति सूत्रोक्ता शलली व्याख्याता । "अथ वीरतरेण"—इति सूत्रोक्तो वीरतरः शरः प्रोक्तः ॥ ९३ ॥

**दिशाञ्च विदिशाञ्चैव यँच नोक्ता विचारणा ॥ ९४ ॥**

**"सर्व्वतः" तत्र शब्दोऽयं विधियोगे निपात्यते ।**

यत्र विधियोगे—विधानयोगे, दिशां पूर्व्वादीनां विदिशामाग्ने-

व्यादीनाञ्च विचारणा, नोक्ता नाभिप्रेता, तत्र 'सर्व्वतः,'—इत्ययं शब्दोनिपात्यते क्रियते। तथाच गोभिलसूत्रम्। "यत्र खभ्राः खयं खाताः सर्व्वतोऽभिमुखाः स्युस्तत्रावसानं प्राग्द्वारं यशस्कामोबलकामः कुर्व्वीत"—इति। दीक्षितः पुनः—"एवं दक्षिणैवं प्रतीच्येवमुदीची"—इति सूत्रमत्रोदाजहार ॥ ९४ ॥

**विहितप्रतिषिद्धाञ्च प्रणीतां नोपकल्पयेत् ॥ ९५ ॥**

पूर्व्वं विहिता पश्चात् प्रतिषिद्धा या प्रणीता,—सेयं विहितप्रतिषिद्धा। तामिमां प्रणीतां नोपकल्पयेत्,—'गृह्याकर्म्मसु'—इति पराचीनमनुषज्य संबन्धनीयम्। आह। केयं विहितप्रतिषिद्धा नाम? उच्यते। महतः पात्रान्तरस्य सद्भावे अपां पूर्णः स्रुवः। तथाच गोभिलसूत्रम्। "उत्तरतोऽपां पूर्णः स्रुवः प्रणीता, भावे न वा स्यादित्येके"—इति ॥ ९५ ॥

**वैरूपाक्षं जपेन्मन्त्रं प्रपदञ्चैव यत्नवित्।**
**परिधीएस्तु न कुर्व्वीत गृह्याकर्म्मसु याज्ञिकः ॥९६॥**
**उदक्काञ्चलयस्तिस्रस्ते वै परिधयः स्मृताः।**

"वैरूपाक्षः पुरस्ताद्धोमानाम्"—इति सूचोक्तं वैरूपाक्षं मन्त्रम्, प्रपदञ्च,—"तपश्च तेजश्चेति जपित्वा"—इति सूत्रोक्तम्,—गृह्याकर्म्मसु जपेदन्यत्र क्षिप्रहोमेभ्यः। तथाच कर्म्मप्रदीपः।

"न कुर्य्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्।
वैरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्जयेत्" ॥

इति। "पूर्व्वेषु चैके"—इत्युपक्रम्य वैरूपाक्षादीनामुक्तत्वात्

प्रणीतावहिहितप्रतिषिद्धतया एतान्यपि गृह्याकर्म्मसु न कर्त्तव्यानीति मा प्रशाङ्क्षीदिति खल्वाचार्य्यपुत्रः,—वैरूपाक्षं जपेत्,—इत्याह । परिधींस्तु,—"परिधीनप्येके कुर्व्वन्ति"—इति सूत्रोक्तान्. गृह्याकर्म्मसु न कुर्व्वीत । तत्र हेतुः । अदितेऽनु,—इत्यादि मन्त्रैर्यं त्रयः,—'तिस्रः'—इति व्यत्ययेन स्त्रीत्वम्, त्रयइत्यर्थः । उदकाञ्जलयः, तएव परिधयोऽस्माकमाचार्यैः स्मृताः । तस्मात्, यत्रापि परिस्तरणं नास्ति, तत्रापि परिधीन् न कुर्व्वीत ॥ ९६ ॥

**सर्व्वेषामेव होमानां समिदादौ विधीयते ॥ ९७ ॥**
**कर्म्मान्ते चैवमेव स्यात् स्वाहां तत्र न कारयेत् ।**

सर्व्वेषामेव होमानामाद्यन्तयोः समिदग्नौ दातव्या । तत्रच स्वाहां न कुर्य्यात् । स्वाहापदं मन्त्रोपलक्षणम् । दैवतमप्यस्यानास्ति । तथाच कर्म्मप्रदीपः ।

"समिदादिषु होमेषु मन्त्रदैवतवर्ज्जिता ।
पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत्" ॥

इति ॥ ९७ ॥

"अथैधानुपकल्पयते खादिरान् पालाशान् वा"—इति सूत्रोक्तानिधान् व्याकुरुते,—

**इध्ममष्टादश दारु प्रवदन्ति विचक्षणाः ॥ ९८ ॥**
**दर्शे च पौर्णमासे च, क्रियास्वन्यासु विंशतिः ।**

दर्शपौर्णमासयोरष्टादशसंख्यकं दारु इध्मं वदन्ति पण्डिताः। अपरासु क्रियासु विंशतिरिध्मा भवन्ति। अन्यत्राङ्गहोमादिभ्यः। तथाच कर्म्मप्रदीपः।

"अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्म्मसु।
येषाञ्चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च॥
अङ्गभङ्गादिविपदि जलहोमादिकर्म्मणि।
सोमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते"॥

इति॥ ९८॥

प्रादेशमात्रं कुर्व्वीत मेक्षणं समिधस्तथा॥ ९९॥
इध्मः समानवृक्षाणां द्विप्रादेशप्रमाणतः।

मेक्षणं समिधश्च प्रादेशमात्रं कुर्य्यात्। इध्मस्तु द्विप्रादेशप्रमाणतः कर्त्तव्यः। स चायमिध्मः—समानजातीयानां वृक्षाणां, संबन्धलक्षणा षष्ठी, करणीयः। न पुनः कतिचिदिध्माः खादिराः कतिचिच्च पालाशाः कर्त्तव्याः॥ ९९॥

प्रागग्राः समिधोदेयास्ताश्च काम्येष्वपाटिताः॥१००॥
शान्त्यर्थेषु सशक्ताऽऽर्द्रा विपरीता जिघांसति।

समिधः प्रागग्राः कृत्वा अग्नौ देयाः। ताश्च समिधः काम्येषु कर्म्मस्वपाटिताः कर्त्तव्याः। शान्त्यर्थेषु कर्म्मसु, सशक्ता,—शक्तं शक्तिः, (भावे निष्ठा) तया सह वर्त्तमानाः—समर्थाः सवीर्य्या इति यावत्, आर्द्राश्च समित् कर्त्तव्या। जिघांसति हन्तु

मिच्छति कर्म्मणि—अभिचारकर्म्मणीत्येतत् । एतद्विपरीता समित् कर्त्तव्या निर्वीर्य्या शुष्का चेत्यर्थः । एतद्विपरीता समित् कर्त्री कर्म्मकर्त्तारं हन्तुमिच्छति,—इति वा वर्णनीयम् ॥ १०० ॥

**दूधः सन्नहनादानं चरुश्रपणमेव च ॥ १०१ ॥**
**तूष्णीमेतानि कुर्व्वीत समस्तञ्चेध्ममाददेत् ।**

दूधः पूर्व्वोक्तः । सन्नहनम्—"कंसमपां पूरयित्वा सर्व्वौषधीः कृत्वा हस्तावबधाय प्रदक्षिणमाचार्य्योऽहतेन वसनेन परिणह्येत्"—इति सूत्रोक्तं परिणहनमित्यर्थः । कुतः ? तत्रापि सन्नहनपदप्रयोगात् । तथाच, 'अक्षिसन्नहनत्यागः'—इति तदेव परिणहनं निर्दिशति । सन्नहनं बन्धनरज्जुः—"तन्तीं प्रसार्य्यमाणाम्"—इत्यादिसूत्रोक्ता,—इति केचित् । आदानं हविषां ग्रहणम् । चरुश्रपणञ्च । उपलक्षणञ्चैतत् । अन्यस्यापि हविषः श्रपणं बोद्धव्यम् । एतानि तूष्णीं कुर्य्यात् । समस्तञ्चेध्ममग्नौ दद्यात् ॥ १०१ ॥

**आचार्य्यानुमतं वाक्यमेकीयं गृह्यते क्वचित् ॥ १०२ ॥**
**शेषाणि चैव वाक्यानि आचार्य्यो न प्रशंसति ।**

यत्र क्वचिदुच्चावचानि वाक्यान्याचार्य्येण गोभिलेन पठितानि, तत्र यद्वाक्यमेकीयमेकीभूतम्—यन्मतं बह्वनामभिन्नमित्येतत् । तदाचार्य्यानुमतं गृह्यते—तदेवाचार्य्यस्यानुमतमिति ज्ञायते इत्यर्थः । शेषाण्येकीयमतविरुद्धानि वाक्यानि क्वचिदप्याचार्य्यो न प्रशंसति ।

अत्रायमर्थः। "चतुरष्टकोऽहमन्तः ताः सर्व्वाः समांसाश्विकीर्षेदितिकौत्सः"--इत्याचार्य्येण चतुरष्टकपक्षः सूचितः। "त्र्यष्टकइत्यौद्गाहमानिः" "तथा गौतमवार्कखण्डौ"--इत्यनेन त्र्यष्टकपक्षोऽपि सूचितः। न च किमत्र स्वमतमित्येतत् कथ्यत उक्तम्। तत्र, त्र्यष्टकपक्षएवानुमत आचार्य्यस्य,--इति प्रतिपद्यामहे। कस्मात् कारणात्? तत्रैव बह्वनामैकमत्यात्। अतएव, परतः कर्त्तव्योपदेशादिभिस्त्र्यष्टकपक्षएवाचार्य्येणानुगृहीतः, न चतुरष्टकपक्षः। चतसृष्वष्टकास्वाचार्य्येण कर्म्मानुपदेशात्। मध्यमाष्टकायामेवान्वष्टक्यकर्म्मविधानाच्च। चतुरष्टकपक्षे हि सर्व्वत्रैव मांससद्भावात् सर्व्वत्रैवान्वष्टक्यं भवितुमर्हति। कथं ज्ञायते? अष्टकासंज्ञपितपशुसाध्यत्वात्तस्य। तदिदमुक्तम्—शेषाणि वाक्यानि क्वचिदप्याचार्य्यो न प्रशंसति,—इति। तथाच कर्म्मप्रदीपः।

"अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ।
वार्कखण्डिश्च सर्व्वासु कौत्सोमेनेऽष्टकासु च" ॥

इति।

एवं वा,—

एकीयं एके इति कृत्वा पठितं वाक्यं क्वचिदाचार्य्यस्यानुमतं ज्ञायते। तत्र व्यतिरेकेण हेतुवचनमुत्तरार्द्धम्। यस्मात् आचार्य्यः शेषाणि स्वस्याननुमतान्येकीयवाक्यानि न प्रशंसति तदुचितकर्त्तव्योपदेशादिना न प्रकर्षेण स्तौति। तस्मादेकीयं मतं क्वचिदेवाचार्य्यस्यानुमतं न सर्व्वत्र। तथाच, यदेकीयं मतमुपन्यस्य तदुचितकर्त्तव्योपदेशादिना तत् प्रशंसति, तदेकीयं मतमाचार्य्यस्या-

नुमतम्। यत् पुनरेकीयं मतमाचार्य्यः केवलमुपन्यस्तवान्, न तु तदुचितकर्त्तव्योपदेशादिना तत् प्रशंसितवान्, तदेकीयं मतं नाचार्य्यस्यानुमतमित्यर्थः। तत्रोदाहरणम्। "द्वादश महानाम्निकाः संवत्सरा नव षट् त्रय इति विकल्पः"—इति सूत्रेण स्वमतेन महानाम्निकव्रतकालमुपदिश्य "संवत्सरमप्येके" इति सूत्रेण एकीयं मतमुपन्यस्य "व्रतन्तु भूयः" इत्यादिभिः सूत्रैः तदेव एकीयं मतं तदुचितकर्त्तव्योपदेशादिना आचार्य्यः प्रशंसितवान्। तस्मात् तदेकीयं मतमाचार्य्यस्यानुमतमिति ज्ञायते। अपर आह। यानि एकीयमतानि आचार्य्येणोक्तानि तानि सर्व्वाण्येव कस्याञ्चिदवस्थायामाचार्य्यस्यानुमतानि। यानि पुनरेकीयमतान्याचार्य्यः प्रकर्षेण न कथितवान्—नैवोक्तवानित्यर्थः। तान्येकीयमतानि नाचार्य्यस्यानुमतानि,—इति ॥ १०२ ॥

**द्रव्याणामुपकृप्तानां होमीयानां यथाविधि ॥ १०३ ॥**
**प्रसिञ्चन् * वीक्षणं कुर्य्यादङ्गिरभ्युक्षणमेव च † ।**

यथाविधि,—

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद्द्रव्यं यद्यथा विनियुज्यते" ॥

इति कर्म्मप्रदीपोक्तविध्यनुसारेण, उपकृप्तानाम्, समासादितानामित्यर्थः। होमीयानां होमसम्बन्धिनां द्रव्याणाम्। षष्ठी चेयं वीक्षणाभ्युक्षणसंबन्धापेक्षया द्रष्टव्या। तथा चोक्तम्।

---

* सादयन्,—इति तत्त्वकारधृतपाठः। † तथा,—इति पाठान्तरम्।

"प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते"—इति।

अङ्गैः प्रसिच्यन्, वौक्षणं दर्शनं, अभ्युक्षणञ्च,—

"उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम्।
न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं मतम्" ॥

इत्युक्तलक्षणं कुर्य्यात्। "एव च,"—इति निपातसमुदायः समुच्चयवाची ॥ १०३ ॥

गोभिलोक्तं सम्पूयनं व्याकुरुते,—

**पवित्रमन्तरे* कृत्वा स्थाल्यामाज्यं समावपेत् ॥१०४॥**

**एतत् सम्पूयनं नाम पश्चादुत्पवनं स्मृतम्।**

अन्तरे मध्ये, पवित्रम्—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेवच।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥
एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतम्।
आज्यस्योत्पवनार्थं यत् तदप्येतावदेव तु" ॥

इति कर्म्मप्रदीपोक्तलक्षणं, कृत्वा संस्थाप्य, आज्यस्थाल्यामाज्यं प्रक्षिपेत्। तदेतत् सम्पूयनं नाम स्मृतम्। एतदनन्तरमुत्पवनम्। तथाच गोभिलसूत्रम्। "सम्पूयोत्पुनात्युदगग्राभ्यां पवित्राभ्याम्"—इति ॥ १०४ ॥

"आज्य संस्कुरुते"—इति सूत्रोक्तमाज्यं व्याकरोति,—

**अग्निना चैव मन्त्रेण पवित्रेण च चक्षुषा ॥ १०५ ॥**

---

* अन्तरा,—इति पाठान्तरम्।

चतुर्भिरेव यत् पूतं तदाज्यमितरद्धृतम् ।

अग्निना अधिश्रयणं, मन्त्रेण—देवस्य त्वा,—इत्यादिना, पवित्रेण च यथोक्तलक्षणेनोत्पवनं, चक्षुषा वीक्षणम् । एभिश्चतुर्भिर्यत् पूतं तदाज्यमित्युच्यते । एतदन्यदसंस्कृतं यत्, तद्धृतम् । "आज्यं संस्कुरुते"—इति सूत्रे त्याज्यशब्दे "उद्वहेत द्विजो भार्याम्"—इत्यादिवद्भाविनि भूतवदुपचारो बोद्धव्यः ॥ १०४ ॥

घृतं वा यदि वा तैलं पयो वा दधि यावकम् ॥१०६॥
आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते ।

पयोदुग्धम् । यावकं यवागूः । आज्यस्याभावे आज्यस्थाने नियुक्तानामेषामाज्यशब्दोविधीयते । तदनेन "आज्यं संस्कुरुते सर्पिस्तैलं दधि पयो यवागूं वा"—इति गोभिलसूत्रं व्याख्यातम् ॥ १०६ ॥

आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते ॥ १०७ ॥
अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम् ।

विधिचोदिते संस्कारे,—तद्विषये इत्यर्थः । दध्नोऽधिश्रयणं नास्ति, शेषाणामधिश्रयणं स्मृतमाचार्यैः । श्लिष्टमन्यत् ।

एवं वा—

विधिचोदिते संस्कारे कृते सति आज्यशब्दोविधीयते,—इति गतेन संबन्धः । तत्र विशेषमाह अनधिश्रयणम्—इत्यादि । पूर्ववद्व्याख्यानम् ॥ १०७ ॥

**यथा सीमन्तिका* नारी पूर्व्वगर्भेण संस्कृता ॥ १०८ ॥**
**एवमाज्यस्य संस्कारः संस्कारे विधिनोदिते ।**

यथा सीमन्तिका नारी पूर्व्वगर्भेण—प्रथमगर्भेण संस्कृता भवति ;—द्वितीयादिगर्भे न पुनः सीमन्तकरणसंस्कारो यथेत्यर्थः। तथाच गोभिलसूत्रम्। "अथ सीमन्तकरणं प्रथमगर्भे"—इति। विधिना उक्ते संस्कारे—तद्विषये इत्येतत्। आज्यस्य संस्कारोऽप्येवमेव भवति। संस्कारविधिचोदितः,—इति पाठे, संस्कारविध्युक्त आज्यस्य संस्कारोऽप्येवमिति व्याख्येयम्। एतदनेनोक्तं भवति। सीमन्तकरणसंस्कारो गर्भस्य पात्रस्य च,—इति सकृत् संस्कृतपात्रजातानां सर्व्वेषां गर्भाणां संस्कृतत्ववत् आज्यसंस्कारोऽप्याज्यस्य तत्पात्रस्य च,—इति सकृत् संस्कृताज्यपात्रे यान्याज्यानि निःक्षिप्यन्ते तानि सर्व्वाणि संस्कृतानि भवन्ति, न पुनरमीषां पृथक् संस्कारः करणीयः,—इति। तथाच आश्वलायनगृह्यपरिशिष्टम्। "सीमन्तोन्नयनं प्रथमे गर्भे, सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कारः"—इति ॥ १०८ ॥

एतदेवाह,—

**आज्यस्य हविषां चैव आज्ये पूर्व्वक्रियाविधिः ॥१०९॥**
**तस्य संपवनं पूर्व्वं चरोः पर्य्युक्षणं परम् ।**

यस्मात् आज्ये आज्यविषये आज्य-संस्कारविषये इत्येतत्। आज्यस्य आज्यस्थाने गृहीतानां हविषाञ्च मध्ये, पूर्व्वं प्रथममेव

---

* सीमन्तिनी,—इति पाठान्तरम्।

क्रियायाः संस्कारस्य विधिर्विधानम्, तस्मात् तस्य पूर्व्वं प्रथममेव संपवनं पवित्रीकरणं संस्कारः,--इति यावत् ; न पुनः पश्चाद्गृहीतस्यापीत्यर्थः। चरोस्तु परं केवलं परि सर्व्वतोभावेन उक्षणं प्रोक्षणमेव संस्कारः इत्यर्थः।

एवं वा--

पूर्व्वमेव तस्य संपवनं सम्पूयनादि विधिचोदितः संस्कारः। चरोः,--उपलक्षणत्वात् यश्चाद्गृहीतस्य हविषः, पर्य्युक्षणमेव परं संस्कारः। पश्चाद्ग्राह्यं हविः--संप्रोक्ष्य ग्रहीतव्यमित्यर्थः। दीक्षितस्वाह। चरोः देवसवितः--इति पर्य्युक्षणं परं पश्चात्,--इति ॥ १०९ ॥

अथेदानीम्--"पर्य्युक्ष्य स्थालीपाक आज्यमानीय मेक्षणेनोपघातं होतुमेवोपक्रमते"--इति सूत्रोक्तमुपघातं व्याकुरुते,--

**पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः ॥ ११० ॥**
**हूयते चानुपस्तीर्य्य उपघातः स उच्यते।**

पाणिना मेक्षणेन वा स्रुवेणैव वा यत् हविर्हूयते, स खल्वयं होमोपघात उच्यते। यत्,--इति होमक्रियाविशेषणम्। किं कृत्वा हूयते ? अनुपस्तीर्य्य। उपस्तरणमभिघारणञ्चाकृत्वा। स्रुवेण स्रुचि प्रथमं यदाज्यं दीयते तदुपस्तरणम्, यत् पुनराज्यं चरुमवदाय अनन्तरं दीयते तदभिघारितम्,--इत्याचक्षते याज्ञिकाः। आचार्य्यपुत्रस्तु पूर्व्वापरकालकृतमवान्तरभेदमनादृत्य उपस्तरणमभिघारणञ्चोभयमेवोपस्तरणं मन्यमानः--'अनुपस्तीर्य्य' इत्याह ॥ ११० ॥

यद्युपघातं जुहुयाच्चरावाज्यं समावपेत् ॥ १११ ॥
मेक्षणेन तु होतव्यं नाज्यभागौ न स्विष्टकृत्।

यदि उपघातं जुहुयात्, तदा स्थालीपाके चरौ आज्यं प्रक्षिपेत्। मेक्षणेन होतव्यम्। तुशब्दश्चशब्दार्थः समुच्चये, पूर्वोक्तपाण्यादिकमपि समुच्चिनोति। तत्र च आज्यभागौ न होतव्यौ, न च स्विष्टकृत् होतव्यः।

स खल्वयमुपघातहोमः समश्नीयचरुपिष्टयज्ञचर्वोः, अन्यत्रापि बहुदैवत्ये चरौ, अन्वष्टक्यचरौ च भवति। तथाच कर्मप्रदीपः।

"चरौ समश्नीये तु पिष्टयज्ञचरौ तथा।
होतव्यं मेक्षणेनान्यदुपस्तीर्य्याभिघारितम्" ॥

इति।

"चरौ तु बहुदैवत्ये होमस्तस्योपघातवत्"।

इति च परिशिष्टप्रकाशादौ स्मृत्यन्तरम्। तथा अन्वष्टक्यकर्म्मणि गोभिलसूत्रम्। "कंसे चरू समवदाय मेक्षणेनोपघातं जुहुयात्"—इति। वृषोत्सर्गहोमस्य तु बहुदैवतत्वेऽपि नोपघातत्वम्। तदाह कर्म्मप्रदीपः।

"एतेभ्य एव जुहुयान्मेक्षणेनावदाय च।
स्रुच्याहुतीश्चरोः पृथक् सिञ्चेदाज्याभिघारितम्" ॥

इति। यत्रापि गोभिलेन "स्थालीपाकाहृताऽन्यत्"—इति सूत्रितम्, तत्रापि होमस्य नोपघातत्वमिति वक्ष्यामः ॥ १११ ॥

हुत्वाऽऽज्यं परिशेषेण यत् द्रव्यमुपकल्पितम् ॥११२॥
स्रुवेणैव तु तत् स्रुष्टं सम्पातं चैव तं विदुः ।

आज्यं हुत्वा होमावशिष्टं यदाज्यद्रव्यं उप समीपे पात्रान्तरे कल्पितं स्थापितं, तत् सम्पातं विदुः । आज्यं हुत्वा होमावशिष्टं यदाज्यं स्रुवेण बध्वा मस्तके स्रुष्टं, तदपि सम्पातं विदुः । तथाच चतुर्थीकर्म्मणि गोभिलसूत्रम् । "आहुतेराहुतेस्तु सम्पातमुदपात्रेऽवनयेत्"—इति । तथोत्तरविवाहे । "आहुतेराहुतेस्तु सम्पातं मूर्द्धनि बध्वा अवनयेत्"—इति ॥ ११२ ॥

स्थालीपाकाहृताऽन्यत्तु यत्र संज्ञा निपात्यते ॥ ११३ ॥
तत्राज्यभागौ हुत्वैव स्रुचमास्तीर्य्यावद्यति ।

इति गृह्यासंग्रहे प्रथमः प्रपाठकः ॥

यत्र यत्र गोभिलेन, "स्थालीपाकाहृतान्यत्"—इतीयं संज्ञा निपात्यते,—अयंशब्दः प्रयुज्यते इत्यर्थः । तत्राज्यभागौ हुत्वा स्रुचमास्तीर्य्य आज्येनोपस्तीर्य्य, अवद्यति अवदानं गृह्णाति । न पुनस्तत्रोपघातहोमः इत्यर्थः । यथा, श्रावण्यां प्रदोषे चरोर्बहुदैवतत्वेऽपि, 'स्थालीपाकाहृताऽन्यत्'—इति सूत्रणात् तत्रोपघातहोमो न भवति । एवमन्यत्राप्यनुसन्धेयम् ॥ ११३ ॥

इति महामहोपाध्यायराधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य ब्रह्ममयीसूनोः श्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गृह्यासंग्रहभाष्ये प्रथमः प्रपाठकः ॥ ० ॥

श्लोकाः—११३ ॥

# गृह्यासंग्रहः ।

द्वितीयः प्रपाठकः ।

यज्ञवास्तुकर्म्मणि गोभिलेन "तत एव वर्हिषः कुशमुष्टिमादाय"—इति सूत्रितम् । तत्र, 'तत एव वर्हिषः'—इत्येतदनुद्धिन्नपदार्थं वाक्यं व्याकुरुते,—

स्तृतेभ्यो न प्रचिन्वीयात् यातयामं स्तृतं स्मृतम् ।
स्तृतशेषात्ततो गृह्य यज्ञवास्तुक्रिया तथा ॥ १ ॥

यज्ञवास्त्वर्थं स्तृतेभ्यः कुशेभ्यः कुशं न चिनुयात् । कस्मात् ? यस्मात् स्तृतं वर्हिर्यातयामं निर्वीर्यं स्मृतमाचार्यैः । स्मरन्ति च ।

"स्तरणासनपिण्डेषु षट् कुशान् परिवर्जयेत्" ।

इति । यस्मादेवं, तस्मात् स्तृतशेषाद्वर्हिषः कुशमुष्टिं गृहीत्वा, तथा—गोभिलोक्तेन प्रकारेण, यज्ञवास्तुक्रिया कर्त्तव्या । स च प्रकारो गृह्यसूत्रादुपलब्धव्यः । अपरे पुनरेतद्विद्वांसः, स्तृतादेव वर्हिषः कुशमुष्टिमादाय यज्ञवास्तुक्रियां कुर्व्वन्ति । तदशास्त्रम् ॥१॥

यज्ञवास्तुक्रियां कृत्वा विधिदृष्टेन कर्म्मणा ।
आज्यधारामविच्छिन्नां जुहुयात् सार्व्वकामिकीम् ॥ २ ॥

विधिदृष्टेन कर्म्मणा यज्ञवास्तुक्रियां कृत्वा, अविच्छिन्नां सन्ततां

सार्व्वकामिकीं सर्व्वकामप्रदामाज्यधारां जुहुयात् । विधिदृष्टेन कर्म्मणा सार्व्वकामिकीमाज्यधारां जुहुयात्—इति वा वर्णनीयम् । तदनेन गोभिलानुक्ताऽपि पूर्णाहुतिर्विधीयते । कथं ज्ञायते ? सार्व्वकामिकीम्,—इतिवचनात् । "पूर्णाहुत्या सर्व्वान् कामानाप्नोति"—इति हि ब्राह्मणम् । सेयं पूर्णाहुतिः,—"वसुभ्यः स्वाहा,"—इति मन्त्रेण होतव्या,—इति दीक्षितभाष्यम् । "पूर्णहोमं यशसे जुहोमि"—इत्यादिमन्त्रेण,—इति भवदेवभट्टप्रभृतयः ॥ २ ॥

सायंप्रातर्वैश्वदेवे पित्र्यज्ञे तथैव च ।
कंबूके गोमये नित्यं व्रतानां समिधासु च ॥ ३ ॥
चैत्ये यूपे व्रीहियवे भूमावप्सु च याज्ञिकैः ।
व्याहृतीर्न प्रयोक्तव्या यज्ञवास्तुक्रिया तथा ॥ ४ ॥

सायंप्रातर्होमे, वैश्वदेवहोमे, पित्र्यज्ञे—अन्वष्टक्यकर्म्मणि पिण्डपित्र्यज्ञे च, कंबूके—"वृत्त्यविच्छित्तिकामः कंबूकान् सायंप्रातर्जुहुयात्"—इति सूत्रोक्ते कंबूकहोमे । कंबूकाश्च,—

"कंबूकाश्च कणाश्चैव फलीकरणकक्कुशाः" ।

इत्युक्तलक्षणाः । गोमये—"वृत्त्यविच्छित्तिकामो हरितगोमयान् सायंप्रातर्जुहुयात्"—इति सूत्रोक्ते गोमयहोमे, व्रतानां वेदव्रतानां समिधासु समिद्धोमेषु, ( हलन्तलक्षणः टाप्प्रत्ययः ) चैत्ये चितिकर्म्मणि, यूपे यूपकर्म्मणि, व्रीहियवे—नवयज्ञोक्ते, "वशङ्गमौ

ग्रङ्खेति पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत"—इत्यादिसूत्रोक्ते वा व्रीहियवहोमे, भूमौ—"वृक्ष इवेति पञ्चर्चः तस्मिन् प्रथमं पार्थिवं कर्म"—इति सूत्रोक्ते पार्थिवकर्मणि, भूम्यां होमे वा, अप्सु च—"पौर्णमास्यां रात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याचततण्डुलानृगन्तेभ्यासेन जुहुयात् स्वाहेत्युदके"—इति सूत्रोक्ते जलहोमे च, याज्ञिकैर्व्याहृतयो न प्रयोक्तव्याः, यज्ञवास्तुक्रियाऽप्येषु न कर्त्तव्या। व्याहृतीः,—इति च्छान्दसः पूर्वसवर्णो-द्रष्टव्यः ॥ ३ ॥ ४ ॥

चरवे योविधिः प्रोक्तः स यज्ञइति निश्चयः।
बलिन्तेभ्यो न कुर्व्वीतोपसिद्धार्थैर्बलीन् हरेत् ॥ ५ ॥

चरवे,—इति तादर्थ्ये चतुर्थी। सर्व्वथं यो विधिरुक्तः स खलु यज्ञे ज्ञातव्यः—इत्याचार्य्याणां निश्चयः। अतो बलिकर्म्मार्थं तान् विधीन् न कुर्व्वीत। बलये तान् न कुर्व्वीत,—इति वक्तव्ये, बलिन्तेभ्यो न कुर्व्वीत,—इति व्यत्यासेन प्रयुङ्क्ते। बलिकरणार्थं चरुर्न पक्तव्यः—इत्ययमत्र विवक्षितोऽर्थः। अतोयत्र कारणान्तरात् चरुः पच्यते, तत्र तस्मादपि बलिहरणमविरुद्धम्। तथा च गोभिलसूत्रम्। "सर्व्वस्य त्वेवान्नस्यैतान् बलीन् हरेत्—पित्रस्य वा स्वस्त्ययनस्य वा अर्थार्थस्य वा"—इति।

उप—समीपे महानसे सिद्धार्थैः सिद्धैरन्नैर्बलीन् हरेत्। होमशेषेणैव बलिहरणस्य कर्त्तव्यत्वात् वैश्वदेवहोमोऽप्यनेन व्याख्यातः। मनुरप्याह।

"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् ।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम्" ॥

इति । विश्वे देवाः सर्व्वे देवाः ते यस्य पाकस्य देवताः सोऽयं वैश्वदेवोऽहरहर्महानसे यत् पच्यते, तदुच्यते । "वैश्वदेवादन्नात् पर्य्युक्ष्य जुहोति"—इति च गृह्यान्तरम् । तथा कात्यायनः ।

"स्वशाखाविधिना हुत्वा तच्छेषेण बलिं हरेत्" ।

इति ॥ ५ ॥

यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत् ।
मन्त्राणामेव चादेशे मन्त्रात् कर्म्म समाचरेत् ॥ ६ ॥

यत्र मन्त्रा नोपपदिश्यन्ते, तत्र व्याहृतीर्वक्ष्यमाणलक्षणाः योजयेत्—अन्यत्र सायंप्रातर्वैश्वदेवहोमादिभ्यः इध्मादिभ्यश्च । मन्त्राणां पुनरुपदेशे मन्त्रात् कर्म्म कुर्य्यात्,—इत्यादरार्थमुक्तम् ॥ ६ ॥

भूरादयोव्याहृतयोवेदेभ्योनिःसृताः पुरा ।
महत्त्वं व्याहृतित्वञ्च प्राप्ताः स्वेनैव कर्म्मणा ॥ ७ ॥

भूर्भुवःस्वरिति तिस्रोव्याहृतयः, वेदेभ्यः—ऋग्यजुःसामलक्षणेभ्यः पूर्व्वं निर्गताः । ताः स्वस्वेताः स्वेनैव कर्म्मणा वक्ष्यमाणलक्षणेन महत्त्वं व्याहृतित्वञ्च प्राप्ताः । महतोभावोमहत्त्वम् । व्याहृतीनां भावो व्याहृतित्वम् ॥ ७ ॥

ओंकारजननात्तासां महत्त्वं परिभाष्यते ।
व्याहृता व्याहृतित्वञ्च तेन चैविदतां ययुः ॥ ८ ॥

ॐकारस्य जननात् तासां महत्त्वमाचार्य्यैरुच्यते । ताश्च वेदेभ्यो-

व्याहृताः सत्यः व्याहृतित्वं ययुः। तेनैव वेदत्रयेभ्योव्याहृतत्वेन हेतुना त्रैविद्यताच्च ययुः। त्रिवेदेषु भवास्त्रैविद्याः। तद्भावस्त्रैविद्यता। अथ वा। विद्या,—इति वेदमाचक्ष्महे। तिसृणां विद्यानां भावः त्रैविद्यम्। यस्माद्वेदत्रयेभ्यो व्याहृताः, तस्माद्वेदत्रयभावं ययुरित्यर्थः ॥ ८ ॥

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
अण्डं भित्त्वा विनिर्यातौ तेनैतौ मङ्गलावुभौ ॥ ९ ॥

ॐकारश्च अथशब्दश्च द्वावेतौ ब्रह्मणोऽण्डं भित्त्वा पूर्वं निर्गतौ। 'कण्डं भित्त्वा'—इति पाठे व्यक्त एवार्थः। तेनैतावुभौ मङ्गलजनकौ। आयुर्घृतमितिवत् तज्जनके तच्छब्दप्रयोगः। लिङ्गव्यत्ययश्छान्दसः। 'तेन माङ्गलिकावुभौ'—इति पाठे व्यक्तएवार्थः ॥ ९ ॥

अथैताः स्वव्याहृतयोऽयवीयस्यः पराः स्मृताः।
ऐरावतः प्रतिच्चेचे वेदान्तेष्वाश्रिताश्च याः ॥ १० ॥

अथ पूर्वोक्ता एताः स्वस्ववेदस्य व्याहृतयः अयवीयस्यः ज्येष्ठाः, पराः उत्कृष्टाः कथिताः। याश्च ऐरावतः प्रतिच्चेचे इरावतः स्थाने—( इराशब्दस्यादिवृद्धिः )—जहगाने,—इत्येतत्। वेदान्तेषु च आश्रिताः,—इति ता एव व्याहृतयः स्तूयन्ते।

एवं वा।

यन्नायन्नीयसाम्नो योनिभूता ऋक् यन्ना यन्ना वो अग्नये गिरा गिरा च चक्षसे इत्यादिका समाम्नायते। तत्र, "न गिरा

गिरेति ब्रूयात् यद्गिरा गिरेति ब्रूयादात्मानमेव तदुद्गाता गिरेत् ऐरं कृत्वोद्गेयम्,"—इति ब्राह्मणेन गिराशब्दं निषिध्य ऐरं कृत्वा गेयमित्युपदिष्टम् । तदुपदिष्टमैरमिति पदमत्र ऐरशब्देन निर्दिश्यते । ऐरं विद्यते अस्येत्यैरवान् । ऐरवानैवैरावान् । मत्वर्थीये परे पूर्वस्वरदीर्घश्छान्दसः । तदृयोगात् ग्रन्थोऽपि तथोच्यते ।

उदाहरणे उदाहरणम् । "भूः । भुवाः । सुवाः"—इति । वेदान्तेषु खल्वपि । "भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्ये"—इति ॥ १० ॥

**मध्ये स्थण्डिलमन्ते च वारिणा परिसंवृतम् ।**
**अविदासिनं ह्रदं विद्यात्तादृशं कर्म्मणो विदुः ॥११॥**

मध्ये स्थण्डिलं स्थलं, अन्ते च वारिणा परि सर्व्वतोभावेन संवृतं वेष्टितम् । एवम्भूतं ह्रदमविदासिनं जानीयात् । तादृशं ह्रदं कर्म्मणो विदुर्जानन्त्याचार्य्याः । कर्म्मणः,—इति सम्बन्धलक्षणा षष्ठी । तदनेन,—"पौर्णमास्यां रात्रावविदासिनि ह्रदे नाभिमात्रमवगाह्याचततरुलानृगल्लेष्वास्येन जुहुयात् स्वाहेत्युदके"—इति सूत्रोक्तः अविदासी ह्रदो व्याख्यातः ॥ ११ ॥

"अपवर्गेऽभिरूपभोजनं यथाशक्ति"—इति सूत्रोक्तमभिरूपं व्याकुरुते,—

**यत्र विद्या च वित्तञ्च सत्यं धर्म्मः शमोदमः ।**
**अभिरूपः स विज्ञेयः स्वाश्रमे योव्यवस्थितः ॥ १२ ॥**

वित्तम्—इति भावप्रधानो निर्देशः । ख्यातिर्विचारो वा तदर्थः ।

अथ वा। वित्तं धनमिति यथाश्रुत एवार्थः। वृत्तञ्च,—इति पाठे, वृत्तम्—

"गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः।
प्रवर्त्तनं हितानाञ्च तत् सर्व्वं वृत्तमुच्यते" ॥

इत्युक्तलक्षणम्। तत्र सत्यादीनां पुनरुपादानमादरार्थम्। शमो-बहिरिन्द्रियनिग्रहः। दमोऽन्तरिन्द्रियनिग्रहः। प्रसिद्धमन्यत्। यत्रैतानि विद्यन्ते, यश्च स्वाश्रमे—गृह्याकर्म्मकर्त्तुरात्मीयाश्रमे,—समानाश्रमे व्यवस्थितः,—गृहस्थः,—इति यावत्। सोऽयमभि-रूपो विज्ञेयः ॥ १२ ॥

**लौकिके लोकसामान्ये क्रव्यादाग्नौ हुता हुतम्।**
**याज्ञिकं पुण्यमायुष्यं कर्म्मणा नोपपद्यते ॥ १३ ॥**

सामान्यं साधारणमित्यनर्थान्तरम्। लोकसामान्ये—असंस्कृते इत्यर्थः। लौकिकस्याग्नेर्विशेषणमिदम्। तदयमर्थः। असंस्कृते लौकिके अग्नौ, क्रव्यादाग्नौ श्मशानाग्नौ च, हुतम् (भावे निष्ठा) होमः, हुता भवति। तदेव विवृणोति। आयुष्यम्—आयुषे हितम्, याज्ञिकम्—यज्ञोऽत्र पुण्यं तेन कर्म्मणा नोत्पद्यते—इति। सोऽयमसंस्कृते लौकिकाग्नौ होमे निन्दावादः। एतदभि-प्रायेणैव लोकसामान्ये इति लौकिकाग्नेर्विशेषणमुपात्तम्। अतएव संस्कृतं लौकिकमग्निमभिप्रेत्य तत्र होतुः फलवादं वक्ष्यति।

लौकिकस्याप्यग्नेः संस्कारात् परं न लौकिकत्वम्,—इत्य-

सङ्कल्पैषा कल्पना रघुनन्दनस्य । कस्मात् ? प्रमाणाभावात् । लोकसामान्ये इति विशेषणस्यार्थवत्त्वोपपत्तेश्च । तथात्वस्याभ्युपगमे च लौकिकेऽग्नौ होतुः फलवचनं न खल्वपि उपपद्यते । न खल्वसंस्कृते लौकिके अग्नौ होमं मन्यते भवान् । अपि चैवं सति, "अन्वष्टकास्वष्टकावदग्नौ हुत्वा"—इति विष्णुसूत्रे अग्नियहणात् पित्र्ययज्ञहोमस्य लौकिकाग्नौ निषेधाच्च अन्वष्टकायामनग्निमतां नाधिकारः,—इति स्वोक्तमपि व्याहन्येत । लौकिकस्याप्यग्नेः संस्कारात् परं लौकिकत्वाभावे तत्रैव होमस्योपपत्तेः कथमनग्निमतां तत्रानधिकारं ब्रवीति । तदास्तां तावदार्षवचनविरोधो यावत् स्ववचोव्याघातमपि नालोचयति भवान्,—इति किमत्र ब्रूमः । यथा चानग्निमतामप्यस्त्यधिकारोऽन्वष्टकायां तथा गृह्यभाष्येऽभिहितमस्माभिः ॥ १३ ॥

वैदिके लौकिके वाऽपि यज्जुहोति प्रयत्नतः ।
वैदिके ब्रह्मलोकः स्यात् लौकिके पापनाशनम् ॥१४॥

वैदिके लौकिके वा संस्कृते अग्नौ यज्जुहोति, तस्य फलवचनमुत्तरार्धम् ॥ १४ ॥

स्ववर्णाभिरनिन्द्याभिरक्षिरक्षतमिश्रितैः ।
स्नानं चतुर्भिः कलसैः स्त्रीभिः स्त्रीं यत्र प्लावनम् ॥१५॥

यत्र विवाहादौ स्त्रीभिः कर्त्रीभिः स्त्रीं कन्यां प्रति प्लावनं क्रियते, तत्र अनिन्दिताभिः स्ववर्णाभिः समानवर्णाभिः स्त्रीभिः—ब्राह्मण्याः ब्राह्मणीभिः, क्षत्रियायाः क्षत्रियाभिः, वैश्यायाः वैश्याभिरित्यर्थः ।

चतुर्भिः कलसैः, अक्षतमिश्रितैः ( लिङ्गव्यत्ययोऽत्र द्रष्टव्यः ) यवमिश्रिताभिरद्भिः स्नपनं कर्त्तव्यम् ॥ १५ ॥

**गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।**
**पाणिकर्म्मणि गौड़ी स्यात् सत्या माध्व्यधमा सुरा॥१६॥**

पाणिकर्म्मणि गौड़ी सुरा सत्या स्यात्, माध्वी पुनरधमा। पैष्टी मध्यमेत्यर्थादुक्तं भवति। श्लिष्टमन्यत्। सेयं विवाहे क्षत्रियाणामाचारप्राप्ता सुरा विशेषिता। केचित्तु, विवाहात् पूर्व्वं ज्ञातिकर्म्मणि "क्रीतकैर्यवैर्माषैर्वाऽऽप्लुतां सुहृत् सुरोत्तमेन सशरीरां त्रिर्मूर्द्ध्न्यभिषिञ्चेत्" इति सूत्रेण सुरोत्तमेन कन्यायाः योऽयमभिषेक उक्तः, स खल्वयं सुरयैवेति मन्यमानाः तत्सुराविवरणपरतया श्लोकमिमं वर्णयन्ति। तदसङ्गतम्। "सुरास्नानसमं तैलम्"—इति सुरास्नानस्य निन्दितत्वात्। अतएव वक्ष्यति,

"तस्मात् सुरोत्तमा ह्यापो अङ्गिरेवाभिषेचयेत्"।

इति ॥ १६ ॥

"नग्निका तु श्रेष्ठा"—इति सूत्रोक्तां नग्निकां व्याकुरुते,—

**नग्निकान्तु वदेत् कन्यां यावन्नर्त्तुमती भवेत्।**
**ऋतुमती त्वनग्निका तां प्रयच्छेत्त्वनग्निकाम् ॥ १७ ॥**

यावन्न ऋतुमती रजस्वला भवेत्, तावत् कन्यां नग्निकां वदेत्। ऋतुमती पुनरनग्निका भवति। तां कन्यामनग्निकामृतुमतीमपि दद्यात्। तुरप्यर्थोभिन्नक्रमेण योजनीयः। तदेवमनग्निका-

मपि दद्यात्, नग्निका पुनः श्रेष्ठा, न पुनरनग्निकायाविवाहएव न भवतीत्यभिप्रायः । मनुरपि,—

"काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्" ॥

इति स्मरन् ऋतुमत्या अपि विवाहनुजानाति । यानि पुनरनग्निकाविवाहनिन्दापराणि स्मृतिवचनानि, तेषामनग्निकायाः अप्राप्तरजस्के नग्निकायाः प्राप्तरजस्के च तात्पर्य्यम्, गोभिलीयव्यतिरिक्तविषयत्वं वा वर्णनीयम् ॥ १७ ॥

**अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी ।**
**अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका ॥१८॥**

रजसः,—इति सम्बन्धलक्षणा षष्ठी । रजः,—इति च ऋतुर्भण्यते । रजसा अप्राप्ता गौरी भवति ;—तां ददद् गौरीदानफलं लभते इत्यर्थः । एवमुत्तरत्रापि वर्णनीयम् । रजसि प्राप्ते रोहिणी । अनेनापि प्राप्तरजस्काया अपि विवाहं दर्शयति । व्यञ्जितं व्यञ्जनं ( भावे निष्ठा ) । व्यञ्जनं चिह्नमित्यनर्थान्तरम् । तच्चार्थादृयौवनस्य । न व्यञ्जितं यस्याः सेयमव्यञ्जिता—अनागतयौवनचिह्नेत्येतत् । कुचहीना नग्निकेत्यपरां नग्निकामाह ॥ १८ ॥

**व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम् ।**
**पयोधरैस्तु गन्धर्व्वा रजसाऽग्निः प्रकीर्त्तितः ॥ १९ ॥**

भुञ्जीत भुङ्क्ते। पयोधरैः समुत्पन्नैर्गन्धर्व्वा भुञ्जते। रजसा समुत्पन्नेनाग्निर्भोक्ता कथितः॥ १९॥

तस्मादव्यञ्जनोपेतामरजामपयोधराम्।
अभुक्ताञ्चैव सोमाद्यैः कन्यकान्तु प्रशस्यते॥ २०॥

अरजामरजस्काम्। तदीदृशीं कन्यकामभिप्रेत्य, प्रशस्यते (सकर्म्मकादपि भावे तिङ् छान्दसो) प्रशंसा क्रियते, आचार्य्येण,—इति वाक्यशेषः। तथा च गोभिलसूत्रम्। "नग्निका तु श्रेष्ठा"—इति। श्लिष्टमन्यत्॥ २०॥

विवाहे स्त्रीलक्षणविदोऽलाभे नव पिण्डान् कृत्वा स्त्रीलक्षणं परीक्षितव्यमित्याचार्य्येणोक्तम्। तथा च गोभिलसूत्रम्। "तदलाभे पिण्डान्"। "वेद्याः सीताया ह्रदान्नोष्णाच्चतुष्पथादादेवनादादहनादीरिणात्"। "सर्व्वेभ्यः सभार्य्यं नवमम्"—इति। "पूर्व्वेषां चतुर्णां गृह्णन्तीमुपयच्छेत्"—इति "सभार्य्यमपि त्वेके"—इति च। तत्र, वेदिपिण्डादिग्रहणे फलार्थवादमाह,—

वेदिपिण्डात् क्रियावती सीतायाः फलते कृषिः।
अक्षोभ्या च ह्रदे ज्ञेया गोष्ठे भवति गोमती॥ २१॥
चतुष्पथे प्रकीर्णा स्यात् द्यूतस्थाने कलिप्रिया।
श्मशाने म्रियते भर्त्ता बन्ध्या भवति चोषरे॥ २२॥
नवमे सर्व्वएवैते कन्यायाः परिगृह्यन्ते।

वेदिपिण्डात् गृहीतात् क्रियावती भवति। सीतापिण्डात् गृही-

तात् कृषिः फलते,—कृषिभूयिष्ठा भवतीत्यर्थः । सीता कृष्टक्षेत्रम् । कृदपिण्डे गृहीते अक्षोभणीया ज्ञातव्या । गोष्ठपिण्डे गृहीते गोमती भवति । चतुष्पथपिण्डे गृहीते प्रकीर्णा विक्षिप्ता—इतश्चेतश्च गमनशीलेत्येतत् । द्यूतस्थानपिण्डे गृहीते कलहप्रिया भवति । कलिः कलहः । श्मशानपिण्डे गृहीते भर्त्ता म्रियते—विधवा भवतीत्यर्थः । ऊषरपिण्डे गृहीते बन्ध्या भवति । नवमपिण्डे गृहीते कन्यायाः सर्व्वएवैते पूर्व्वोक्ताः फलवादाः परिगृह्यन्ते । किं कारणम् ? नवमस्य सर्व्वघटितत्वात् । तस्मात् नवमं पिण्डमाददानामिच्छयोपयच्छेद्दा, न वोपयच्छेदित्यभिप्रायः । अतएव गोभिलेनोक्तम् । "सम्भार्य्यमपि त्वेके"—इति । शाखान्तरेऽप्येवमेव प्रायः फलवादाः पठ्यन्ते । परन्तु तत्र क्रियावत्त्वादयोऽपत्यगताः श्रूयन्ते । तथा चोक्तम् ।

"गृह्णाना वेदिपिण्डञ्च प्रसूते याज्ञिकान् सुतान् ।
सीतापिण्डन्तु गृह्णाना सुतान् सूते कृषीबलान् ॥
सर्व्वकामसमृद्धांश्च तृतीयस्य परिग्रहात् ।
गोष्ठपिण्डग्रहाच्चापि गोमिनः सुखिनस्तथा ॥
इतश्चेतश्च गन्तारः पञ्चमेनास्थिता सुताः ।
षष्ठेन तु गृहीतेन भवन्ति द्यूतसेविनः ॥
श्मशानपिण्डग्रहणाद्विधवा जायते ध्रुवम् ।
बन्ध्या वा विधवा वा स्यादष्टमग्रहणादपि ॥
मिश्रमेतद्भवेत् सर्व्वं यतः पूर्व्वोदितं फलम् ।
नवमस्य ग्रहस्तस्मात् शुभो वा यदि वाऽशुभः" ।

इति ॥ २२ ॥

**पाणिग्रहणमन्त्रैस्तु नियतं दारलक्षणम् ॥ २३ ॥**

पाणिग्रहणमन्त्राः गृह्योक्ताः गृभ्णामि ते—इत्यादयः। तृतीया चेयं प्रकृत्यादित्वादभेदे द्रष्टव्या। पाणिग्रहणमन्त्राः निश्चितं दारलक्षणमित्यर्थः। तथाच मनुः।

"पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे"।

इति ॥ २३ ॥

**विवाहे यो विधिः प्रोक्तो मन्त्रा दाम्पत्यवाचकाः।**
**वरस्तु तान् जपेत् सर्व्वान् ऋत्विग्राजन्यवैश्ययोः॥२४॥**

विवाहे योविधिरनिर्दिष्टकर्त्तृकः,—"प्रोक्ते नक्षत्रे षड़ाज्याहुतीर्जुहोति"—इत्यादिक आचार्य्येणोक्तः, तान् वरः कुर्य्यात्। अपरआह। 'विवाहे योविधिरग्निस्थापनादिः प्रोक्तः, तं विधिं वरः कुर्य्यात्'—इति। ये च दाम्पत्यवाचकामन्त्राः, तान् वरोजपेत्। एवं वा—

विवाहे योविधिराचार्य्येणोक्तः, तत्र दाम्पत्यवाचका ये मन्त्राः, तान् सर्व्वान् वरो जपेत्। क्षत्रियवैश्ययोः पुनस्तान् मन्त्रान् ऋत्विक् जपेत्। तस्मात्,—"अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति तथेतरां समञ्जन्त्वित्येतयर्चा"—इति सूत्रे 'औदकएव मन्त्रं पठति'—इति सरलावर्णनमसङ्गतम् ॥ २४ ॥

"अथ जन्यानामेकोध्रुवाणामपां कलसं पूरयित्वा"—इत्यादि-सूत्रोक्ता ध्रुवा अपो व्याकुरुते,—

महानदीषु या आपः कौप्यान्याश्च ह्रदेषु च ।
गन्धवर्णरसैर्युक्ता ध्रुवास्ता इति निश्चयः ॥ २५ ॥

महानदीषु गङ्गाद्यासु या आपः, याश्च कूपोद्भवाभ्योऽन्यास्तड़ागादिसम्भवा आपः, ह्रदेषु अगाधजलेषु या आपः, ता इमाः शोभनगन्धवर्णरसैर्युक्ताः सर्व्वा अप्यापः ध्रुवाः,—इत्ययमाचार्य्यस्य निश्चयः । अन्ये तु वर्णयन्ति,—'कूपे या आपः, अन्याश्च तड़ागादिषु या आपः',—इति । तेषाम्—'कौप्यान्याः'—इति विसर्गलोपे सन्धिरार्षः द्रष्टव्यः ॥ २५ ॥

"अथ जन्यानामेकोध्रुवाणामपां कलसं पूरयित्वा सहोदकुम्भः प्राङ्मुतो वाग्यतोऽग्नेरग्निं परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते"—इति सूत्रोक्तमुदकुम्भधारिणोऽवस्थानं विशिनष्टि,—

गन्धमाल्यैरलङ्कृत्य सकुम्भो वाग्यतः शुचिः ।
धारयेत् त्रिषु वर्णेषु प्राङ्मुतांसो द्विजोत्तमः ॥ २६ ॥

गन्धमाल्यैरुदकुम्भमलङ्कृत्य सकुम्भो नियमितवचनः शुचिः, प्राङ्मुतांसः—प्राङ्मुतौ अंसौ यस्य सोऽयं प्राङ्मुतांसो वस्त्राच्छादितस्कन्धद्वयः—इत्येतत् । द्विजोत्तमः—उत्तमो द्विजः, त्रिषु वर्णेषु धारयेत्—ध्रुवा अपः,—इत्यर्थः ॥ २६ ॥

यदा निष्क्रामयेत् कन्यां वरः पाणिं जिघृक्षयन् ।
अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं पदं व्रजेत् ॥ २७ ॥

यदा पाणिं ग्रहीष्यन् वरः कन्यां गृहान्निष्क्रामयेत्, तदा सा कन्या अग्निं प्रदक्षिणं कृत्वा कटस्तीर्णं कटविशिष्टं स्तरणयुक्तं पदं स्थानं व्रजेत्। एतदनेनोक्तं भवति। गच्छन्ती कन्या अग्निं प्रदक्षिणं कृत्वा कटमास्तृतकुशपर्य्यन्तं नयेत्,--इति। तथाच गोभिलसूत्रम्। "वर्हिषोऽन्तं कटान्तं प्रापयेत्"--इति। अथवा। पदं कटस्तीर्णं कृत्वा--कटे पदं संस्थाप्य व्रजेदित्यर्थः॥ २७॥

पदा प्रपद्य पन्थानं पतियानं संजपेद्वधूः।
वरो वाऽत्र जपेन्मन्त्रमाकटान्तादिति स्थितिः॥२८॥

पदा चरणेन प्रपद्य प्राप्य, कटमित्यर्थात्। बधूश्चरणेन कटप्राप्तेरनन्तरं पदा कटं प्रवर्त्तयन्तीत्येतत्। पन्थानं पतियानं—पथिलिङ्गं प्रमे पतियानः,—इति मन्त्रं संजपेत्। अजपन्त्यां बध्वां वरो वा अत्र मन्त्रं जपेत्। आकटान्तात्—कटस्य वर्हिरन्तप्राप्तिपर्य्यन्तम्—"वर्हिषोऽन्तं कटान्तं प्रापयेत्"—इतिसूत्रोक्तकर्म्मपर्य्यन्तं जपेदित्येषा स्थितिः शास्त्रमर्य्यादा॥ २८॥

लाजानाज्यं स्रुवं कुम्भं प्राजनाश्मानमेवच।
प्रदक्षिणानि कुर्व्वीत दम्पती तु विना ग्रही॥२९॥

"हुते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयति"—इतिसूत्रोक्ताग्निप्रदक्षिणकाले दम्पती लाजादीनामपि प्रदक्षिणं कुर्व्वीत—कुर्य्याताम्। क्वचित्तथैव पाठः। ग्रही विना। 'अन्यतोऽपिच'—इति ग्रहेरिः। ग्रही इति द्वितीयाद्विवचनान्तं पदम्। उदकग्राहं प्राजग्राहञ्च विनेत्यर्थः। तुशब्दः पुनरर्थः। रघुनन्दनेन

तु चतुर्थचरणमाकुलीकृत्य पठितम्—'दम्पती न विनाऽग्निकम्" —इति । तदनाकरम् ॥ २९ ॥

तदेतत् सुव्यक्तमाह,—

प्राजग्राहमुदग्राहं ब्रह्माणमृत्विजं तथा ।
एतानि वाच्यतः कृत्वा शेषाणान्तु प्रदक्षिणम् ॥ ३० ॥

प्राजनग्राहमुदकग्राहं ब्रह्माणमृत्विजञ्च, एतानि—( सामान्यविवक्षया व्यत्ययाद्वा नपुंसकनिर्देशः ) एतान् वाच्यतः कृत्वा, शेषाणां लाजादीनां प्रदक्षिणं कुर्य्यातां ॥ ३० ॥

प्राजग्राहादीनां वाच्यतः करणे हेतुमाह,—

दक्षिणां दिशमास्थाय यमो मृत्युश्च तिष्ठतः ।
तयोस्तु रक्षणार्थाय तस्माद् ब्रह्मा बहिर्भवेत् ॥ ३१ ॥

यस्मात् दक्षिणां दिशमाश्रित्य यमोमृत्युश्च तिष्ठतः, तस्मात् तयोर्वरबध्वोः रक्षणार्थाय ब्रह्मा बहिर्भवेत् । तुशब्दश्चशब्दार्थः समुच्चये भिन्नक्रमेण योजनीयः । ब्रह्मा च बहिर्भवेत्,—इति । स खल्वयं प्राजग्राहादीन् समुच्चिनोति ॥ ३१ ॥

अथेदानीं लाजहोममधिकृत्याह,—

सोमः प्रकृतिरेखा हि लाजानाश्रित्य तिष्ठति ।
विरुद्धमाज्यं सोमेन नाभिघारणमर्हति ॥ ३२ ॥

सोमः चन्द्रः, प्रकृतिरेखा सोमदैवत्या लाजानाश्रित्य तिष्ठति, आज्यञ्च सोमेन विरुद्धम्, तस्मात् न अभिघारणमर्हति लाजः ॥३२॥

कथन्तर्हि गोभिलेन,—"तं सोपस्तीर्णाभिघारितम्"—इत्यादि-सूत्रेण लाजानामुपस्तरणमभिघारणञ्चोक्तम् ? तत्राह,—

शमीपलाशमिश्राणां लाजानामभिघारणम्।
पूर्व्वाणां घृतमिश्राणामाचार्य्यैः कल्पितं तथा ॥३३॥

शमीपलाशमिश्राणाम्—शमीपत्रमिश्राणाम्, घृतमिश्राणां वा। "खादिरे बध्नाति पालाशे बध्नाति रोहितके बध्नाति"—इतिवत् विकल्पोऽत्र द्रष्टव्यः। तदेवम्भूतानां पूर्व्वाणाम्—पूर्व्वमासादितानां लाजानामभिघारणं करणीयम्। अतएव 'आचार्य्यैः' गोभिलैः, 'तथा' शमीपलाशमिश्राणामेव लाजानामासादनं तेषामेव चाभिघारणं कल्पितम्। तथाच गोभिलसूत्रम्। "शमीपलाशमिश्रांश्च लाजांश्चतुरञ्जलिमात्रान् सूर्पेणोपसादयन्ति पश्चादग्नेः"—इति। "सकृत् संगृहीतं लाजानामञ्जलिं भ्राता बध्नञ्जलावावपति"—इति। "तं सोपस्तीर्णाभिघारितमग्नौ जुहोति"—इति च। तस्मात्, केवलानां लाजानां नास्त्यभिघारणार्हता, किन्तु शमीपलाशमिश्राणां घृतमिश्राणां वा पूर्व्वमासादितानामित्यभिप्रायः। अपर आह। शमीपलाशमिश्राणां घृतमिश्राणाञ्च लाजानामासादनम्, घृतमिश्राणामासादनादेव आचार्य्यैरभिघारणं कल्पितम्, न पुनः परमार्थतोऽभिघारणमत्रास्ति,—इति ॥ ३३ ॥

तथा लाजाञ्जलिर्बध्वा हूयतेऽङ्गुलिपर्व्वभिः।
एवं लाजहविःशेषं होतव्यं सूर्पजिह्वया ॥ ३४ ॥

तथा—गोभिलोक्तप्रकारेण, अङ्गुलिपर्व्वभिर्लाजाञ्जलिर्बध्वा हूयते।

एवं लाजहविःशेषं सूर्यजिह्वया होतव्यम् । गोभिलोक्तप्रकारश्च गृह्यसूत्रादुपलब्धव्यः ॥ ३४ ॥

**अवसिक्तन्तु विधिना पाणिग्राहन्तु प्राजनी ।**
**रक्षणार्थमनुगच्छेत् सप्ताहं चाहमेव वा ॥ ३५ ॥**

विधिना—"अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्द्धदेशेऽवसिञ्चति तथेतराम्"—इत्यादिसूत्रोक्तप्रकारेण, उदकग्राहिणा अवसिक्तं पाणिग्राहं वरम्, तुशब्दात् बधूञ्च, सप्ताहं अहमेव वा प्राजनी अनुगच्छेत् । अथवा । तुशब्दो यथाश्रुतार्थएव बधूव्यवच्छेदार्थो वर्णनीयः । एकस्य प्राजनिनो द्वयोरनुगमनासम्भवात् । पाणिग्राहस्य प्रयोजनवशाद्बहिर्गमनस्य सम्भवेन तदनुगमनवर्णनस्यैवौचित्यप्राप्तेश्च । त्वाहमेव च,—इति पाठेऽप्ययमेवार्थो वर्णनीयः । किमर्थमनुगच्छेत् ? रक्षणार्थम् । तदनेन, "प्राजनेनान्यः"—इति सूत्रोपदिष्टस्य प्राजनिनो विनियोगो दर्शितः ॥ ३५ ॥

**ब्राह्मप्राजापत्यार्षदैवगान्धर्वासुराणां याज्ञिकैः ।**
**पूर्वं होमविधिः प्रोक्तः पश्चात् परिणयः स्मृतः ॥३६॥**

ब्राह्मादयः शब्दाः विवाहविशेषाणां वाचकाः । तथाच मनुः ।

"चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् ।
अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत ॥

---

* ब्राह्मप्राजापत्यार्षदैव'—इत्ययमेव पाठः संस्कृतकारैर्धृतः । आदर्शपुस्तके तु,—'ब्राह्मणार्षदैव'—इति पाठो दृश्यते ।

ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" ॥

इति। लक्षणममीषामन्यत्रानुसन्धेयम्। ब्राह्मादैवार्षप्राजापत्यविवाहेषु, प्रथमं लाजहोमविधिरुक्तः, पश्चात् परिणयः—अग्नेः परितोनयनमुक्तं याज्ञिकैः। तथाच गोभिलसूत्रम्। "हुते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयति"—इत्यादि। ब्राह्मणार्षस्य,—इति पाठेऽपि ब्रह्मणोऽयं ब्राह्मणः—ब्राह्मः इत्येतत्। तस्यार्षस्य चेति पूर्वोक्त एवार्थः ॥ २६ ॥

गान्धर्व्वासुरपैशाचा विवाहा राक्षसाश्च ये।
तेषां परिणयः पूर्व्वं पश्चाद्धोमो विधीयते ॥ २७ ॥

गान्धर्व्वादिषु विवाहेषु पूर्व्वमग्नेः परिणयनं पश्चाल्लाजहोमोविधीयते अस्माभिः। स खल्वयमाचार्य्यानुपदिष्टोविशेषः आचार्य्यपुत्रेणोपदिष्टः। आचार्य्यस्तु प्रशस्तान् विवाहानभिप्रेत्य होमानन्तरं परिणयनं सूत्रयाञ्चकार,—इति श्लिष्यते। तथाच स्मरणम्।

"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयोविदुः"।

इति। कश्चित् पुनर्ब्राह्मादिशब्दानां विवाहनामत्वमविद्वानिवान्यथेमं ग्रन्थं वर्णयाञ्चकार,—'ब्राह्मस्यार्षस्य'—इत्यादिम्। 'ब्राह्मणस्य ऋषेर्दैवस्य प्रजापतेर्विवाहे पूर्व्वं लाजहोमः, पश्चादग्नेः परितोनयनम्। गन्धर्व्वासुरपिशाचानां विवाहे, राक्षसानां रावणादीनाञ्च विवाहे, पूर्व्वं परिणयः पश्चाल्लाजहोमः'—इति। तदश्रद्धेयम् ॥ २७ ॥

अथेदानीम्—"तत्रैनां सकेशनखामभ्यज्य क्षासयित्वाऽऽप्लावयन्ति" —इतिसूत्रोक्तं क्षासनं व्याकुरुते,—

उद्वर्त्तनं नखच्छेदोरोमच्छेदनमेवच ।
स्नंसनं मेखलायाश्च क्षासनानि विदुर्बुधाः ॥ ३८॥

उद्वर्त्तनं—कल्केन शरीरादाज्यादीनामपनयनम् । मेखलायाः काञ्च्याः स्नंसनम्—अधःपातनम् । प्रसिद्धमन्यत् । एतानि क्षासनानि जानन्ति पण्डिताः ॥ ३८ ॥

चूड़ाकर्म्मणि सीमन्ते यश्च पाकः सदा गृहे ।
विवाहे चैव लाजानां नोक्तो निर्व्वपणो विधिः ॥३९॥

चूड़ाकर्म्मणि,—"आनड्डहोगोमयः क्षसरः स्थालीपाकोद्वयापक्व-इत्युत्तरतः"—इतिसूत्रोक्तोयः स्थालीपाकः, यश्च सीमन्तकरणे,— "क्षसरः स्थालीपाकउत्तरघृतस्तमवेक्षयेत्"—इति सूत्रोक्तः स्थाली-पाकः, यश्च सर्व्वदा भोजनाद्यर्थं गृहे पाकः, यश्च विवाहे लाजानां पाकः, तेष्वेतेषु निर्व्वपणोविधिः—( निर्व्वपणः—इति अणन्तत्वेपि वृद्धेरभावश्छान्दसः । )—निर्व्वपणसंबन्धी विधिः, निर्वपणरूपोवा विधिः,—'अमुष्मै त्वा जुष्टं निर्व्वपामि'—इत्येवंरूपः, आचार्य्यै-र्नोक्तः ॥ ३९ ॥

दक्षिणाकपर्दाः शिष्टा आत्रेयास्त्विकर्द्दिनः ।
आङ्गिरसः पञ्चचूड़ा मुण्डा भृगोः शिखिनोऽन्ये ॥४०॥

'शिष्टाः कौण्डिन्यादयः'—इति दीक्षितभाष्यम् । दक्षिणस्यां कपर्दोयेषां तद्रूपे दक्षिणाकपर्दाः भवन्ति । कपर्दोजटा शिखेत्य-

नर्थान्तरम्। मस्तक-दक्षिणभागे शिखिनोभवन्त्यमी,—इत्यर्थः। अपरे पुनरेतदविद्वांसोभासन्ते,—'शिष्टाः कौण्डिन्यादयोविवाहे त्रीन् कपर्दान् प्रयच्छन्ति दक्षिणाः'—इति। आत्रेयास्त्रिकपर्दिनोभवन्ति। आङ्गिरसः पञ्चचूड़ाः—पञ्चशिखाभवन्ति। भृगोर्वंशजाताः—भार्गवाः, मुण्डितशिरसोभवन्ति। उक्तेभ्योऽन्ये, शिखिनः—अनियतशिखाः भवन्तीत्यर्थः। एतदपि,—

"वाशिष्ठाः पञ्चचूड़ाः स्युस्त्रिचूड़ाः कौण्डपायिनः"।

इत्यादिविशेषविधिव्यतिरिक्तविषयं द्रष्टव्यम्। कौथुमराणायनादीनामपि सशिखमेव वपनं गृह्यसूत्रभाष्ये समर्थितमस्माभिः। तदनेन,—"उदग्गनेरुत्सृप्य कुशलोकारयन्ति यथागोत्रकुलकल्पम्"—इति सूत्रोक्तोगोत्रकुलकल्पोव्याख्यातः॥ ४०॥

सर्व्वयज्ञेषु विप्राणामङ्गिः पूर्व्वं प्रवर्त्तते।
तस्मात् सुरोत्तमाह्यापो अङ्गिरेवाभिषेचयेत्॥ ४१॥

सर्व्वकर्म्मसु विप्राणां प्रथममङ्गिः क्रिया प्रवर्त्तते। तस्मात् कारणात्—आपएव सुरोत्तमाः। अतः, अङ्गिरेव कन्यामभिषेचयेत्। तदनेन—"सुहृत् सुरोत्तमेन सशरीरां त्रिर्मूर्द्धन्यभिषिञ्चेत्"—इति सूत्रस्थं सुरोत्तमपदं व्याख्यातम्। अङ्गिरित्यकारलोपाभावश्छान्दसः। आह। कस्मात् पुनः कारणादापः सुरोत्तमाः उच्यन्ते? उच्यते। नैघण्टुककाण्डे तावत् 'सुरा'—इत्युदकनामसु पठितम्। तच्च तच्च पञ्चविंशतितमं नाम। तस्मादुत्तममुदकमेव सुरोत्तमशब्दस्यार्थः॥ ४१॥

ब्रह्मचारी व्रतादेशे व्रतनाम प्रवाचयेत् ।
चरिष्ये यावदन्ताय सावित्रे चान्तकीर्त्तनम् ॥ ४२ ॥

"अग्ने व्रतपते इति हुत्वा"—इति सूत्रोक्ते व्रतादेशे । अथवा । व्रतस्यादेशोयत्र तस्मिन्, व्रतादेशे,—'अग्ने व्रतपते व्रतं चरिष्यामि'—इत्यादिमन्त्रपञ्चके,—इत्येतत् । ब्रह्मचारी व्रतस्य नाम प्रवाचयेत्—प्रकथयेत् । यावदन्ताय व्रताचरणं तस्यान्तस्यापि कीर्त्तनं कुर्य्यात् । व्रतादेशशब्दात्,—"समिधमाधेहि"—इत्यादि सूत्रोक्तं व्रतानामादेशं मा प्रशाङ्क्षीदिति 'सावित्रे च'—इत्याह । सावित्रे व्रते—सहप्रवचनीयापरनामधेये, उपनयनव्रते—इत्येतत् । तस्य सावित्राध्ययनार्थत्वात् सावित्रत्वम् । च-शब्दादनुप्रवचनीये च गोदानादौ । तत्रोदाहरणम् । 'अग्ने व्रतपते व्रतं चरिष्यामि,—इत्येवमादयः पञ्च मन्त्राः पठ्यमानमन्त्रकाण्डे समाम्नायन्ते । तत्र च, अग्ने व्रतपते व्रतं सावित्रं अष्टवर्षं अष्टमासं अष्टदिनं वा चरिष्यामि,—इति ब्रूयात् । एवमपरेष्वपि मन्त्रेषु ऊहनीयम् । एवं गोदानादिव्रतेष्वप्यूहनीयम् ॥ ४२ ॥

समामासाअहोरात्रास्तुल्याब्राह्मणचोदिताः ।
सावित्रमष्टभिर्वर्षैः कार्य्यं मासैर्दिनैश्च वा ॥ ४३ ॥

समाः—संवत्सराः, मासाः, अहोरात्राश्च, ब्राह्मणेन तुल्याः कथिताः । अतः सावित्रं व्रतमष्टभिर्वर्षैरष्टभिर्मासैरष्टभिर्दिनैरपिवा करणीयम् । अयमर्थः । आचार्य्येण,—"गर्भाष्टमेषु ब्राह्मणमुपनयेत्"—इति गर्भाष्टमे उपनयनं सूत्रयित्वा, "अथातः षोड़शे

वर्षे गोदानम्"—इति षोड़शवर्षे गोदानस्य स्मरणात् अष्टौ वर्षाः सावित्रव्रतस्य कालाः लभ्यन्ते। ब्राह्मणेन तु समामासाहोरात्राणां तुल्यत्ववचनात् अष्टौ मासाः अष्टौ दिनान्यपि तस्य कालः,—इति निर्णीयते। तस्मात्,—"आषोड़शाद् ब्राह्मणस्यानतीतः कालोभवति"—इत्येतस्मिन्नपि कल्पे, अन्ततोऽष्टौ दिनान्यपि सावित्रव्रतमाचरणीयम्,—इति सिद्धम्। तथा च ब्राह्मणम्। "योवै मासः स संवत्सरः"—इति। "आदित्योवा सर्व्वऋतवः, स यदैवोदेत्यथ वसन्तो, यदा सङ्गवोऽथ ग्रीष्मो, यदा मध्यन्दिनोऽथ वर्षा, यदाऽपराह्णोऽथ शरत्, यदाऽस्तमेत्यथ हेमन्तशिशिरौ"—इति च। अत्र खलु "सर्व्वान् ऋतून् अहनि सम्पादयति, सर्व्वे च ऋतवः संवत्सरः, तस्मात् अहः संवत्सरशब्देनोच्यते"—इति पूर्व्वमीमांसाभाष्ये शवरस्वामिनः। केचित् पुनरेतदविद्वांसः,—"द्वादश वै रात्रयः संवत्सरस्य प्रतिमा" इति ब्राह्मणवाक्यमिहोदाहरन्ति। तदसङ्गतम्। कस्मात्? तत्र संवत्सरशब्दस्य साक्षात् प्रतिमाशब्देन संयोगात्। एतच्च षष्ठाध्याये प्रपञ्चितं, तत्रैव द्रष्टव्यम्। अलमिह ग्रन्थगौरवेण ॥ ४३ ॥

सावित्रं यावदन्ताय धार्य्यं सर्व्वाश्रमस्थितैः।
चूड़ाकरणधर्म्मेण गोदाने चास्य वापनम् ॥ ४४ ॥

सर्व्वैराश्रमस्थितैः—प्रस्तावात् ब्रह्मचर्य्याश्रमस्थितैः सर्व्वैरित्यर्थः। यावदन्ताय सावित्रं व्रतं धार्य्यम्—इत्यादरार्थमुक्तम्। तेन, गोदानादिव्रतान्तराणां यथावदनुष्ठानासम्भवेऽपि, सावित्रव्रत-

मवश्यमनुष्ठेयमिति सिध्यति । अपरआह । 'सर्व्वाश्रमस्थितैः—सर्व्वेषां ; ब्रह्मचारि-गृहस्थ-वानप्रस्थ-यतीनामाश्रमस्थितैर्विप्रैः, सावित्रम्—सवितुरिदं मन्त्रं ; सावित्रया अभिमन्त्रितं यज्ञोपवीतं धार्य्यम्, यावदन्ताय मरणपर्य्यन्तम्'—इति । अनयोर्युक्तायुक्तत्वे सूरिभिरुन्नेये । मम तु, 'पूर्व्वाश्रमस्थितैः'—इत्येव पाठः प्रतिभाति । गोदाने गोदानाङ्गकेशान्तकरणे चूड़ाकरणोक्त-प्रकारेण अस्य ब्रह्मचारिणोवापनं करणीयम् । तथा च गोदानोपक्रमे गोभिलसूत्रम् । "चड़ाकरणेन केशान्तकरणं व्याख्यातम्"—इति ॥ ४४ ॥

विप्राणामग्निराचार्य्य इन्द्रस्त्राता व्रते व्रते ।
तस्मात् सर्व्वव्रतान्तेषु चरुरैन्द्रोविधीयते ॥ ४५ ॥

यस्मात् अग्निर्विप्राणामाचार्य्यः, इन्द्रश्च सर्व्वेषु व्रतेषु पालनकर्त्ता, तस्मात् कारणात् सर्व्वव्रतान्तेष्वैन्द्रश्चरुः क्रियते । सखल्वयमनुप्रवचनीयव्रतान्तेषु विधिर्द्रष्टव्यः । सहप्रवचनीयापरनामधेयस्योपनयनव्रतस्यान्ते तु सावित्रएव चरुर्भवति । तथा च गोभिलसूत्रम् । "ऐन्द्रः स्थालीपाकस्तस्य जुहुयाट्टचं साम यजामहइत्येतयर्च्चा सदसस्पतिमद्भुतमितिचोभाभ्यां वा" "अनुप्रवचनीयेष्वेवं सर्व्वत्र"—इति । "तस्यान्ते सावित्रश्चरुः"—इति च ॥४५॥

अजिनं सर्व्वदैवत्यमैन्द्रोदण्डइति स्मृतः ।
सावित्रीं मेखलामाहुस्तस्मात् सर्व्वाणि धारयेत् ॥ ४६ ॥

यस्मात्,—"ऐणेयरौरववास्तान्यजिनानि"—इति सूत्रोक्तमजिनं

सर्व्वदैवत्यं, "पार्णवैल्वाश्वत्थादण्डाः"—इति सूत्रोक्तोदण्डइन्द्र-दैवत्य इत्याचार्य्यैः स्मृतः; "मुञ्जकाशतास्वल्योरशनाः"—इति सूत्रोक्तां मेखलां सावित्रीम्—सवितृदेवताकामाहुराचार्य्याः, तस्मात् कारणात् सर्व्वाण्येतानि धारयेत्—ब्रह्मचारी। तथा च गोभिलसूत्रम्। "मेखलाधारण भैक्षचर्य्य-दण्डधारण समिदा-धानोदकोपस्पर्शन-प्रातरभिवादाइत्येते नित्यधर्म्माः"—इति। मनुरपि,—

"यद् यस्य विहितं चर्म्म यत् सूत्रं या च मेखला।
योदण्डोयच्च वसनं तत्तदस्य व्रतेष्वपि" ॥

इति स्मरति ॥ ४६ ॥

## मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
## अप्सु प्रास्येद्विनष्टानि गृहीत्वाऽन्यानि मन्त्रतः ॥ ४७ ॥

विनष्टानि मेखलादीनि अप्सु उदके प्रास्यत् प्रक्षिपेत्। किं कृत्वा? अन्यानि मेखलादीनि मन्त्रेण गृहीत्वा। तत्र, मेखला-दण्डमन्त्रौ गृह्यसूत्रोक्तौ। 'अजिनमन्त्रश्च स्वशाखायामभावात्,—"मित्रस्य चर्षणीधृतः"—इति तैत्तिरीयशाखापरिपठितो-द्रष्टव्यः। उपवीतमन्त्रोऽपि—( "यज्ञोपवीतमसि"—इति ) शाखान्तरादुपादेयः'—इति भट्टनारायणोपाध्यायाः। उपवीते विशेषं वक्ष्यति। कमण्डलुमन्त्रोऽप्यनुसन्धेयः ॥ ४७ ॥

अथेदानीम्—"यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा"—इत्यादिसूत्रोक्तं यज्ञोपवीतं व्याकरोति,—

यज्ञोपवीतं कुर्व्वीत सूत्रेण नवतान्तवम् ।
देवतास्तत्र वक्ष्यामि आनुपूर्व्वेण याः स्मृताः ॥ ४८ ॥

सूत्रेण यज्ञोपवीतं कुर्व्वीत । कीदृशम् ? नवतान्तवम् । नवतन्तुघटितमित्यर्थः । तत्र—तेषु तन्तुषु, आनुपूर्व्येण—क्रमेण, या देवता आचार्य्यैः स्मृताः, ता अहं वक्ष्यामि ॥ ४८ ॥

ओंकारः प्रथमस्तन्तुर्द्वितीयश्चाग्निदैवतः ।
तृतीयोनागदैवत्यश्चतुर्थः सोमदैवतः ॥ ४९ ॥
पञ्चमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः ।
सप्तमो वासुदैवत्यो अष्टमो यमदैवतः ॥ ५० ॥
नवमः सर्व्वदैवत्यइत्येते नव तन्तवः ।
द्विगुणं त्रिगुणं वाऽपि एकग्रन्थिकृतं विदुः ॥ ५१ ॥

ॐकारादयस्तन्तुदेवताः । वासुदैवत्यः,—इत्युभयपदवृद्धिः । तदेतन्नवतन्तुकं यज्ञोपवीतं द्विगुणं द्विसरम् ; अपि वा, त्रिगुणं त्रिसरं एकेन ग्रन्थिना कृतं विदुः जानन्त्याचार्य्याः । 'वाऽपि'—इति व्यत्यासेन प्रयुङ्क्ते,—अपि वा इत्यर्थः । द्विगुणम्—इति त्रिगुणत्वासम्भवे द्विगुणत्वं बोद्धव्यम्,—इति नारायणोपाध्यायाः । कात्यायनेनापि त्रैगुण्यमेवोक्तम् । तथाच कर्म्मप्रदीपे,—

"त्रिवृद्दूर्व्वावृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतञ्चोपवीतं स्यात्तस्यैकोग्रन्थिरिष्यते" ॥

इति । अयमपि परतस्त्रैगुण्यमभ्यसिष्यति । "कार्पासमुपवीतं षट्-

तन्तु त्रिवृद्ब्राह्मणस्य"—इति पैठिनसिवचनं गोभिलीयव्यतिरिक्त-विषयम्। कथं ज्ञायते ? शाखान्तरसूत्रकारत्वात्तस्य। नवतन्तु-सम्भवे षट्तन्तुविधायकम्—इति परिशिष्टप्रकाशः ॥४९॥५०॥५१॥

अत्र पृच्छति,—

**केनैवोत्पादितं सूत्रम् ? केन वा त्रिगुणीकृतम् ?।**
**केन वाऽस्य कृतोग्रन्थिः ? केन मन्त्रेण मन्त्रितम् ?॥५२॥**

ऋज्वर्थः श्लोकः ॥ ५२ ॥

उत्तरमाह,—

**ब्रह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतम्।**
**रुद्रेण तु कृतोग्रन्थिः सावित्र्या चाभिमन्त्रितम् ॥ ५३ ॥**

ब्रह्मणा सूत्रमुत्पादितम्, विष्णुना तत् त्रिगुणीकृतम्, रुद्रेण तत्र ग्रन्थिः कृतः, सावित्र्या तदभिमन्त्रितम्। सावित्री गायत्री। तुशब्दः स्वमन्त्रसंबन्धद्योतनार्थः, सर्वत्र संबन्धनीयः,—इति दीक्षितरामकृष्णस्य स्वरसः। 'इदानीम्—"ब्रह्म यज्ञानम्"—इति मन्त्रेण सूत्रोत्पादनम्, "इदं विष्णुः"—इति मन्त्रेण त्रिगुणीकरणम्, "आवोराजानम्"—इति मन्त्रेण तत्र ग्रन्थिकरणम्, "तत्सवितुः"—इति मन्त्रेणाभिमन्त्रणम्, ततोधार्य्यम्,'—इति दीक्षितभाष्यम् ॥ ५३ ॥

यज्ञोपवीतस्य परिमाणमाह,—

**स्तनादूर्ध्वमधोनाभेर्न कर्त्तव्यं कथञ्चन।**
**स्तनादूर्ध्वे श्रियं हन्ति नाभ्यधस्तात्तपःक्षयः ॥५४॥**

स्तनादूर्ध्वं नाभेरधश्च यज्ञोपवीतं कथञ्चन न करणीयम् । स्तनादूर्ध्वं यज्ञोपवीतं कुर्व्वन् श्रियं हन्ति । नाभेरधस्तात् कुर्व्वतस्तपःक्षयो-भवति । अत्र किञ्चिदुक्तव्यमस्ति । तत्र तावत्,—

"पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटिम् ।
तद्वार्य्यमुपवीतं स्यान्नातोलम्बं न चोच्छ्रितम्" ॥

इति कर्म्मप्रदीपे नाभ्यां धृतस्योपवीतस्य कटिपर्य्यन्तं लम्बनमुप-दिष्टम् । तदनेन विरुध्यते । कथं ह्युक्त्वा ? नाभेरधस्तात् करणस्यात्र निषेधात् । उच्यते । उपवीतस्य धारणं न नाभेरधस्तादित्येतदत्र प्रतिपिपादयिषितम् । लम्बता पुनः कटिपर्य्यन्तमेवोपदिष्टा ग्रन्थान्तरे, न निवार्य्यते । अतोन विरोधः । ननु, तथापि विरोधः । कुतः ? यतो "न चोच्छ्रितम्"—इत्यनेन नाभेरूर्द्ध्व-मेव धारणं कात्यायनस्याननुमतमवगच्छामः । आचार्य्यपुत्रस्तु "स्तनादूर्द्ध्वं न कर्त्तव्यम्"—इति वदन् नाभेरूर्द्ध्वमपि स्तनादध-स्तात् करणमनुजानाति । नैष दोषः । कस्मात् ? यस्मात् स्तना-दूर्द्ध्वं न कर्त्तव्यमिति वचनं स्तनादूर्द्ध्वं करणं शक्नोति निषेद्धुम्, न नाभेरूर्द्ध्वं करणमनुमन्तुम् । तत्रास्य सामर्थ्याभावात् । अर्थाद्धि खल्वयमर्थोऽवगम्यते । स चायमवगम्यमानोऽप्यर्थो वचना-न्तरविरोधान्न शक्नोत्यात्मानं लब्धुम् । यद्धि नाभेरूर्द्ध्वं न क्रियते, न क्रियतएवैतत् स्तनादूर्द्ध्वमिति नास्ति विरोधः । किमर्थं तर्हि स्तनादूर्द्ध्वमित्यभिधानम् ? ननु स्तनादधोऽपि नाभेरूर्द्ध्वञ्चेत् न कर्त्तव्यम्,—इत्युक्तम् । दोषातिशयार्थम्,—इति गृहाण ।

अथवा । उभयोरप्यस्मच्छाखायामुपदेशात् सम्भवासम्भवा-

भ्यामनयोर्व्यवस्था भविष्यति। कथं नाम ? सम्भवे कर्म्मप्रदीपोक्तम् परिमाणम्, असम्भवे पुनरत्रोक्तम्,--इति न विरोधः। तदत्रैव कल्पे नाभेरधःकरणं निषिध्यते, न कर्म्मप्रदीपोक्तकल्पे,--इति तत्र कटिपर्य्यन्तं लम्बनमविरुद्धम्। निन्दाऽप्यत्रोक्ता न कर्म्मप्रदीपोक्तं परिमाणं निन्दति। विवक्षितार्थ-स्तुतिपरत्वात्तस्याः। "न निन्दा निन्द्यं निन्दितुं प्रवर्त्तते, अपितु इतरत् स्तोतुम्"--इति हि तन्न्यायस्थितिः। तदिदं वचनमाचार्य्यपुत्रस्येत्येतदविदुषोनारायणोपाध्यायस्य,--'कर्म्मप्रदीपोक्तम् परिमाणं गोभिलीयानाम्। अन्येषान्तु,--

"स्तनादूर्द्धमधोनाभेर्न कर्त्तव्यं कथञ्चन"।

इति देवलोक्तं परिमाणम्'--इत्यभिधानं नादरणीयम् ॥ ५४ ॥

"सूत्रेण नवतान्तवम्"--इत्येतत्तावदुक्तम्, सूत्रमिदानीं व्याकुर्वते,--

**गोभिर्बालपवित्रेण धार्य्यमाणेन नित्यशः।**
**न स्पृशन्तीह पापानि श्रियं गात्रेषु तिष्ठति ॥५५॥**

गोभिः,--इति व्यत्ययात् षष्ठ्यर्थे तृतीया। एवमुत्तरत्रापि बोद्धव्यम्। गवां ये बालाः—केशाः, तन्निर्म्मितेन पवित्रेण यज्ञोपवीतेनेत्यर्थः। कुतः ? "यज्ञोपवीतं परमं पवित्रम्"—इति दर्शनात्। अभिधानकाण्डे पाठाच्च। तथा देवलोऽपि,--

"कार्पास-क्षौम-गोबाल-शण-वल्क-तृणोद्भवम्।
सदा सम्भवतोधार्य्यमुपवीतं द्विजातिभिः" ॥

इति गोबालनिर्म्मितयज्ञोपवीतस्य धारणं स्मरति। तदनेन गोबालनिर्म्मितपवित्रेण नित्यशोधार्य्यमाणेन इह शरीरे, लोके वा, पापानि न स्पृशन्ति। पवित्रपापयोर्विरोधात्। तथा, गात्रेषु श्रीर्लक्ष्मीस्तिष्ठति। श्रियम्,—इति व्यत्ययात् प्रथमार्थे द्वितीया। अन्तर्भूतणिजर्थतया तथाविधोपवीतस्य नित्यशोधारणकर्त्ता गात्रेषु श्रियं स्थापयतीति वा व्याख्येयम्॥ ५५॥

गोभिर्बालपवित्रेण यस्तु सन्ध्यामुपासते।
गोधर्म्मेष्वेव वर्त्तन्ते न स पापेन लिप्यते॥ ५६॥

उपासते—उपास्ते। वर्त्तन्ते वर्त्तते। गोधर्म्माः पवित्रत्वम्। कथं ज्ञायते? "गावः पवित्रं परमम्"—इति स्मरणात्। अतएव, स पापेन न लिप्यते,—इति पूर्ववदर्थः। अपर आह। 'गोधर्म्मेषु गोदानधर्म्मेषु वर्त्तते,—गोदानपुण्यं भवतीत्यर्थः'—इति॥ ५६॥

गोभिर्बालपवित्रेण यस्तु ह्यग्निमुपासते।
पञ्चाग्नयो हुतास्तेन यावज्जीवं न संशयः॥५७॥

यावज्जीवं पञ्चाग्नयस्तेन हुताः,—यावज्जीवं पञ्चाग्निहोमफलं स प्राप्नोतीत्यर्थः। पञ्चाग्नयश्च,—

"पवनः पावनश्चेता यस्य पञ्चाग्नयो गृहे"।

इत्युक्तलक्षणाः। व्याख्यातमन्यत्। तदत्र, गोबालनिर्म्मितयज्ञोपवीतस्य प्राशस्त्यमात्रावगतेरप्रतिषेधाच्च कार्पासादिसूत्रनिर्म्मितमप्युपवीतं भवति। तथाच स्मृत्यन्तरम्।

"कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञोवैश्यस्याविकसौत्रिकम्" ॥

इति। गोबालनिर्म्मितपवित्रत्वस्माकं प्रशस्यते,—इति द्रष्टव्यम्। नारायणोपाध्यायस्त्वेतदनालोच्य, गोभिलीयानामपि कार्पासाद्यसम्भवे गोबालैर्यज्ञोपवीतमिच्छति ॥ ५७ ॥

अथेदानीं ब्रह्मचारिणाऽन्त्या समित् यत्र होतव्या, तमग्निमाह,—

**आचार्य्येणाभ्यनुज्ञातआचार्य्याग्नौ विधिर्यथा।**
**प्रणीतेऽग्नौ समिद्दद्यादन्त्या सा ब्रह्मचारिणाम् ॥५८॥**

आचार्य्येणाभ्यनुज्ञातोब्रह्मचारी, यथा विधिस्तथा, आचार्य्यस्याग्नौ समित्—समिधं, दद्यात्—जुहुयात्। स्वयं प्रणीते वा अग्नौ समिधं जुहुयात्। सेयं समित्, ब्रह्मचारिणामन्त्या समिदित्युच्यते। तत्र, यद्याचार्य्याग्नौ अन्त्यां समिधं जुहोति, तदा नासावग्निरस्य गृह्यो भवति। तदा खलु विवाहाग्निरेव गृह्यः स्यात्। यदा पुनः स्वयं प्रणीतेऽग्नौ जुहोति, तदा सएवास्य गृह्योऽग्निर्भवति। "ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन्"—इत्यादिना अन्त्यसमिदाधानार्थमग्निप्रणयनं सूचयित्वा, "सएवास्य गृह्योऽग्निर्भवति"—इति सूत्रयन्नाचार्य्योऽप्येतदेवाह। अनेनाप्युक्तम्,—'अन्त्या समिद्विवाहस्य'—इति। 'अन्त्या सा ब्रह्मचारिणाम्'—इति च ब्रुवन् प्रणीतस्यैवाग्नेर्गृह्यत्वं भङ्ग्यन्तरेणाह। कथं ज्ञायते? अन्त्या समित्,—इत्याधानकालाभिधानात्, प्रणीते चाग्नौ हुतायाः समिधोऽन्त्यत्ववचनात्। तथाच, 'अन्त्या सा ब्रह्म-

चारिणाम्'--इत्यत्र, सा—इति सन्निहिततरा प्रणीतेऽग्नौ होतव्यैव समित् परामृश्यते,—इति न किञ्चिदनुचितम्। स खल्वयम्,—"खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाति"—इति वह्निकल्पः,—आचार्य्याग्नौ वा जुहुयात्, प्रणीते वा अग्नौ जुहुयात्,--इति। आचार्य्याग्नौ,--इति, प्रणीतेऽग्नौ,—इति चाग्निशब्दस्य हिरुच्चारणस्याप्येतदेव प्रयोजनम्। अन्यथा अनर्थकत्वापत्तेः। दीक्षितस्त्वेतदनालोच्य व्याचष्टे,—'आचार्य्याग्नौ स्थण्डिले प्रणीते'—इति। तदसङ्गतम्। न खल्वाचार्य्याग्नेरग्निप्रणयनस्यार्थवत्तां पश्यामः।

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्"।

इति कर्म्मप्रदीपे आचार्य्याग्नावपि ब्रह्मचारिणः समिद्धोमानुज्ञानात्। आचार्य्याग्नौ,--इति चाधिकरणनिर्देशात्। अलं पल्लवितेन।

इयमपरा योजना। आचार्य्येणाभ्यनुज्ञातो ब्रह्मचारी आचार्य्यस्याग्नौ यथाविधि समिधं जुहुयात्,—इति पूर्व्वार्द्धस्यार्थः। उत्तरार्द्धस्य खल्वपि। ब्रह्मचारी स्वयमग्निं प्रणीय तस्मिन् प्रणीते अग्नौ समिधं जुहुयात्। सा खल्वियं समिदन्त्येत्युच्यते। ब्रह्मचारिणो ब्रह्मचर्य्यसमये यत् सायंप्रातःसमिदाधानमुक्तं तत् खल्वाचार्य्याग्नौ कर्त्तव्यम्। न तदर्थमग्निः प्रणेतव्यः। ब्रह्मचर्य्यपरिसमाप्तिसमये येयं शेषा समिदाधातव्या, सा त्वग्निं प्रणीय तत्रैवाधातव्या, न त्वाचार्य्याग्नौ। सेयं प्रणीतेऽग्नौ या समिदाधीयते, सा खल्वन्त्या समित्। स च प्रणीतोऽग्निस्तस्य

गृह्योऽग्निर्भवति। तदनेन "अन्त्यां समिधमभ्याधास्यन्"—इत्यादि गोभिलसूत्रं व्याख्यातमिति बोद्धव्यम् ॥ ५८ ॥

अथेदानीम्,—"आश्वयुज्यां पौर्णमास्यां पृषातके पायसश्चरुरौद्रः"—इति सूत्रोक्तं पृषातकं, तस्य स्थापनस्थानञ्चाह,—

दधि सर्पिश्च संयुक्तः प्रोक्तोऽयं पृषातकः।
होमकाले तु तस्याग्नेः स्थानमुत्तरपूर्व्वतः ॥ ५९ ॥

दधि प्रसिद्धम्। सर्पिर्घृतम्। तदेतत् इयं संयुक्तं सत्, पृषातकः प्रोक्तम्। संयुक्तः,—इत्यादौ व्यत्ययात् पुंस्त्वम्, विधेयप्राधान्यविवक्षया वा समर्थनीयम्। होमकाले तु तस्य पृषातकस्य स्थानम्, अग्नेरुत्तरपूर्व्वतः,—ऐशान्यां दिशि, स्यात्। भट्टनारायणस्त्वेतदनवलोकयन्,—अग्नेरुत्तरतः पृषातकस्य स्थानमाह ॥ ५९ ॥

आश्वयुजीकर्म्मण्येव;—"गोनामभिश्च पृथक् काम्यासीत्येतत्प्रभृतिभिः"—इति सूत्रोक्तानि गोनामान्याह,—

काम्या प्रिया च हव्या च दृढ़ा रन्ता सरस्वती।
मही विश्रुता चाघ्न्या च गोनामानि विदुर्बुधाः ॥ ६० ॥

ऋजुरत्नरार्थः। चकाराः 'असि' शब्दस्याध्याहारार्थाः,—इति दीक्षितभाष्यम्। वस्तुतस्तु काम्याप्रियाहव्येति नामत्रयमेवासिकारान्तमन्यानि च नामानि संबोधनविभक्त्यन्तानि बोद्धव्यानि। तथाच पञ्चविंशब्राह्मणम्। "काम्यासि प्रियासि हव्यासीड़े रन्ते सरस्वति महि विश्रुते एतानि वै गोनामानि"—इति। विस्तरस्तु

गृह्यभाष्यादुपलब्धव्यः । 'अन्नया'—नान्ना खल्वत्र होमोनास्ती-त्यष्टावाहुतयो भवन्ति । तथाच कर्म्मप्रदीपः ।

"धृतिहोमे न प्रयुञ्जयाद्धोनामसु तथाऽष्टसु ।
चतुर्थीमन्नया इत्येतद्धोनाम्नि न हि ह्रयते" ॥

इति ॥ ६० ॥

**मधुपर्कं पिबेन्मन्थमञ्जतोहृदयं स्पृशेत् ।**
**अपूपानां चरोश्चापि सर्व्वस्थानान्यनक्ति च ॥ ६१ ॥**

मधुपर्कं वक्ष्यमाणलक्षणं पिबेत् । मन्थमपि वक्ष्यमाणलक्षणम्—दधिमन्थमधुमन्थोदमन्थभेदात् त्रिविधं, पिबेत् । अन्ततः—पानात् परं, हृदयं स्पृशेत् । अष्टकाविधौ अपूपानां चरोश्च सर्व्वाण्यवदानस्थानानि, अनक्ति च घृतेनाप्लावयति च । तदेतदयथार्थमभिप्रेतम् । कथं नाम ? चतुरवत्तिनां द्वे अवदानस्थाने भवतः—मध्यं पूर्व्वार्द्धश्च । पञ्चावत्तिनां पुनस्त्रीण्यवदानस्थानानि भवन्ति - मध्यं पूर्व्वार्द्धः पश्चार्द्धश्च,—इति । तदेतत् सर्व्वमस्मत्कृतगृह्यसूत्रभाष्यादुपलब्धव्यम् । अलमिह ग्रन्थगौरवेण ॥ ६१ ॥

अथेदानीम्,—"विष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन्"—इति सूत्रोक्तमर्घ्यादिकं व्याकुरुते.—

**दध्यक्षतसुमनसश्चापश्चेति चतुष्टयम् ।**
**अर्घ्यएष प्रदातव्यो गृह्ये ये अर्घ्यार्हाः स्मृताः ॥ ६२ ॥**

दधि, अक्षताः—यवाः, सुमनसः—पुष्पाणि, आपः—उदकम्,—

इत्येतत् चतुष्टयं मिलितमर्घ्यः। स खल्वेषोऽर्घ्यः प्रदातव्यः। कस्मै? "षड़र्घ्यार्हा भवन्ति"—इति सूत्रेण गृह्ये ये अर्घ्यार्हाः स्मृताः, तेभ्यः ॥ ६२ ॥

अपरमर्घ्यमाह,—

दध्यक्षतः सुमनसोघृतं सिद्धार्थकाः यवाः।
पानीयञ्चैव दर्भाश्च अष्टाङ्गोऽर्घ्य उच्यते ॥ ६३ ॥

अक्षतस्तण्डुलः। यवानां पृथगुपदेशात्। सिद्धार्थकाः श्वेतसर्षपाः। पानीयमुदकम्। प्रसिद्धमन्यत्। अष्टावङ्गानि यस्य, सोऽयमष्टाङ्गोऽर्घ्यउच्यते ॥ ६३ ॥

मधुपर्केणार्चनप्रकारमाह,—

सर्पिषा मधुना दध्ना अर्चयेदर्हयन् सदा।
ऋषिप्रोक्तेन विधिना मधुपर्केण याज्ञिकः ॥ ६४ ॥

याज्ञिकः, सदा—"परिसंवत्सरानर्हयेयुः" "पुनर्यज्ञविवाहयोश्च"—इति गृह्योक्तसर्व्वकाले, मधुपर्केणार्हयन्,—पूजयन्, ऋषिप्रोक्तेन गोभिलोक्तेन विधिना, सर्पिषा मधुना दध्ना—इत्येतत् त्रितयेनार्चयेत् ॥ ६४ ॥

कांसे त्रितयमासिच्य कांसेन परिसंवृतम्।
परिश्रितेषु देयः स्यान्मधुपर्कइति ध्रुवम् ॥ ६५ ॥

कांसे कांस्यपात्रे, त्रितयम्—सर्पिर्मधु दधि चासिच्य, कांसेन परि सर्व्वतोभावेन संवृतम्—सम्यगाच्छादितं कृत्वा, परिश्रितेषु—

अर्हणीयस्य सर्व्वतः समाश्रितेषु गृह्येषु,—इत्यर्थः। तथाच वाजसनेयके प्रवचने। "यत्र चार्घ्यं आगच्छति, सर्व्वे गृह्याइतरे तत्र वेष्टयन्ति"—इति। अपर आह। 'कटादिना परितः श्रितेषु सर्व्वतो वेष्टितेषु स्थानेषु',—इति। तदेवं मधुपर्कीदेयः स्यात्,—इति ध्रुवं निश्चयः ॥ ६५ ॥

मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च।
अनुच्छिष्टो भवेद्विप्रोयथा वेदविदोविदुः ॥ ६६ ॥

मधुपर्कभक्षणे, सोमभक्षणे, अप्सु—उदके आस्येन होमे पूर्व्वोक्ते, जलपाने वा, प्राणाहुतीषु च—उपनिषद्ब्राह्मणोक्तेषु प्राणव्यानापानसमानोदानरूपपञ्चाहुतिषु, विप्रोनोच्छिष्टोभवति, यथा वेदविदोजानन्ति ॥ ६६ ॥

प्राणाहुतिषु सोमेषु मधुपर्के तथैव च।
आस्यहोमेषु सर्व्वेषु नोच्छिष्टोभवति द्विजः ॥ ६७ ॥

आस्यहोमेषु—"सर्पिरास्येन जुहुयात्"—इत्यादिसूत्रोक्तेषु। सर्व्वेषु,—इतिकरणादन्येष्वप्येवंविधेषु—उपाकरणादावक्षतधानाभक्षणादिषु, द्विजोनोच्छिष्टोभवति। तदेतद्विशेषाभिधित्सया पुनरारम्भः। पूर्व्वं विप्रपदोपादानात् राजन्यवैश्ययोरुच्छिष्टताऽऽशङ्काऽपि स्यात् कस्यचिदिति वा पुनरारम्भः। समादरार्थो-वा ॥ ६७ ॥

अन्यमपि मधुपर्कमाह,—

दधनि पयसि वाऽथवा क्रतान्ने
मधु दद्यान्मधुपर्कमेतदाहुः।
दधि-मधु-सलिलेषु सक्तवः
पृथगेते विहितास्त्रयस्तु मन्थाः ॥ ६८ ॥

दधनि, पयसि,—दुग्धे वा, क्रतान्ने-ओदनादौ वा, मधु दद्यात्—क्षिपेत्। दद्यात्,—दतिपाठे धारयेदित्यर्थः। एतन्मधुपर्कमाहुराचार्याः। दधि-मधु-सलिलेषु सक्तवोदेयाः। तइमे त्रयोमन्थाभवन्ति ;—दधिमन्थः, मधुमन्थः, उदमन्थश्च,—इति। तदिदम्—"रसोऽसि वानस्पत्योरसं मयि धेहीति मधुमन्थस्य पिबेदिति गौतमः, वानस्पत्यइति प्रवचनम्, तथा दधिमन्थोदमन्थयोः"—इति द्राह्यायणादिकल्पसूत्रोक्तानां दधिमन्थमधुमन्थोदमन्थानां निर्व्वचनं प्रसङ्गागतमिति बोद्धव्यम्। कल्पसूत्रवृत्तिकारा अग्निस्वामिनोऽप्येवमेव श्लोकमिमं पठितवन्तः। दिक्षीतस्त्वन्यथेमं श्लोकं पठति—

दधनि पयसि वा क्रतान्ने मधु निदध्यान्मधुपर्कमाहुः।
दधिमधूदकं वाऽपि सक्तावित्येते विहितास्त्रयस्तु मन्थाः ॥

इति। अत्रापि पाठे पूर्व्वोक्तएवार्थः।

एवन्तावत् छन्दोगानां स्वशाखापरिभाषितश्चतुर्विधोमधुपर्कोभवति ;—दधि-मधु-घृतम्, दधनि मधु, पयसि मधु, क्रतान्ने मधुचेति। एवञ्च, सर्व्वत्रैव मधुपर्कः—इति समाख्याऽनुगृह्यते। तत्र प्रथमोमधुपर्कः कांस्यस्थः कांस्यापिधानश्च भवति। द्वितीयेऽप्यमुं

विशेषं वक्ष्यामः । शिष्टयोरनियमः । कथं ज्ञायते ? पूर्वस्मिन्नेव मधुपर्के तदभिधानात् । शिष्टयोरनभिधानाच्च । न चेदं वाक्यं घृतासम्भवपरम् । प्रमाणाभावात् । आराच्चाभिधानात् । यदि हि घृतासम्भवएव विधिरयं स्यात् । तदनुपदमेवैतदपि कुर्य्यात् । तस्माद्यावद्धितकरणादवगच्छामः,—पृथगेवैते मधुपर्कप्रकाराः,—इति । अपिच । 'अथवा' 'वा' शब्द्योरुपादानादेकार्थत्वाच्च विकल्पएवामीषां युक्तोवर्णयितुम् । तथा चोक्तम् । "एकार्थासु विकल्पेरन्"--इति । 'पृथक्'--इति वचनाच्चैवमवगच्छामः । तच्च यद्यपि परार्चीनम्, तथाप्यविशेषात् पूर्वत्राप्यनुषञ्जनीयम् । पयःकृतान्नाभ्यामपि मधुपर्काभिधानममुमर्थमुपोद्बलयति । घृतालाभे,--इत्यकरणाच्च । तस्मादियमेवावधारणा,—प्रथमएव मधुपर्कः कांस्यस्थः कांस्यापिधानश्च भवति, नान्तिमौ—इति । 'कंसे त्रितयमासिच्य'—इति ब्रुवन्नाचार्य्यपुत्रस्त्रितयस्यैव कंसे समासेचनं कंसेनापिधानञ्च, न द्वयोः,—इति दर्शयति । यथा खल्वभिक्रमणं प्रयाजमात्रस्यैवाङ्गं न पुनरनुयाजादीनां प्रकरणोपात्तानाम्,—इति तृतीयाध्याये सिद्धान्तितम्, तद्वदत्रापि स्यात् । अतएव,—

"साज्यं सुमनोयुक्तमुदकं दधिमिश्रितम् ।
अर्घ्यं, दधिमधुभ्याञ्च मधुपर्कोविधीयते ॥
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जली ।
कांस्यापिधानं कांस्यस्थं मधुपर्कं निवेदयेत्" ॥

इति कर्म्मप्रदीपेऽपि मधुपर्कपदं स्वोक्तमेव मधुपर्कमाह, नापरम् । व्यक्तिवचनं खल्वेतत् सन्निहितामेव व्यक्तिं शक्नोति वदितं नास-

57785

न्निहिताम्। आग्नेयीन्यायात्। तदनेन दधिमधुभ्यां यो मधुपर्को विधीयते, सोऽपि कांस्यापिधानः कांस्यस्थश्चेति कात्यायनेनोक्तम्। तस्मादाद्यौ मधुपर्कौ कांस्यापिधानौ कांस्यस्थौ च भवतः, नापरौ,—इति सिद्धम्।

यत्तु,—"दधनि मध्वानीय सर्पिर्वा मध्वलाभे"—इति गृह्यान्तरम्। तदन्येषामेव नास्माकम्। कस्मात्? अस्मच्छास्त्रे तदनुपदेशात्। विशेषस्योपदेशाच्च।

रघुनन्दनस्तु च्छन्दोगोक्तेतदनालोचयन्,—दधिमधुमात्रेण मधुपर्काभिधानं घृतासम्भवपरम्'—इति परिकल्प्य, 'तत्सम्भवे गोभिलः'—इत्यभिधाय, "मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन"—इति पारस्करगृह्यसूत्रम्; "पिहितं कांस्यस्थम्"—इत्याकुलीकृत्य लिखित्वा, 'पूर्ववचने पात्रानुपदेशात् कांस्यपात्रं विनाऽपि मधुपर्कोदीयते'—इति वर्णयाञ्चकार।

तदसङ्गतम्। मधुपर्कान्तरे मधुपर्कान्तरोक्तविशेषस्य संश्लेषाभावात्। 'यद्धि यदुपक्रम्य श्रुतं तत्तत्रैवाङ्गं नान्यत्र,'—इति भवानेवाह। प्रथमयोर्हि मधुपर्कयोर्विशेषः श्रूयते, नापरत्र। स खल्वयं विशेषएवान्यत्र नास्ति। तत्कृतएव तत्र पात्रानुपदेशात् प्रथमावपि मधुपर्कौ कांस्यपात्रं विना देयौ स्याताम्। अपिच। मध्वभावे घृतेन मधुपर्कं गृह्यान्तरकाराः स्मरन्ति, भवान् पुनर्मन्यते,—घृतासम्भवे दधिमधुमात्रेण मधुपर्कः—इत्यहो प्रमादः। घृतासम्भवे वचनस्य विषयत्वे खल्वशक्तविषयमेव वचनमिति कांस्यापात्रासम्भवेऽपि शक्यं नेतुम्। तस्याशक्तविषयत्वस्य

भवतोऽविवादात्। तत् कथमेतद्वचनावष्टम्भेन दधिमधुघृतवाक्ये श्रूयमाणस्यापि कांस्यपात्रस्योपलक्षणतां भङ्ग्यन्तरेणाभ्युपगच्छति। वाक्ययोरनयोः परस्परसम्बन्धाभावात्। अपिच। भवान् खलु पारस्करीयं सूत्रं गोभिलीयमिति ब्रवीति पारमर्षञ्च सूत्रमाकुलयति,—इति किमत्र ब्रूमः ॥ ६८ ॥

अथेदानीम्—"श्रृतमभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत्"—इति सूत्रोक्तं चरोरभिघारणं प्रत्यभिघारणञ्च व्याकुरुते,—

**पवित्रान्तर्हितं कृत्वा चरुं प्राज्ञोऽभिघारयेत्।**
**उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते ॥ ६९ ॥**

प्राज्ञोबुद्धिमान्, उदगग्रेण पवित्रेण चरुमन्तर्हितं व्यवहितं कृत्वा; चरुमध्ये उदगग्रं पवित्रं निधायेत्यर्थः। अभिघारयेत्—घृतस्रुवेणाप्लावयेत्। चरुमुत्तरस्यां दिशि उद्वास्य उत्तार्य्य च, पूर्व्वोक्तेनैव विधिना पुनरभिघारयेत्। एवं कृते तन्त्रमङ्गविस्तारेण लुप्यते ॥६९॥

**चतुर्मुष्टिश्चरुः कार्य्यश्चतुर्णामुत्तरोऽपि वा।**
**कपालस्य प्रमाणेन अपूपानष्टकाविधौ ॥ ७० ॥**

चरुतन्त्रे चतुर्मुष्टिपरिमितश्चरुः कर्त्तव्यः। अपि वा,—अथवा, बहुदैवत्ये चरौ चतुर्णां मुष्टीनामुत्तरोऽधिकोऽपि चरुः कर्त्तव्यः। अष्टकाविधौ तु कपालस्य प्रमाणेन अपूपान्—मण्डकान् कुर्य्यात्। मुष्टेः पलमित्यनर्थान्तरम्। बहुपाणिः कस्मान्नोच्यते? आचार्य्यविरोधादित्याह। एवं खल्वेकदैवत्येऽपि चरौ चतुर्मुष्टिकरणे आचार्य्यसूत्रं विरुध्येत। तथाच सूत्रम्। "अमुष्मै त्वा जुष्टं

निर्व्वपामीति देवतानामादेशं सकृत् हिरूष्णीम्"—इति। तस्मात्,—मुष्टिरत्र पलमेव,—इति प्रतिपद्यामहे। तदिदं हविःपरिमाणपरं वचनम्। अतएव कर्म्मप्रदीपेऽपि,—

"देवतासंख्यया ग्राह्या निर्व्वापाश्च पृथक् पृथक्।
तूष्णीं हिरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक्॥
यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता।
शेषश्चैव भवेत् किञ्चित्, तावन्तं निर्वपेच्चरुम्"॥

इत्यत्र परवचनेन हविःपरिमाणमेवोक्तम्, न मुष्टिसंख्या। तस्याः पूर्ब्बवचनेनैवोक्तत्वात्। 'तावन्तं चरुं निर्वपेत्'—इत्यस्यावचनव्यक्तेर्हविःपरिमाणएव तात्पर्य्यावगतेश्च। तदनयोः परिमाणयोर्विकल्पो बोद्धव्यः। द्वयोरप्यस्मच्छास्त्रोक्तत्वात्। कात्यायनोऽपि 'भवेद्वा'—इति वा-शब्देन परिमाणान्तरं सूचयति॥ ७०॥

## चतुर्भागं पाणितलात् कपालं याज्ञिकाविदुः।
## पृथक्कपालान् कुर्व्वीत अपूपानष्टकाविधौ॥ ७१॥

पाणितलाच्चतुर्भागं कपालं याज्ञिकाः जानन्ति। तदिदं कपालं यज्ञ एवोपयुक्तम्। अष्टकाविधौ पुनर्नैतादृग्यं कपालं, किन्तु तत्र पृथक्कपालान्—अन्यादृग्यकपालसंस्कृतानपूपान् कुर्व्वीत। अथवा। करतलाच्चतुर्भागं कपालमित्येकं वाक्यम्। तदिदं न्यूनतरकपालपरिमाणाभिप्रायं वचनम्,—न पुनरतोऽपि न्यूनपरिमाणं कपालं कुर्य्यादित्ययमत्रार्थः। एवं खल्वनेन वाक्येन,—"त्रैयम्बकप्रमाणान्"—इति सूत्रम्—

"त्रैयम्बकं करतलमपूपामण्डकाः स्मृताः" ।

इति वचनञ्च न विरोत्स्यते । अष्टकाविधौ पृथक्कपालान्—नानाकपालसंस्कृतान् अपूपान् कुर्वीत,—इत्यपरं वाक्यम् । तदनेन,—"एककपालान्"—इति सूत्रं व्याख्यातम् ॥ ७१ ॥

**वपाहोमे मुखेनैव होमे स्विष्टकृते तथा ।**
**व्याहृतीर्न प्रयोक्तव्या मुखे नाप्सु च लक्षणम् ॥ ७२ ॥**

"स्थालीपाकाहृता वपामवदाय स्विष्टकृदाहृता वाऽष्टकायै स्वाहेति जुहोति"—इति सूत्रोक्ते वपाहोमे, मुखेन होमे—पूर्व्वोक्ते, स्विष्टकृद्धोमे च, मन्त्रानादेशे प्रयोक्तव्यत्वेन पूर्व्वमभिहिताः व्याहृतयोन प्रयोक्तव्याः । एषु मन्त्रस्योपदेशात्—एषु कर्त्तव्येषु एतदनुकूलं यत् किञ्चित् क्रियते, तत्र न व्याहृतिप्रयोगः,—इत्ययमत्रार्थः । व्याहृतीः,—इत्यत्र पूर्व्वसवर्णोद्रष्टव्यः । "जातरूपेण वाऽऽदाय कुमारस्य मुखे जुहोति"—इत्यादिसूत्रोक्ते मुखे होमे, उदकहोमे च पूर्व्वोक्ते, लक्षणं गोभिलोक्तं न कर्त्तव्यम् ॥ ७२ ॥

**सन्ततः प्रणवः कार्य्यः पित्र्ययज्ञेषु ब्राह्मणैः ।**
**उपांशुकरणञ्चापि सह कर्त्रा समस्वरैः ॥ ७३ ॥**

पित्र्ययज्ञेषु पित्र्यकर्म्मसु, कर्त्रा कर्म्मकर्त्रा सह, समस्वरैर्ब्राह्मणैः, सन्ततोऽविरतः,—प्रतिमन्त्रमित्यर्थः । प्रणवओंकारः करणीयः । होमे, अन्यत्र च,—

"नोङ्कुर्य्याद्धोममन्त्राणां पृथगादिषु कर्हिचित् ।
अन्येषाञ्चाविलष्टानां कालेनाचमनादिना" ॥

इति कर्मप्रदीपोक्तं द्रष्टव्यम्। "स्वरादिमृगन्तमोङ्कारं त्रिमात्रं मकारान्तं कृत्वोत्तरस्य ऋर्द्धेऽवस्येत् तत् सन्ततम्"—इति श्रौताश्वलायनोक्तलक्षणो वा सन्ततो द्रष्टव्यः। उपांशु,—

"शनैरुच्चारयेन्मन्त्रमोष्ठदोष्ठौ प्रचालयन्।
किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः" ॥

इत्युक्तलक्षणं यथा भवति, तथा करणञ्च ज्ञेयम्। अथवा। उपांशुशब्दोविविक्तपर्य्यायोऽव्ययम्। तदयमर्थः। उपांशु विविक्ते पित्र्ययज्ञस्य करणं बोद्धव्यम्। तथाच मनुः।

"शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्"।

इति ॥ ७३ ॥

"आसायमाहुतेः प्रातराहुतिर्नात्येति"—इत्यादिसूत्रैरतीतहोमानामागामिहोमकाले करणमुपदिष्टम्। तत्र, किमतीतहोमं कृत्वा आगामिहोमः कर्त्तव्यः, आहोस्वित् आगामिहोमं कृत्वा अतीतहोमः करणीयः ?—इत्येतदिदानीं वर्णयिष्यामः,—

कालातीतेषु होमेषु उत्तरेष्वागतेषु च।
कालातीतानि हुत्वैव उत्तराणि समारभेत् ॥ ७४ ॥

ऋज्वर्थः श्लोकः ॥ ७४ ॥

यान्यतीतान्यतिक्रम्य उत्तराणि समारभेत्।
न देवाः पितरस्तस्य प्रतिगृह्णन्ति तद्विदः ॥ ७५ ॥

यः पुनर्यानि अतीतानि कर्माण्यकृत्वा उत्तराण्यारभते, देवाः पितरश्च तस्य तत्—अतीतहोमीयं हविर्न प्रतिगृह्णन्ति। अथवा।

'यानि'—इति यः,—इत्यर्थे व्यत्ययात् पदम्। यः अतीतान्यकृत्वा उत्तराण्यारभते, देवाः पितरश्च तस्य तत्—सर्व्वमपि हविर्न प्रतिगृह्णन्ति ॥ ७५ ॥

अथेदानीम्—"अग्नये स्वाहेति पूर्व्वां तूष्णीमेवोत्तरां मध्ये चैवापराजितायाञ्चैव दिशीतिसायम्"—इति सूत्रोक्तामपराजितां दिशं व्याकुरुते,—

प्रक्रमणे तथोद्वाहे होमे स्विष्टकृते तथा।
यस्यां दिशि विधिं प्राहुस्तामाहुरपराजिताम् ॥ ७६ ॥

प्रक्रमणे—वध्वाः सप्तपदीगमने, तथोत्तरविवाहे, स्विष्टकृद्धोमे च, यस्यां दिशि विधानं प्राहुराचार्य्याः, तां दिशमपराजितां ब्रुवन्त्याचार्य्याः; प्रागुदीचीमैशानीमित्यर्थः। तथाच प्रक्रमणे गोभिलसूत्रम्। "सूर्येण शेषमग्नावोप्य प्रागुदीचीमभ्युत्क्रामन्त्येकमिषइति"—इति। तथोत्तरविवाहे। "प्रागुदीच्यां दिशि यद्ब्राह्मणकुलमभिरूपम्"—इति। तथा स्विष्टकृद्धोमे। "अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्व्वार्द्धं जुहुयात्"—इति ॥ ७६ ॥

अयुक्तमम्लवर्णैरपर्य्युषितमेव च।
हविष्यमेतदन्नाद्यममुरैश्चाप्यसंयुतम् ॥ ७७ ॥

अम्लवर्णैर्न युक्तम्, न च पर्य्युषितम्, नाप्यसुरैर्म्मिश्रितम्। तदीदृशमोदनाद्यं हविष्यमाहुः। असुरः—इति नैघण्टुककाण्डे मेघनामसु पठितम्। तच्च तत्रोनत्रिंशत्तमं नाम। तथा च,

असुरैर्मेघैर्मेघजलैर्न मिश्रितमित्येतत्। मेघोदकस्यापवित्रत्वात्। तथाच स्मरणम्।

"स्नानमाचमनं दानं देवतापितृतर्पणम्।
शूद्रोदकैर्न कुर्वीत तथा मेघादिनिःसृतैः" ॥

इति। अथ वा। असुरैः—क्षारविदाहिभिरमिश्रितमित्यर्थः। कथं ज्ञायते? शृणु यथा ज्ञायते। असुरुपतापः—इति ह्यनर्थान्तरम्। असुं रान्ति ददति ये क्षारादयस्ते खल्विमे असुराः भण्यन्ते। असुरैः—इति लिङ्गव्यत्ययाद्वा पदं द्रष्टव्यम्। असुराभिरित्यर्थः। असुरा रजनी हरिद्रेत्यनर्थान्तरम्। बहुवचनादन्यैरप्येवंविधैरमिश्रितम्—इति। अपरआह। 'असुरैरश्वादिभिर्न भक्षितम्'—इति।

तदनेन,—"हविष्यमन्नं प्रथमं परिजपितं भुञ्जीत"—इति सूत्रोक्तं हविष्यमन्नं व्याख्यातम्। "तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ"—इत्यादिना सूत्रितमक्षारलवणमप्यनेनैव व्याख्यातं वेदितव्यम्। एतदनुपदमेव 'हविष्यमन्नम्'—इति सूत्रणात्। तस्यैव खल्वक्षारलवणाशनस्य प्रथमे अशने विशेषविवक्षया सूत्रमिदं प्रवर्तते,—'हविष्यमन्नम्'—इत्यादि। तदत्र, लवणमात्रप्रतिषेधात्,—क्षारमृत्तिकादिकृतलवणभिन्नं लवणमक्षारलवणम्,—इति रघुनन्दनव्याख्यानं नादरणीयम्। यच्च,—"लवणे सैन्धवसामुद्रे"—इति हविष्यान्नविषयं स्मरणान्तरम्। तदप्येतद्व्यतिरिक्तविषयं बोद्धव्यम्। कस्मात् कारणात्? स्वशास्त्रपरि-

भाषायाः शीघ्रमुपस्थितत्वात् । सामान्यस्य विशेषेतरपरत्वोपपत्तेश्च ॥ ७७ ॥

**इक्षवः सर्व्वखल्वाश्च कोद्रवा वरटैः सह ।**
**अकृताग्रयणाभक्ष्या येषां नोक्ताहविर्गुणाः ॥७८॥**

इक्षवः, सर्व्वखल्वाः चणकाः, कोद्रवाः प्रसिद्धाः, वरटोवरटीत्यनर्थान्तरम् । तैर्वरटैः सह, इमे इक्षुप्रभृतयः अकृताग्रयणाः भक्षणीयाः । येषां हविर्गुणाः नोक्ताः—येषां हविष्टं नोक्तं, तइमे इक्षुप्रभृतयः इत्यर्थः । न कृतं आग्रयणं नवशस्येष्टिर्यैः, तइमे अकृताग्रयणाः—अकृतनवशस्येष्टयोभण्यन्ते ॥ ७८ ॥

**नवयज्ञेऽधिकारस्थाः श्यामाकाव्रीहयोयवाः ।**
**नाश्नीयान च हुत्वैवमन्येष्वनियमः स्मृतः ॥ ७९ ॥**

नवयज्ञे योऽधिकारः, तत्र तिष्ठन्ति,—इति नवयज्ञेऽधिकारस्थाः,—नवयज्ञे अधिकृताः—इत्येतत् । तदित्यभूताः श्यामाकादयः न हुत्वा—होममकृत्वा नवयज्ञमकृत्वा,—इति यावत् । नाश्नीयाः नाश्नीयाः । अन्येषु पुनर्गोधूमादिषु एवमनियमः होमस्थानियमः स्मृतः । अतएव गोभिलेन व्रीहियज्ञमभिधाय, "एतयैवाहृता श्यामाकयवानाम्"—इति त्रिष्वेव नवयज्ञः सूत्रितः । गोधूमादिषु तु करणेऽभ्युदयः, अकरणेऽपि न प्रत्यवायः । सोऽयमाचार्य्यानुक्तो विशेषः । श्यामाकयज्ञोऽपि वनस्थस्यैव । "श्यामाकोवनिनः स्मृतः"—इति वचनात् ॥ ७९ ॥

अथेदानीं श्राद्धमधिकृत्य पृच्छति,—

श्राद्धे ब्राह्मणएकश्चेत् स्वल्पञ्च प्रकृतं यदि ।
वैश्वदेवं कथं तत्र ? इति मे संशयोमहान् ॥८०॥

श्राद्धे यद्येकोब्राह्मणः स्यात्, प्रकृतं श्राद्धोपयुक्तमन्नं वा यदल्पं स्यात्, तदा तत्र कथं वैश्वदेवं भवति,—इति मम महान् संशयः। तदिदं प्रश्नद्वयम्—बहुद्रव्यसद्भावेऽपि ब्राह्मणासम्पत्त्या एकब्राह्मणपक्षे कथं वैश्वदेवं स्यात्,—इति। ब्राह्मणसम्पत्तिसम्भवेऽपि द्रव्यस्याल्पत्वेन बहुब्राह्मणभोजनासम्भवे कथं वैश्वदेवं स्यात्,—इति च ॥ ८० ॥

अत्रोत्तरमाह,—

प्रणीतान्नाद्यमुद्धृत्य सर्व्वस्य प्रकृतस्य तु ।
ब्राह्मणाय प्रदातव्यम्, एवं भवति सम्पदि ॥८१॥

प्रकृतस्य श्राद्धार्थमुपकल्पितस्य सर्व्वस्य, प्रणीतं प्रणेतुं योग्यमन्नाद्यमुद्धृत्य पृथक् कृत्वा, वैश्वदेवार्थमित्यर्थः। वैश्वदेवस्य प्रश्नविषयत्वादुत्तरमपि तद्विषयमेव भवितुमुचितम्। तदेवं वैश्वदेवार्थमन्नं पृथक् कृत्वा निवेद्य श्राद्धात् परं तदन्नं ब्राह्मणाय कस्मैचित् प्रदातव्यं प्रतिपादयितव्यम्। तथा च वशिष्ठः।

"यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत् ?
अन्नं पात्रे समुद्धृत्य सर्व्वस्य प्रकृतस्य तु ।
देवतायतने कृत्वा ततः श्राद्धं समापयेत् ॥
प्रास्येदग्नौ तदन्नन्तु दद्याद्वा ब्रह्मचारिणे"।

इति ।

"एकस्मिन् ब्राह्मणे दैवे साग्नेरग्निर्भवेत् सदा ।
अनग्नेः कुशमुष्टिः स्यात् श्राद्धकर्म्मणि सर्व्वदा" ॥

इति च स्मृत्यन्तरम् । स खल्वयं बहुद्रव्यसङ्गावेऽपि ब्राह्मणसम्पत्तौ विधिः । कथं ज्ञायते ? द्रव्यविशेषणतया सर्व्वस्येति श्रुतेः । स हि भूरिद्रव्यकृत्स्नवाची । अतोऽवगच्छामः—भूरिद्रव्यसङ्गावेऽपि ब्राह्मणासम्पत्तौ विधिरयम्—इति । तमिमं विधिं ब्राह्मणसम्पत्तावपि द्रव्यस्याल्पत्वे अतिदिशति,—एवं भवति सम्पदि,—इति । ब्राह्मणसम्पत्तावपि द्रव्यस्याल्पत्वे एवमेव कर्त्तव्यमित्यर्थः ॥ ८१ ॥

तत्र सामगस्य प्रशंसामाह,—

**यद्येकं भोजयेत् श्राद्धे च्छन्दोगं तत्र भोजयेत् ।**
**ऋचो यजूंषि सामानि त्रैविद्यं तत्र तिष्ठति ॥८२॥**

पूर्व्वार्द्धस्य हेतुरूपमुत्तरार्द्धम् । त्रैविद्यं त्रयोवेदाः । स्वार्थे तद्धितः । तत्र च्छन्दोगे । छन्दोगे तावत् साम्नां तदाश्रयभूतानामृचां च स्थितिः सुप्रसिद्धैव । पठ्यमानमन्त्रकाण्डे ताण्ड्यब्राह्मणादौ च केषाञ्चित् यजुषां पाठात् यजुषामपि तत्र स्थितिरवबोद्धव्या । छन्दोगस्य स्तुतितात्पर्य्यकं वा वाक्यम् । ऋज्वन्यत् ॥ ८२ ॥

तत्र फलार्थवादमाह,—

**ऋग्भिस्तु पितरः प्रीतायजुर्भिस्तु पितामहाः ।**
**सामभिः प्रमितामहास्तस्मात्तं तत्र भोजयेत् ॥ ८३ ॥**

तं च्छन्दोगम् । तत्र श्राद्धे । श्लिष्टमन्यत् ॥ ८३ ॥

अटेत पृथिवीं कृत्स्नां सशैलवनकाननाम्।
लभेत यदि पित्र्यर्थे साम्नामक्षरचिन्तकम् ॥ ८४ ॥

वनकाननयोरवान्तरभेदविवक्षया पृथगुपन्यासः। अथवा। वनं नीरं जलमित्यनर्थान्तरम्। काननशब्दस्य गृहमप्यर्थोऽस्ति ॥८३॥

एकस्य पुनः पुनः श्राद्धभोक्तृत्वेऽपि दोषोनास्तीति प्रसङ्गादाह,—

दर्भाः कृष्णाजिनं मन्त्राब्राह्मणाश्च विशेषतः।
नैते निर्माल्यतां यान्ति नियोज्यास्तु पुनः पुनः ॥८५॥

कृष्णाजिनं कृष्णमृगचर्म। प्रसिद्धान्यत्। एते दर्भादयोनिर्माल्यतां निर्वीर्यतां न प्राप्नुवन्ति। एवं खल्वग्निमश्लोके,—"निर्माल्याश्चिति पावकाः"—इति वचनमाङ्गस्येनोपन्यस्यते। तस्मात्, पुनः पुनरपि नियोज्याः। तत्त्वकारस्त्वन्यथेमं श्लोकं पठति ;—

"दर्भाः कृष्णाजिनं मन्त्राब्राह्मणाहविरग्नयः।
अयातयामान्येतानि नियोज्यानि पुनः पुनः" ॥

इति। तत्र, अयातयामत्वम् अपि अनिर्माल्यतापर्यवसायि बोद्धव्यम्। कुतः ?

"जीर्णश्च परिभुक्तश्च यातयाममिदं द्वयम्"।

इत्युक्तेः। स्मृत्यन्तरे तु विशेषः ;—

"संग्रहाद्वत्सरं यावत् शुद्धिः स्यादिध्मबर्हिषाम्।
अतः परं न गृह्णीयात् जपादौ यज्ञकर्मणि" ॥

इति। 'अत्र च,—

"मासे नभस्यमावस्या तस्यां दर्भचयोमतः ।
अयातयामास्ते दर्भाविनियोज्याः पुनः पुनः" ॥

इति मरीचिवचनात् श्रावणामावस्यायामेव चितानां दर्भाणामयातयामत्वम्' । एवमेके । 'सर्व्वदैव चितानां दर्भाणामयातयामत्वम् । मरीचिवचनन्तु,—

"वार्षिकांश्चतुरोमासान् नाहरेत् कुशमृत्तिकाः ।
आददीत त्वभावे तु सद्योयस्योपयोजनम्" ॥

इति शिवरहस्योयस्य निषेधस्यापवादकम्' । एवमपरे । तदत्र भगवन्तोभूमिदेवाः प्रमाणम् । पूर्व्वस्तु कल्पो युक्तः प्रतिभाति । कुतः ? मरीचिवचने ते दर्भा इति तच्छब्देत नभस्यमावस्यायां चितान् दर्भान् परामृश्य तेषामयातयामत्वकथनादुभयोरेकवाक्यतोपपत्तेः । शिवरहस्यानार्षत्वन्तु तेषामप्यनुमतम् । अन्युकभट्टेनापि दानसागरेऽभिहितम्—"लोके प्रसिद्धमेतद्विष्णुरहस्यं शिवरहस्यञ्च इयमिह न परिगृहीतं संग्रहरूपञ्च यत्नतोऽवधार्य्यम्"—इति ॥ ८५ ॥

किममीषां न भवत्येव निर्माल्यता ? एवं खलु प्राप्तम् । तदिदमारभ्यते,—

दर्भाः पिण्डेषु निर्माल्याविप्राः प्रेतान्नभोजने ।
मन्त्राः शूद्रेषु निर्माल्यानिर्म्माल्याश्चिति पावकाः ॥८६॥

पिण्डेषु प्रक्षिप्तादर्भानिर्माल्याभवन्ति—कर्म्मान र्हाइत्यर्थः । प्रेतान्नस्य—प्रेताशौचिनामन्नस्य प्रेतश्राद्धान्नस्य वा भोजने कृते,

विप्रानिर्म्माल्याभवन्ति। शूद्रेषु प्रयुक्तामन्त्रानिर्म्माल्याभवन्ति। चितायां ये अग्नयः ते निर्म्माल्याभवन्ति ॥ ८६ ॥

पिण्डार्थं ये स्तृतादर्भास्तर्पणन्तु कृतन्तु यैः।
धृतैः कृते च विण्मूत्रे त्यागस्तेषां विधीयते ॥ ८७ ॥

ये दर्भाः पिण्डनिर्व्वपणार्थं स्तृताः, यैश्च दर्भैः—"यैः कृतं पित्रतर्पणम्"—इति स्मरणात्—पित्रतर्पणं कृतम्, धृतैर्दर्भैः—(इत्यभावे तृतीया)—विण्मूत्रे कृते च, तेषां दर्भाणां परित्यागः क्रियते। तत्र विशेषमाह लघुहारीतः।

"पिण्डार्थं ये स्तृता दर्भायैः कृतं पित्रतर्पणम्।
मूत्रोच्छिष्टैर्धृता ये च तेषां त्यागो विधीयते ॥
नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः।
पवित्रांस्तान् विजानीयाद् यथा कायस्तथा कुशाः" ॥

इति। तदत्र मूत्रोच्छिष्टैर्धृता ये च इत्यस्यापवादतया परवचनारम्भः इति नारायणोपाध्यायाः। एवञ्च विण्मूत्रोत्सर्गकाले नीवीमध्ये ब्रह्मसूत्रे वा धृतानां कुशानां त्यागो न करणीयः,—इत्युक्तं भवति ॥ ८७ ॥

अवसिता प्रासङ्गिकी कथा। प्रकृतामिदानीमनुवर्त्तामहे,—

उरसि पितरोभुङ्क्ते वामपार्श्वे पितामहाः।
प्रपितामहादक्षिणतः पृष्ठतः पिण्डतक्षुकाः ॥ ८८ ॥

श्राद्धे एकस्य ब्राह्मणस्य भोजने, तस्योरसि हृदये—अग्रतइत्येतत्। पितरोभुञ्जते। परतोऽप्येवं वर्णनीयम्। 'पिण्डतक्षुकाः पिण्ड-

लेपभुजश्चतुर्थाद्याः पितरः',—इति दीक्षितभाष्यम् । तदस्मे पृष्ठतोभुञ्जते ॥ ८८ ॥

**क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते ।**
**पतितानाञ्च संभाषे दक्षिणं श्रवणं स्पृशेत् ॥ ८९ ॥**

क्षुते कृते । निष्ठीवने श्लेष्मादिनिरसने कृते । दन्तोच्छिष्टे—दन्तलग्नोच्छिष्टे, जिह्वाभिमर्षणयोग्ये निर्गीर्णे वा,—इत्यभिप्रेतम् । कथं ज्ञायते ? "दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षणात्, प्राक् च्युतेरित्येके । च्युतेरास्यावविद्यान्निगिरन्नेव तत् शुचिः"—इति स्मरणात् । तथा अनृते मिथ्यावचने कथिते, पतितानां सम्भाषे च, दक्षिणं कर्णं स्पृशेत् । स खल्वयं कर्मकाले विधिरित्यवगच्छामः । "सुप्त्वा भुक्त्वा च्युत्वा स्नात्वा पीत्वा विपरिधाय च, रथ्यामाक्रम्य श्मशानञ्चाचान्तः पुनराचामेत्"—इति गोभिलसूत्रमपि कर्मकालादन्यत्र,—इति च प्रतिपद्यामहे । किं कारणम् ? परस्परविरोधेन भविष्यति,—इति । तथाच स्मरणम् ।

"क्षुते निष्ठीविते सुप्ते परिधानेऽनुपातने ।
कर्मस्थएषु नाचामेत् दक्षिणं श्रवणं स्पृशेत्" ॥

इति ॥ ८९ ॥

दक्षिणकर्णस्पर्शे हेतुविवक्षया इदमाह,—

**मरुतः सोमरुद्राग्नी मित्रावरुणौ तथैव च ।**
**एते सर्व्वे च विप्रस्य श्रोत्रे तिष्ठन्ति दक्षिणे ॥ ९० ॥**

एतस्मात् कारणात् दक्षिणश्रवणं स्पष्टव्यम्। मरुतोवायवः अमरा-वा। सोमादीनां पृथगुपन्यासोविवक्षया भविष्यति। मित्रा-वरुणौ,—इति देवताद्वन्द्वे दीर्घः ॥ ९० ॥

आत्मतन्त्रेषु यन्नोक्तं तत् कुर्य्यात् पारतन्त्रिकम्।
विशेषाः खलु सामान्याये चोक्ता वेदवादिभिः ॥ ९१ ॥

तन्त्रं शास्त्रमित्यनर्थान्तरम्। आत्मनस्तन्त्रेषु यन्नोक्तं, तत् पर-तन्त्रोक्तं कुर्य्यात्। ये च सामान्याः सर्व्वशाखिसाधारणाः, विशेषाः—

"नित्यं स्नात्वा शुचिः कुर्य्यादेवर्षिपितृतर्पणम्"।

इति।

"सन्तोषं परमास्थाय सुखार्थी संयतोभवेत्"।

इति चैवमादयः, वेदवादिभिर्मन्वादिभिरुक्ताः, ते च कर्त्तव्याः। एवं वा—

ये च साधारणाविशेषाः—आचमनादयः, मन्वादिभिरुक्तास्तेच कर्त्तव्याः। तदिदं श्रौताभिप्रायं वचनम्। कथं ज्ञायते?

"स्मार्त्तं साधारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु"।

इति गृह्यपरिशिष्टान्तरदर्शनात्।

एवं वा—

ये च सामान्याः साधारणाः—परिभाषारूपाः इत्येतत्। विशेषाः—"उच्चैर्ऋचा क्रियते उच्चैः साम्ना उपांशु यजुषा"—इत्येवमादयः, वेदवादिभिरुक्ताः, ते च कर्त्तव्याः। वेदं वदितुं

श्रौतं येषां तद्वेदे वेदवादिनो वेदप्रवक्तारः कठादयो भवन्ति। न खलु तत्रभवन्तो मन्वादयो वेदवादिनः, स्मर्त्तारोहि ते वेदार्थस्य ।

एवं वा—

सामान्याः—समानकर्म्माश्रयाः ये विशेषाः वेदवादिभिरुक्ताः, ते च करणीयाः । तदनेन,—शाखान्तरीयगुणानामपि शाखान्तरे उपसंहारः कर्त्तव्यः—इत्युक्तं भवति। तथाच गृह्यपरिशिष्टान्तरम् ।

"श्रौतेषु सर्व्वशाखोक्तं सर्व्वस्यैव यथोचितम्" ।

इति । सेयं शाखान्तराधिकरणन्यायमूला स्मृतिरिति द्रष्टव्यम् । किं भवति तर्हि प्रयोजनं पूर्व्वार्द्धस्य ? ननु परार्द्धेनैव गुणोपसंहार-उपदिष्टः । उच्यते । यदात्मतन्त्रे उपदिष्टं तत्र परतन्त्रोक्तगुणोपसंहारः परार्द्धस्यार्थः । यत् पुनर्नोपदिष्टमेवात्मनस्तन्त्रे, तदपि परतन्त्रोक्तं करणीयमिति प्रयोजनं पूर्व्वार्द्धस्य । यथा खल्वग्निहोत्रमस्माच्छाखायां नोपदिष्टं, तदपि याजुर्व्वेदिकमनुष्ठीयतेऽस्माभिः । तदेतत् परिशिष्टकृतः कात्यायनस्य वचनसंवादेनावधार्य्यते । तच्चोदाहरिष्यामः ॥ ९१ ॥

**ऊनोवाऽप्यतिरिक्तोवा यः स्वशास्त्रोक्तमाचरेत् ।**
**तेन सन्तनुयात् यज्ञं न कुर्य्यात् पारतन्त्रिकम् ॥९२॥**

स्वशास्त्रे न्यूनो वा अधिको वा योविधिरुक्तः, तं स्वशास्त्रोक्तं विधिमाचरेत् । तेनैव यज्ञं विस्तारयेत् । परतन्त्रोक्तं न कुर्य्यात् ॥ ९२ ॥

यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत्।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥ ९३ ॥

यः पुनः स्वशाखोक्तं त्यक्त्वा परशाखोक्तमाचरति, स खल्वयमृषिं स्वशाखाचार्यमप्रमाणं करोति। स खल्वृषिमप्रमाणं कृत्वा अन्धे तमसि—नरके पतति।

इदमिदानीं सन्दिह्यते। एवन्तावत्—'आत्मतन्त्रेषु यन्नोक्तम्'—इत्यनेन पारतन्त्रिकमपि कर्त्तव्यतयोपदिष्टम्, 'जनोवाप्यतिरिक्तोवा'—इत्यनेन 'यः स्वशाखोक्तमुत्सृज्य'—इत्यनेन च पुनरेतन्निषिद्धम्, किं पुनरत्र तत्त्वम्? उभयं तत्त्वमित्याह। कुतः? उभयोरेवोपदेशात्। विरुद्धं तर्हि? न। विषयभेदात्। कथम्? उच्यते। 'आत्मतन्त्रेषु यन्नोक्तम्'—इति तावत् श्रौताभिप्रायम्। 'जनोवा'—इत्यादिकन्तु गृह्यशास्त्राभिप्रायकम्; इति विषयभेदादुभयं तत्त्वमिति निश्चीयते। कथं पुनर्ज्ञायते;—गृह्यशास्त्राभिप्रायेणोत्तरः पक्षः—इति? पारिशेष्यादिति ब्रूमः। श्रौताभिप्रायेण पूर्वः पक्ष इति खल्ववोचाम। तस्मादुत्तरः पक्षः पारिशेष्याद्गृह्यशास्त्राभिप्रायेण भविष्यति।

इतश्चैतदेवं भविष्यति। अप्रमाणमृषिं कृत्वेत्यभिधानात्। नो खल्वपि श्रौतेषु पारशाखिकमाचरन् ऋषिमप्रमाणं करोति। न खल्वृषिः कर्त्ता वेदस्य। नित्योहि वेदराशिर्मीमांसकानाम्, अपौरुषेयश्चान्येषाम्। 'प्रवक्तेतिचेत्,—इति चेद्वान् पश्यति; माभूत् कर्त्ता ऋषिर्वेदस्य, प्रवक्ता तु भवति'। 'भवतु, किमतो-

भवति ?' 'एतदतो भवति,—यद्येवं, श्रौतेष्वपि पारशाखिकमाचरन् प्रवक्तारमृषिमप्रमाणं करोति'। 'नैतत् साधु मन्यामहे। पूर्व्वसिद्धां हि वाचमृषिः प्रोवाच। पारशाखिकश्चाचरन् तामेव वाचमप्रमाणं करोति, न ऋषिम्। न वा, नित्यनिर्दोषस्य पूर्व्वसिद्धस्य वेदस्य अप्रामाण्यमनुपन्यस्य परसिद्धस्य प्रवक्तुर्ऋषेरप्रामाण्यं युक्तमुपन्यसितुम्। तदधीनसिद्धत्वात्तस्य। गृह्यशास्त्राभिप्रायत्वे तु वाक्यस्यैतत् स्यात्। वेदार्थमनुस्मरन् खलृषिः प्रयोगशास्त्रं रचयाञ्चकार। तच्चातिक्रामन् नूनमृषिमप्रमाणं करोति। तदनुमितां श्रुतिमपि,—ऋषिमप्रमाणं कुर्व्वन्नेव अप्रमाणं करोति'। शास्त्रान्तरदर्शनाच्चैवमवगच्छामः। तथाच नीलाम्बरादिधृतं गृह्यपरिशिष्टान्तरम्।

"प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः।
प्रयोगशास्त्रताहानेरनारम्भविधानतः॥
बङ्कल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत्॥
श्रौतेषु सर्व्वशाखोक्तं सर्व्वस्यैव यथोचितम्।
स्मार्त्तं साधारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु"॥

इति। "यथोचितम्"—इति कुर्व्वन्नविरोधिनएव परोक्षस्य करणमनुजानीते। कात्यायनोऽपि कर्म्मप्रदीपे,—

"अक्रिया त्रिविधा प्रोक्ता मुनिभिः कर्म्मकारिणाम्।
अक्रिया च परोक्षा च तृतीया चायथाक्रिया"॥

इति गृह्यशास्त्राभिप्रायेण परोक्षां क्रियां निन्दित्वा,—

"यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्" ॥

इति श्रौतमेवाग्निहोत्रादिकं पारशाखिकं कर्त्तव्यमुपदिशति। तदेवमादिभिर्वचनैरवगच्छामः,—श्रौतेषु पारशाखिकं करणीयं न गृह्योक्तेषु,—इति।

आह। 'यदि प्रयोगशास्त्रं गृह्यादि परैर्न समुच्चीयते, परं तर्हि सामान्यं विधानमनर्थकं भवति'। 'यदि भवत्यनर्थकं, किमिति वयमुपालभ्येमहि'। 'न युष्मानुपालभामहे,—किन्तु, माभूदनर्थकमिति तदपि समुच्चिनुमः,—इति ब्रूमहे'। 'सत्यमेवं ब्रवीषि, न तु प्रमाणोपेतं ब्रवीषि। प्रयोगशास्त्रविरोधाद्धि नायं समुच्चयः सेद्धुमर्हति। योहि सामान्यस्यविधानस्यानर्थक्यं परिजिहीर्षुस्तदपि समुच्चिनोति, स खल्वयं स्वशास्त्राचार्यर्षिं प्रमाणं सन्तमप्रमाणं करोति। क्रममपि प्रयोगशास्त्रीयं विरुणद्धि। उत्सृजति च स्वशाखाश्रयं विधानम्। सेयं पितरमुपेक्ष्य श्वशुरे गाढ़ा भक्तिः। कात्यायनोऽपि,—

"स्वशाखाश्रयमुत्सृज्य परशाखाश्रयन्तु यः।
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्" ॥

इत्यनेन एनं निन्दति। योहि ऋषिभिर्निन्द्यते, स कथं श्रद्धेयवचनस्तत्रभवतां शिष्टानाम् भवेत्। 'अथ यथोभयमपि न विरोत्स्यते, तथा करिष्यामः'। 'नैवं शक्यम्'। 'कस्मात्?' 'असम्भवात्। स्वशाखाश्रयस्य खल्वन्तराऽन्तरा किमपि किमपि सामान्यं विधानं निवेशयन् सामान्यमपि विधानमाकुलयति,

स्वशाखाश्रयमपि । सोऽयं समुच्चयो न प्रयोगशास्त्रं न खल्वपि सामान्यं विधानमुपकरोति, क्रममन्यथयन् प्रधानमपि विगुणयति । तथाच, बुद्धिमिष्टवतो मूलमपि नष्टं स्यात्' । 'अथ, क्रमः पदार्थानामुपकारे वर्त्तते । पदार्थप्राप्तेरुत्तरकालं हि क्रम आपतति । यदा च पदार्थः प्राप्नोति, तदा क्रमएव नास्ति । न खलु पश्चिमसिद्धेन क्रमेण विरोधात् पूर्वसिद्धः पदार्थएव न कर्त्तव्यो भवति । तस्मात्, न्यायविरोधस्त्वत्पक्षे दोषः' । 'भवेदेतदेवम्,—यदि वचनमत्रार्थे प्रमाणं न स्यात् । अस्ति च वचनम्—प्रयोगशास्त्रम्—इत्यादि । किमिवहि वचनं न कुर्य्यात् । नहि वचनस्य कश्चिदतिभारोनाम । भवदीयेऽपि पक्षे न्यायान्तरविरोधोजागर्त्ति । न च पदार्थोऽपि पूर्वसिद्धः । सिषाधयिषितः खल्वेष भवता । विषमस्त्वायमुपन्यासः । सर्व्वपदार्थानां शेषभूताः खल्वाचमनादयः पर्.ऽप्राबल्यादनुष्ठीयन्ते, न सर्व्वे । न चात्रानुतिष्ठासितानां शेषत्वं प्रामाणिकम् ।

भिन्नानि चेमानि कर्म्माणि प्रयोगशास्त्रीयाणि सामान्यानि च नामसाम्येऽपि, यथासम्भवं रूपभेदादिभ्योहेतुभ्यः । संयोगचोदनाभेदमप्येतेषु बहुलमुपलभामहे । तत्रैवंसति कुत्र कस्य गुणानुपसंहरसि । कर्म्मभेदे गुणोपसंहारन्यायस्याविषयत्वात् । श्राद्धोऽसि चेत्, प्रयोगशास्त्रीयं विधानमनुष्ठाय यथासम्भवं सामान्यमपि विधानं कामं पृथगेवानुतिष्ठ । किमित्युभयमपि विधानमन्यथयित्वा नरसिंहाकारमभिनवं विधानान्तरं स्वरुचैव निर्म्मिणोषि । यथा खल्वेकस्माद्धाक्यादाख्यातपदमन्यस्माच्च नामपदं

गृहीत्वा योवाक्यार्थः सम्पद्यते पुरुषकल्पनामूलः, तादृशोह्ययं परिचिकल्पयिषितः प्रयोगोभवति। स खल्वनपेक्षणीयस्तत्रभवताम्। तथाचोक्तम्। "धर्म्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्"—इति। अतएव स्वशाखाश्रययोर्वैश्वदेवबलिकर्म्मणोरन्ते सामान्ययोरपि तयोः काममनुष्ठानं कात्यायनः स्मरति कर्म्मप्रदीपे,—

"न स्यातां काम्यसामान्यजुहोतिबलिकर्म्मणी।
पूर्व्वं नित्यविशेषोक्तजुहोतिबलिकर्म्मणोः॥
काममन्ते भवेयातां न तु मध्ये कदाचन।
नैकस्मिन् कर्म्मणि तत्ते कर्म्मान्यत्तायते यतः"।

इति। यदि समुच्चयं कात्यायनोऽभिप्रैष्यत्, नूनमवदिष्यत्। अवदनाच्चावगच्छामः,—नैष समुच्चयः कात्यायनस्याभिप्रेतः,—इति। तस्मादियमेवावधारणा,—श्रौतेषु पारशाखिकं सामान्यञ्च विधानं कर्त्तव्यम्, गृह्योक्तेषु तु पारशाखिकं न कर्त्तव्यमेव, सामान्यञ्च विधानं गृह्योक्तविधानानुष्ठानादनन्तरमिच्छया प्रयोगान्तररूपेण करणीयम्,—इति। तदेवं सति "प्रयोगशास्त्रम्"—इत्यादीनि वचनान्यनुगृहीतानि भवन्ति नान्यथा। श्रौतेषु च तासु तासु शाखासु तत्तत्शाखिनामेवर्त्विजां कर्म्मोपदिष्टं न सर्व्वेषाम्, सर्व्वशाखिभिश्चर्त्विग्भिः प्रायोयज्ञोनिर्व्वर्त्तते, न तावन्मात्रैः,—इति विशेषोऽप्यस्ति। अन्येऽपि विशेषाः शाखान्तराधिकरणे शारीरके च द्रष्टव्याः'।

रघुनन्दनस्त्वेतदनालोचयन् वचनञ्चापश्यन्,—'सर्व्वत्रैवा--

विशेषेणाकाङ्क्षितं पारशाखिकं करणीयं न अनाकाङ्क्षितम्'—इति कल्पयाञ्चकार । तदश्रद्धेयम् । आकाङ्क्षाऽपि तदभिप्रेता न प्रामाणिकी । यत्र हि यावती इतिकर्त्तव्यता निर्दिष्टा, तत्र ततएव आकाङ्क्षा निवर्त्तते—विशेषहेतुं विना, इति हि तान्त्रिकानां निर्णयः । अवश्यञ्च तेनाप्येतदङ्गीकर्त्तव्यम् । अन्यथा पारशाखिकगुणोपसंहारेऽप्याकाङ्क्षा न निवर्त्तेत । इत्यस्तु किं विस्तरेण ॥ ९३ ॥

पुनरुक्तमतिक्रान्तं यच्च सिंहावलोकितम् ।
गौभिले ये न गृह्णन्ति न ते ज्ञास्यन्ति गौभिलम् ॥९४॥

पुनरुक्तम्—उक्तस्य पुनःकथनम् । अतिक्रान्तम्—अतिक्रम्य संबन्धः व्यवहितयोजना इति यावत् । यच्च सिंहावलोकितम्—सिंहावलोकितन्यायेन पराचीनस्य पूर्व्वत्रान्वयः । ये खल्वेतत्त्रयं गौभिले—गोभिलगृह्यशास्त्रे न गृह्णन्ति, ते गोभिलगृह्यशास्त्रं तत्त्वतो न ज्ञास्यन्ति । उदाहरणमस्मीषां गृह्यसूत्रादस्मत्कृततद्भाष्याच्चोपलब्धव्यम् । विस्तरभयान्नेह प्रस्तूयते ॥ ९४ ॥

एतच्छास्त्राध्ययनफलमाह,—

गोभिलाचार्य्यपुत्रस्य योऽधीते संग्रहं पुमान् ।
सर्व्वकर्म्मस्वसंमूढः परां सिद्धिमवाप्नुयात् ॥ ९५ ॥

इति गृह्यासंग्रहे द्वितीयः प्रपाठकः ॥

गोभिलाचार्य्यपुत्रस्य संग्रहमिमं गृह्यासंग्रहाख्यं यः पुमानधीते, स खल्वयं सर्व्वकर्म्मसु गृह्योक्तेषु असंमूढः मोहरहितः परामुत्कृष्टां सिद्धिं प्राप्नोति ॥ ९५ ॥

अत्रैव शिवम् ॥

श्लोकाः—९५

आदितः श्लोकाः—२०८ ॥

कैकयेषु वसता द्विजन्मना
तन्त्रजालमवलोक्य निर्मितम् ।
जीवरन्ध्रमुनिचन्द्रसम्मिते
वत्सरे वृषगते रवाविदम् ॥ १ ॥
सर्गस्थितिप्रत्यवहारहेतौ
अलोकसामान्यनयप्रवृत्तौ ।
दोषाकरेऽप्यादरमादधाने
समर्पितं भाष्यमिदं स्मरारौ ॥ २ ॥
सत्यपि दोषकलापे गुणलेशनिबद्धपक्षपातानाम् ।
जनयतु विदुषां तोषं कृतिरेषा चन्द्रकान्तस्य ॥ ३ ॥
अन्ध इव स्फुटदोषे गुणेषु विरलेषु वैनतेयइव ।
जयति जगत्यां लोकः कतिपयइह नौमि तं भक्त्या ॥ ४ ॥

इति सेरपुरनगरवास्तव्यस्य राधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य ब्रह्ममयीसूनोः महामहोपाध्यायश्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गङ्गासंग्रहभाष्ये द्वितीयः प्रपाठकः समाप्तः ॥ समाप्तश्चेदं गङ्गासंग्रहभाष्यम् ॥

शुभमस्तु ॥ श्रीरस्तु ॥

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1275.

# RAVISIDDHĀNTA MAÑJARĪ.

A TREATISE ON ASTRONOMY,

BY

MATHURĀNĀTHA S'ARMĀ.

EDITED BY

BIS'VAMBHARA JYOTIṢĀRṆAVA,

*Author of Gupta Press Pañjikā and maker of Hindu Almanacs for the use of the High Court of Calcutta, the Government of Bengal, and the Government of Eastern Bengal and Assam.*

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1911.

Px.e.32 a

# भूमिका।

शास्त्रेषु ज्योतिःशास्त्रमेव सफलं प्रत्यक्षफलप्रदञ्च। तच्च त्रिधा विभज्यते गणितविद्या होराविद्या शाखाविद्या च। गणितेषु सूर्य्यसिद्धान्तादयो होरासु बृहज्जातकादयः शाखासु बृहत्संहिता-प्रभृतयः प्रसिद्धाः। इयं सूर्य्यसिद्धान्तमतोक्ता रविसिद्धान्तमञ्जरी गणितविद्यान्तर्भूता। अत्र अब्दपिण्डसाधन वत्सरारम्भकालनिर्णय-ग्रहमध्यगतिसाधन विषुवमक्रान्तिगणना-ग्रहबीजसंस्कारपद्धति-दिनवृन्दसाधन-निरक्षदेशनिर्णय-ग्रहरश्मिभोगकालवक्रगत्यति-चारादिनिर्णय-दृग्गणितैक्यसाधन-चन्द्रसूर्य्यग्रहणगणना-ग्राम-निर्णय-स्पर्शकालमोक्षकालसाधन स्थितिकालनिर्णयार्कबिम्बवर्णन-ग्रहणस्पर्शमोक्षदिङ्निर्णयादयो वर्त्तन्ते। अस्य ग्रन्थस्य रचयिता मथुरानाथपण्डितः किल गौड़भूमौ त्रिंशदधिकपञ्चदशशकाब्दात् किञ्चित् पूर्व्वं ज्योतिर्व्विद्वरविप्रकुले आविरभवत्। अनेन विपश्चित्प्रवरेण एकत्रिंशदधिकपञ्चदशशकाब्दे इयं रविसिद्धान्त-मञ्जरी रचितेति "दृष्टः शकाब्दः शशिरामबाणरूपैर्व्विशुद्धः कथितोऽब्दपिण्ड" इति वचनेन परिज्ञायते। अस्य ग्रन्थकर्त्तु-रपरेऽपि ग्रन्थाः सन्ति यथा;—जातकामृत-ग्रहार्णव-इत्यादयः। रविसिद्धान्तमञ्जर्याः प्राचीनहस्तलिपिदयं मत्सकाशे आसीत् तदेवावलम्ब्य इयं सम्पाद्यते।

यद्यत्र स्खलनं मे स्याद् विद्वद्भिः कृपया हि तत्।
संशोध्य पठतामेषा प्रार्थना विनतस्य मे॥

१८३३ शकाब्दाय
वैशाखस्य पञ्चदशदिवसे।

श्रीविश्वम्भरशर्म्मणः।

# शुद्धिपत्रम् ।

| अशुद्धम् । | शुद्धम् । | पृः । | पंक्तिः । |
|---|---|---|---|
| रामौ ... | रामो ... | १ ... | ५ |
| चरुद्धं ... | चराद्धं ... | ५ ... | १९ |
| खण्डेत्य ... | खण्डोत्य ... | ७ ... | ३ |
| ५ । १४ । १० ... | ५ । ३४ । १० ... | ४८ ... | ९ |
| ५९ । ८ । १० ... | ५९ । ८ । १० ... | ४९ ... | २ |
| दलं २९ । २४ । ५ | दलं २९ । ३४ । ५ | ४९ ... | १ |
| अस्तांग्रा १७९ ... | अस्तांग्राग्रीघ्रे ३२९ | ९५ ... | १ |
| ... ... | वक्रे १७९ ... | ९५ ... | १ |

# सूचीपत्रम् ।


| विषयः । | पत्रम् । | विषयः । | पत्रम् । |
|---|---|---|---|
| अब्दपिण्डः ... ... | १ | राशि भगणादिनिर्णयः ... | ३ |
| विषुववारादि वृत्तं ... | १ | भूमध्यरेखादेशनिर्णयः ... | ३ |
| गम्यं ... ... ... | १ | देशान्तरगणना ... ... | ३ |
| रवेर्ध्रुवं ... ... | १ | सूर्योदयिकग्रहनिर्णयः ... | ३ |
| विधोर्वृत्तं ... ... | १ | शीघ्रोच्चनिर्णयः ... ... | ३ |
| विधोर्गम्यं ... ... | १ | मध्यनिर्णयः ... ... | ३ |
| भौमस्य वृत्तं ... ... | १ | बीजांशनिर्णयः ... ... | ३ |
| भौमस्य गम्यं ... ... | २ | ग्रहबीजशोधनप्रणाली ... | ३ |
| बुधस्य वृत्तं ... ... | २ | रव्यादिग्रहाणां दिनभुक्तिनिर्णयः | ४ |
| बुधस्य गम्यं ... ... | २ | सौरमाने वैशाखादिमास | |
| गुरोर्वृत्तं ... ... | २ | समाप्ति कालनिर्णयः ... | ४ |
| गुरोर्गम्यं ... ... | २ | दिनवृन्दसाधनं ... ... | ५ |
| भृगोर्वृत्तं ... ... | २ | मन्दोच्चनिर्णयः ... ... | ५ |
| भृगोर्गम्यं ... ... | २ | तात्कालिकमन्दोच्चसाधनं ... | ६ |
| शनेर्वृत्तं ... ... | २ | इति प्रथमाध्यायः । | |
| शनेर्गम्यं ... ... | २ | ग्रहस्फुटसाधनं ... ... | ७ |
| राहोर्वृत्तं ... ... | २ | रविचन्द्रस्फुटभुक्तिसाधनं ... | ७ |
| राहोर्गम्यं ... ... | २ | कुजादिग्रहाणां स्फुटभुक्तिसाधनं | ८ |
| मन्दोच्चवृत्तं ... ... | २ | राहुकेतुस्फुटसाधनं ... | ८ |
| मन्दोच्च गम्यं ... ... | २ | ग्रहाणां राशिभोगकालः ... | ८ |
| दृङ्नतफलादिनिर्णयः ... | २ | अतिचारकथनं ... | ९ |

| विषयः। | पत्रम्। | विषयः। | पत्रम्। |
|---|---|---|---|
| भचक्रग्रहसन्निवेशकथनं ... | ९ | चरार्द्धनिर्णयः ... ... | १६ |
| पूर्व्वादिदिक्कथनं ... | ९ | लग्नादिनिर्णयः ... ... | १६ |
| नक्षत्रसञ्चारसाधनं ... | ९ | दिनभुक्तिनिर्णयः ... | १६ |
| तिथ्यादिसाधनं ... ... | ९ | दिवा रात्रिमाननिर्णयः ... | १७ |
| करणानयनं ... ... | १० | स्फुटलग्ननिर्णयः ... ... | १७ |
| राज्याद्यानयनं ... ... | १० | दिनमध्यच्छायानिर्णयः ... | १७ |
| विष्ट्यादिनिर्णयः ... ... | ११ | वारप्रवृत्तिज्ञानं ... | १८ |
| जलार्द्धकनिर्णयः ... ... | ११ | कालहोरापतिनिर्णयः ... | १९ |
| प्रभवादिवर्षनिर्णयः ... | १२ | दिनाधिपनिर्णयः .. | १९ |
| अब्दाधिपनिर्णयः ... | १२ | इति द्वितीयाध्यायः। | |
| मासाधिपनिर्णयः ... | १२ | चन्द्रग्रहणगणना ... | १९ |
| कुजादिग्रहाणां वक्रयागांशुः | १३ | शरनिर्णयः ... ... | १९ |
| वक्रांशुः ... ... | १३ | याम्यसौम्यशरनिर्णयः ... | १९ |
| वक्रसमयः ... ... | १३ | चन्द्रमाननिर्णयः ... | १९ |
| वक्रत्यागः ... ... | १४ | राहुमाननिर्णयः ... | १९ |
| अस्तोदयः ... ... | १४ | ग्रासनिर्णयः ... ... | १९ |
| कालांशादिः ... ... | १४ | स्थित्यर्द्धनिर्णयः ... ... | १९ |
| दृक्प्रत्ययसाधनं ... ... | १५ | स्पर्शकालनिर्णयः ... | १९ |
| अस्तस्थिति दिननिर्णयः ... | १५ | मोक्षकालनिर्णयः ... | १९ |
| अगस्त्योदयनिर्णयः ... | १५ | स्पर्श मोक्ष दिङ्निर्णयः ... | १९ |
| उत्तर दक्षिणानयननिर्णयः | १६ | सूर्य्यग्रहणगणना ... | २० |
| शङ्कुज्ञानं ... ... | १६ | विषुवच्छाया ... ... | २० |
| शङ्कुद्वारा समयनिर्णयः ... | १६ | याम्यात्तनिर्णयः ... | २० |
| छायाज्ञानं ... ... | १६ | नतदण्डादिनिर्णयः ... | २० |
| पूर्व्वादि दिक्निर्णयः ... | १६ | स्फुटलम्बननिर्णयः ... | २० |

| विषयः। | पत्रम्। |
|---|---|
| याम्यसौम्यगतिनिर्णयः ... | २० |
| स्फुटग्रहनिर्णय ... ... | २० |
| स्फुट चन्द्रमान रविमान- | |
| निर्णयः ... ... | २१ |
| ग्रामनिर्णयः ... ... | २१ |
| स्थित्यर्द्धदण्डनिर्णयः ... | २१ |
| स्पर्शकालनिर्णयः ... | २१ |
| मोक्षकालनिर्णयः ... | २१ |
| स्पर्श मोक्ष दिङ्निर्णयः | २१ |
| अर्कमण्डलस्य वेष्टनवर्ण- | |
| कथनं ... ... | २१ |
| ग्रासाङ्गुलनिर्णयः ... | २१ |
| मण्डलवर्णनिर्णयः ... | २२ |
| ग्रहणस्य कारणनिर्णयः ... | २२ |
| इति तृतीयाध्यायः। | |
| नतद्विगुणालम्बनखण्डाः ... | २३ |
| लम्बखण्डाः ... ... | २४ |
| विषुवध्रुवं ... ... | २५ |
| विषुवगम्यं ... ... | २५ |
| रवेर्ध्रुवं ... . | २५ |
| चन्द्रस्य ध्रुवं ... ... | २६ |
| चन्द्रस्य गम्यं ... ... | २६ |
| कुजस्य ध्रुवं ... ... | २७ |
| कुजस्य गम्यं ... ... | २७ |
| बुधस्य ध्रुवं ... ... | २८ |

| विषयः। | पत्रम्। |
|---|---|
| बुधस्य गम्यं ... ... | २८ |
| गुरोर्ध्रुवं ... ... | २९ |
| गुरोर्गम्यं ... ... | २९ |
| भृगोर्ध्रुवं ... ... | ३० |
| भृगोर्गम्यं ... ... | ३० |
| शनेर्ध्रुवं ... .... | ३१ |
| शनेर्गम्यं ... ... | ३१ |
| राहोर्ध्रुवं ... ... | ३२ |
| राहोर्गम्यं ... ... | ३२ |
| चन्द्रोच्चध्रुवं ... ... | ३३ |
| चन्द्रोच्चगम्यं ... ... | ३३ |
| अब्दाधिपध्रुवं ... ... | ३४ |
| अब्दाधिपगम्यं ... ... | ३४ |
| प्रभवादिवर्षध्रुवं ... | ३ |
| प्रभवादिवर्षगम्यं ... | ३५ |
| पूर्वाग्रकाब्दीयध्रुवादि ... | ३६ |
| रवेर्दिनादिमध्यभुक्तिः ... | ३७ |
| चन्द्रस्य दिनादिमध्यभुक्तिः | ३९ |
| कुजस्य दिनादिमध्यभुक्तिः | ४१ |
| बुधस्य दिनादिमध्यभुक्तिः | ४२ |
| गुरोर्दिनादिमध्यभुक्तिः ... | ४४ |
| भृगोर्दिनादिमध्यभुक्तिः ... | ४५ |
| शनेर्दिनादिमध्यभुक्तिः ... | ४६ |
| राहोर्दिनादिमध्यभुक्तिः ... | ४७ |
| बीजशोधितचन्द्रोच्चदिनभुक्तिः | ४८ |

| विषयः। | पत्रम् | विषयः। | पत्रम्। |
|---|---|---|---|
| रवेर्मन्दखण्डाः ... ... | ४९ | गुरोः शीघ्रखण्डाः ... | ९१ |
| चन्द्रस्य मन्दखण्डाः ... | ५१ | गुरोर्मन्दखण्डाः ... ... | ९३ |
| कुजस्य शीघ्रखण्डाः ... | ५३ | शुक्रस्य शीघ्रखण्डाः .. | ९५ |
| कुजस्य मन्दखण्डाः ... | ५५ | शुक्रस्य मन्दखण्डाः ... | ९७ |
| बुधस्यः शीघ्रखण्डाः ... | ५७ | शनेः शीघ्रखण्डाः ... | ९९ |
| बुधस्य मन्दखण्डाः ... | ५९ | शनेर्मन्दखण्डाः ... ... | १०१ |

# रविसिद्धान्तमञ्जरी ।

ॐ श्रीसूर्य्याय नमः ।

प्रणिपत्य जगद्विलोचनं रविसिद्धान्तमनोज्ञमञ्जरी ।
अबुधज्ञ-सुखावबुद्धये मथुरानाथसुता वितन्यते ॥

दृष्टः शकाब्दः शशिरामबाण
रूपै १५३१ र्विशुद्धः कथितोऽब्दपिण्डः ।
वारादिवृत्तं विषुवस्य रामौ
नवच्छिती पक्षशरौ युगाग्नी ३।१९।५२।३४ ॥
गम्यं[1] महीबाणविधूक्षरामौ
महीगुणौ वारिधिलोचनेन १।१५।३१।३१।२४ ।
रविध्रुवः स्यात् प्रतिवर्षमीशो
नगेक्षणे रूपशरौ गजाग्नी ११।२७।५१।३८ ॥
( विषुवस्फुटरविः ०।०।०।२९ )।
अक्षतचरार्द्धन्तु ११।२७।५२।७ ॥

वृत्तं विधोर्भूरिषुरग्निबाणौ
खपक्ष १।५।५३।५० गम्यन्तु कृतं दिनेशः ।
रसाब्धिशून्याम्बुधिनागवेदौ
४।१२।४६।४०।४८ भौमस्य वृत्तं दिरिषुः शराब्धि ॥

---

१ इदं गम्यं अब्दाहतं पुनर्वृत्तैः सह योजयेत् विषुवध्रुवं भवति ।

नवाग्नी २।५।२५।१८ गम्यन्तु रसाः शिवोऽब्धि
बाङ्क नवर्त्वग्नी ६।१ १।२४।८।२ ६ विद्स्तु वृत्तं।
वेदा नगोऽर्का मनवोऽथ गम्यं ४।७।१ २।१ ४
भूरब्धिदोर्व्वाणयुगे धृतिश्च १।२४।४५।१८ ॥
वृत्तं गुरोर्भूक्षतवो दिगिन्द्रो १।६।१ ०।१ ४
गम्यन्तु भूः खं समिधो रसाश्च १।०।२१।६।
वृत्तं भृगोस्त्रिर्नवबाङ्कशून्यं
तत्त्वञ्च ३।२८।०।२५ गम्यन्तु नगाः शरेन्दू ॥
रुद्रो नवाब्धी तपनः ७।१५।११।४८।१२ शनेस्तु
वृत्तं नवाद्रीन्दुभुजेषवोऽर्थाः ८।१७।५२।५ ।
गम्यं खमर्कस्तपनः खवाणौ
सिद्धोऽथ।०।१२।११।५०।२४ वृत्तं तमसोऽष्टभूपाः ॥
वेदाग्नि विश्वे ८।१६।२४।१३ ऽथ गम्यमभ्रं
नवेन्दू चन्द्राग्नि रविः षड़ग्नी।०।१८।२१।११।२६।
मन्दोच्च वृत्तं शशिनस्तु तर्का
नन्दो रसाचीन्दू भुवौ च ६।८।२६।११। गम्यम् ॥
रूपं दिगिन्दब्धिखमब्धिबाणौ।१।१०।४१।०।५४
भूमध्यदेशे विषुवच्चणीयम्।
अब्दाहतं गम्यमथ स्ववृत्ते-
र्युक्तः ध्रुवं स्यादिषुवादिकं तत् ॥

वारादितद्वारकलापलाद्यं ग्रहास्तु राश्यंशकलादिकाः स्युः।
शष्ट्या पलं स्यादिपलैः पलैस्तु षष्ट्या कला स्यादथ ताभिरंशः ॥

षष्ठ्याथ तस्मात् खगुणेन ३० राशिस्तद्वाङ्कचन्द्रैर्भगणो गणेयः ।
भूमध्यरेखा कनकाद्रिलङ्का मध्यस्थदेशाः किल वत्सगुल्मौ ॥
काञ्चीसरः सन्निहितं कुरूणां चेदं तथाऽयुज्जनिकाप्यवन्ती ।
सिताचलस्थोज्जयिनी च देवकन्या च रोहितकगर्गवाटौ ॥
रेखा खदेशान्तरयोजनाङ्को २०५, द्विधाकृतात्रेन ४ विशोधितः स्यात् ।
षष्ठ्याकलाद्यं विषुवत्कलादौ रेखा पुरःपश्चिमयोः खमृणम् ॥
विशोध्य षष्ठ्यैर्विषुवत्कलाद्यं रव्यादिभुक्तिघ्नमितं खषड्भिः ६०।
कलादितत्तद्भवकेषु योज्यं वर्षादिसूर्य्योदयिका ग्रहाः स्युः ॥
रविः कुजेज्यार्कतनूद्भवानां ग्रीघ्रोच्चसंज्ञः स्वयमेव मध्याः ।
खग्रीघ्रतुङ्गौ मृगुजेन्दुपुत्रौ मध्यस्थयोः खस्य च भानुरेव ॥

रूपं युगाग्नी रवि १।३ ४।१२ रंध्रकाद्य-
मब्दात् खवाणाघ्न ५० कलादियुक्तम्[१] ।
बीजं भवेदेतदनेन गण्या
ग्रहा यतो दृष्टिषु संवदन्ति ।
बीजं बुधोच्चेऽब्धि (४) गुणं गुण(३)घ्नं
योज्यं घनावण्यथ शोधनीयम् ॥
गुरौ भुजघ्नं त्रिगुणं सितोच्चे
राहौ विधूच्चे च निशाकरघ्नम् ।
बाणेन्दुतो हीनमथाधिकं वा
यदत्र राश्यर्द्धकलादिगुण्यम् ॥

---

१ वर्षान्तरे १।१२। विकलानुकला मिश्रयेत् तेन बीजांशा भवन्ति ॥

गत्या ग्रहाणां खचरे चरार्द्ध-
लिप्तादि लब्धं खरसै ६० हृतं खम्।
कलादिकैषां किल मध्यभुक्ति-
र्भानोर्नवेषु वसवो दशाथ ५९।८।१० ॥
खनन्दशैला हतवह्निबाहु-
शरौ ७९०।३४।५२ विधोर्भूमिभुवः कुवह्नी।
२१।२६।२८ रसाक्षिणी नागभुजौ बुधोच्च-
भुक्तिः शराब्ध्यक्षिरदाः कुबाहू २४५।३२।२२ ॥
गुरोर्थुगं नन्दशरौ नवाथ ४।५९।९,
सितोच्चभुक्तौ रसनन्दसद्रिः।
गुणाब्धि ९६।७।४३ मन्दस्य भुजौ खमग्नि
पक्षाव २।०।२३ याग्निः खभुवौ युगाब्धी ३।१०।४४ ॥
राहोर्विधूच्चस्य तु षट् कुवेदौ ६।४१
भुक्तिर्भवेदेकदिने गतिर्या।
कम्री ३१ गुणाङ्गानि च ६३ वेदनन्दौ ९४
तत्वेन्दवः १२५ षट् तिथयोऽ १५६ ग्रहिच्छाः १८७ ॥
मैत्राश्विनौ २१७ तर्कजिनाः २४६ षडृचं २७६
पक्षाभ्ररामा ३०५ विग्निखामराश्च ३२५।
शराङ्गरामा ३६५ इति सौरमाना-
द्वैशाखमासादि समाप्तितः स्यात् ॥

## अथ द्युवृन्दसाधनम्।

षष्ट्या विशुद्धा विषुवस्य नाड़ी योज्या चरार्द्धोनयुता तथैव।
अभीष्टनाड़ी सहिता च भूयो द्युवृन्दमस्मात् कथितं ग्रहाणाम्॥
द्युवृन्दमस्मात्तु गताहयुक्ताद्वारोऽद्रि ७ शेषोऽब्दमुखाहयुक्तः।
अभीष्टवारे सति तद्द्युवृन्दं न्यूनाधिकत्वे विधुयुक्तहीनम्॥
रव्यादिभुक्त्या गुणिताद्युवृन्दादंशादि योज्यं खरसेन ६० लब्धम्।
एवं कलाद्यात् कलिकादियोज्यं ग्रहेषु राशिः खगुणेन ३०भागात्[1]॥

## अथ मन्दोच्चराश्यादि।

मन्दोच्चमर्कस्य भुजौ नगेन्दू
रसेन्दू वेदेषु २।१ ७।१ ६।५ ४ पुरोक्तमिन्दोः।
भौमस्य वेदा दशनेत्रमब्धि-
भुजौ ४।१ ०।२।२ ४ विदः सप्तदिगद्रिपक्षौ॥
रूपाग्नयौ ७।१ ०।२ ७।५ १ देवगुरोस्तु वाणा
रूपाक्षिणी रूपभुजौ महेशः ५।२ १।२ १।१ १।
भृगोर्भुजौ नन्दविधू कृवाणौ
वेदाग्नी २।१ ८।५ १।३ ४ मन्दस्य नगा रसाक्षौ॥
सप्ताग्नी रूपाग्नी च ७।२ ६।३ ७।३ १ राशिभाग-
कलाद्यमेतत् कथितं क्रमेण।

---

१ अथ दिनवृन्दं संख्यादिनलवे षष्ठ्या विशुद्धविषुवदङ्गपललवे चरार्द्धं दिनमानाधिके हीनं दिनमानाख्ये युक्तमिति दिनवृन्दं भवति।

## अथ तात्कालिक-मन्दोच्चसाधनम् ।

मेषेषू ५१७ भानोः, क्षितिजस्य खाष्ट-
नन्दा ९८० बुधस्याग्निकृते ग्रहस्य ५४२ ।
जात्यच्चि २२२ जीवस्य सितस्य वाण-
सप्ताग्नयोऽ ३७५ ष्टार्कशराः शनेश्च ५१२८ ॥
अब्दादमीभिर्हतलब्धलिप्ताः
स्वमन्दतुङ्गस्य कलासु योज्याः ।

इति श्रीमधुरानाथकृतायां रविसिद्धान्तमञ्जर्य्यां
मध्यशीघ्रादिनिर्णयः ।

## अथ ग्रहाणां स्फुटसाधनम्।

कर्मैकमर्कस्य विधोश्च मान्दं भौमादिकानां चितयं क्रमेण।
शैघ्रस्य मान्दस्य पुनश्च शैघ्रं तत्रान्त्यशैघ्रस्य फलं दिनिघ्नम्॥
रवौ च चन्द्रे निजमन्दकेन्द्रात् खण्डेत्यभागादिफलं धनर्णम्।
भौमादिके शीघ्रफलं स्वमध्ये तस्माच्च मान्दानि फलानि मध्ये॥
तेनैव तन्मान्दफलोपकृप्ते तदन्तशैघ्रस्य फलं स्वमृणम्।
स्वमन्दतुङ्गादथ शीघ्रतुङ्गाद् ग्रहोविशुद्धः स हि केन्द्रसंज्ञः॥
षड्भाधिकस्येद् भगणादिशुद्धस्तद्भांशमंख्यस्तपनादिखण्डः।
भोग्यघ्नशेषात् खरसेन ६० लब्धैर्युतोनितः खण्डविवृद्धिहान्या॥
खण्डाच्च भागादिखतर्क ६० लब्धं मेषादिकेन्द्रेषु[1] धनं ग्रहेषु।
तुलादिकेन्द्रे तु[2] ऋणं विधेयं दृत्यं ग्रहा भानुमुखाः स्फुटाः स्युः॥

## अथ रविचन्द्रमसोः स्फुटभुक्तिसाधनम्।

खण्डानुखण्डान्तरमाचभोग्यं केन्द्रे विभांशे पुनरादिखण्डः।
स्फुटक्रियायां यदि शेषखण्डो ग्राह्यः स तेनैव तु भोग्यकार्य्यम्॥
रवीन्दुभुक्तेर्दलतः स्वभोग्ये निघ्नात् खरामेण ३० फलं यदाप्तम्।
केन्द्रे[3] मृगादावथ[4] कर्कटादौ भुक्तावृणं स्वं स्फुटभुक्तिरेषा॥

---

१ एकराशिमारभ्य षड्राशिपर्य्यन्तं मेषादिकेन्द्रं धनम्।
२ सप्तमराशिमारभ्य द्वादशराशिपर्य्यन्तं तुलादिकेन्द्रं ऋणं ज्ञातव्यम्।
३ दशमराशिमारभ्य द्वितीयराशिपर्य्यन्तं मकरादिकेन्द्रम्।
४ चतुर्थराशिमारभ्य नवमराशिपर्य्यन्तं कर्कटादिकेन्द्रम्।

## अथ कुजादिग्रहाणां स्फुटभुक्तिसाधनम्।

खमान्द्यभोग्याहतमध्यभुक्तिर्दलात् खरामाप्त ३० फलैर्युतोना।
मध्यागतिः खण्डकहानिवृद्ध्या कुजादिकानामिति मन्दभुक्तिः॥
मन्दा गतिः शीघ्रगतेर्विहीना खशीघ्रभोग्योनहताः खरामैः ३०।
लब्धोनयुक् खण्डकहानिवृद्ध्या खमान्द्यभुक्तिः स्फुटभुक्तिरेषा॥
उनेऽधिके तुल्यत एव शोध्या मन्दा गतिर्वक्रगतिस्तदा स्यात्।
सैकाहभुक्तिः स्फुटवर्त्तमानः स्फुटान्तरं वा स्फुटभुक्तिरिष्टा॥
अंशीकृतां स्वष्टगताङ्कभुक्तिं भानोः स्फुटांशादिफलेन हत्वा।
रसेन लब्धं कलिकादिकार्य्यं स्फुटे विधौ भानुवदूनयुक्तम्॥

## अथ राहुकेत्वोः स्फुटसाधनम्।

राज्ञः स्फुटं स्याद्भगणाद्विशोध्य षड्राशियोगः स हि केतुरुक्तः।
न्यूनोऽधिको वा यदि राशिभागः कलीकृतो भुक्तिहतो दिनाद्यम्।
गम्यं गतं संक्रमणेऽथ राहोर्वक्रक्रियग्रहाणामपि जातगम्यम्॥

## अथ ग्रहाणां राशिभोगकालः।

खवह्नयः ३० सांघ्रिदिने २।१५ त्रिपञ्चौ ४५।
गजेन्दवो १८ वर्षमहो १ रसाब्धि २६।
सार्द्धाब्ध्युग्मं २।६ सदलञ्च वर्षं १।६
रव्यादिराशिस्थितिकाल उक्तः॥

## अथातिचारि कथनम्।

ग्रहोऽन्यराशिं यदि शीघ्रगत्या यात्यल्पकालेन तदातिचारी।
सदैव शीघ्रं गमनं रवीन्दो र्व्यक्तात्तु पृष्ठेन गतिः कुजादेः॥

शैघ्रान्त्यकेन्द्रेऽर्क १२ भुजै २ क १ राग्नौ
शीघ्राः समा वह्नि ३ दिगी १० श११ संख्ये।
मन्दागतिर्नाग ८ नवा ९ ब्धि ४ भेषु
प्रायेण वक्राः शर ५ षण् ६ मुनिषु ७॥

भ्रमद्भचक्रेऽनु सुमेर्व्ववामं धुस्थरपुष्पप्रतिमे प्रवामम्।
भ्रमन्त्यधोऽधःस्थितपूर्व्ववक्राः शनीज्यभौमार्कसितज्ञचन्द्राः॥
यस्यां भ्रमन् भानुरुदेति सा दिक् प्राची प्रतिच्यस्तमुपैति यस्यां।
वामोऽन्यतोऽस्योत्तरदक्षिणे तन्मध्येऽयुदग् भूगण यस्य मेरुः॥

## अथ ग्रहाणां नक्षत्रसञ्चारसाधनम्।

कल्पीकृतानां स्फुटखेचराणां
खखाष्ट ८०० लब्धं गतभं खखेभात् ८००।
शेषोणिताद् भुक्तिहृतं दिनाद्यं
शेषाङ्घ्रिपादोपि शतद्वयेन २००॥

## अथ तिथ्यादिसाधनम्।

अर्कोनचन्द्रांशगणादिनाप्ता तिथिर्गतार्कोनितशेषतस्तु।
कल्पीकृतात् खाङ्ग ६० गुणाच्च गम्या रवीन्दुभुक्त्यन्तरलब्धलिप्ता॥

कलीकृतात् षष्टौ ६० गुणाच्च शेषाद् भुक्त्यन्तरान्नाप्तिथियातदघ्नाः।
कलीकृतेन्दोः खखनागच८००लब्धमतीतभं खाभ्रगजोनशेषात् ८०० ॥
षष्ट्या ६० गुणाद् भुक्तिहृतं कलाद्यं षष्टिघ्नशेषाद् भगता घटी स्यात्।
एवं रवीन्दोर्मिलितेन योगाद् भुक्तिद्वयान्ना घटिका च तद्वत् ॥
तिथ्याद्यमेकान्तरितं यदि स्यात् तज्ज्ञातलिप्तान्वितपूर्वलिप्ता।
षष्ट्याविशुद्धा घटिका विधेया तिथ्यादिकानां त्वयमागतानाम् ॥

## अथ करणानयनम्।

द्विघ्नीतिथिस्तद्दलयोर्भुजैकहीनाग ७ घ्निष्टं करणं ववाद्यम्।
उपान्त्यतिथ्याः शकुनिः परार्द्धे पूर्वे तु दर्शस्य दले चतुष्पात्।
नागः परार्द्धेऽथ सितादितिथ्याः किन्तुघ्नसंज्ञं करणं सुखार्द्धे ॥

## अथ राशाद्यानयनम्।

अथाब्दपिण्डान्नगशेषतः स्युः शुक्रेन्दुजीवार्कबुधार्किभौमाः।
पुनः क्रमात्तत् प्रथमोऽत्र राजा मन्त्री ततस्तोयपशस्यनाथौ ॥
मेघोऽब्दतो वेदहृतावशिष्टः प्राक् पुष्करद्रोणदृति द्वितीयः।
आवर्त्तसम्बर्त्तकनामधेयौ नागावशिष्टोऽब्दतएव नागः ॥
शङ्खोऽप्यनन्तः किलवासुकिश्च पद्मोमहापद्मकतक्षकौ च।
कुलीरकर्कोटकनामधेयौ भुजान्विताब्दाद्दसुभि ८ र्गजाः स्युः ॥
ऐरावतः स्यादथ पुण्डरीकः सवामनः स्यात् कुमुदोऽञ्जनश्च।
स्यात् पुष्पदन्तोऽथसार्व्वभौमः ससुप्रतीकश्च जलंवहन्ति ॥
सप्तावशिष्टाब्दगणात् समीरा वाह्यावहौ च प्रवहः क्रमेण।
समंवहाख्यो निवहोद्वहौ च तत् सप्तमः स्यादिवहोऽथ सान्नात् ॥

अब्ध्यङ्गगः स्युर्वणेत्तुमद्यधृताब्धिदध्यब्धिपयोजलाख्याः।
क्रमात् समुद्राः सलिलानि तद्वत् अब्ध्यङ्गगैः प्रेषितसंख्ययाङ्काः॥
विश्वो नवेन्दूगिरिरन्ध्रोमेचं नन्दाक्षिथिः सप्त पुनः क्रमेण।

१३।१८।११।१७।८।१५।७।

वर्षा च धान्यं तृण शीत घर्मा
वायुः प्रजावृद्धि जन क्षयौ च॥

नृपस्य युद्धं क्रमशोऽथ भानो
र्जलाढ़काः कर्कटसंक्रमेण॥

मेषोत्तमीने मिथुने हिमांशौ
शतं १०० षड़ङ्का ८६ घटतौलिकोटे।
कर्केऽपि कन्या मृगयोरशीति ८०
स्त्रापे मृगेन्द्रे च खपञ्च ५० संख्याः॥

जलाढ़केभ्यो दशलब्धमङ्कं
हन्याच्छरै ५ रग्निभिरीक्षणेन।
क्रमात् समुद्रेऽद्रिषु भूमिपृष्ठे
तथा जलं वर्षति वारिवाहः॥

## मतान्तरे जलाढ़कानयनम्।

युग्माजगोमीनगते शशाङ्के रविर्यदा कर्कटकं प्रयाति।
जलं शताढ़ं १०० हरिकार्म्मकेऽङ्कं ५० वदन्ति कन्यातुलयोरशीतिम् ८०॥
कुलीरकुम्भालिमृगे शशाङ्के, षड़्भिः प्रयुक्तां नवतीं ९६ वदन्ति।

## अथ प्रभवादिवर्षानयनम्।

वृत्तं खमा मासदिनादिरूप, ग्ररौ मही षट् च ग्ररानलौ च॥
५१।१।६।३५। गम्यन्तु भूः खं युगमब्धिचन्द्रौ
गुणाब्धिसूर्याः १।०।४।१२।४३।१२ ध्रुववद् गणेयम्।
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः, स्याद्ब्रह्मणो विंशतिरादिभूता॥

## अथ सम्वत्सरादिवर्षानयनम्।

विष्णोर्द्वितीया चरमा च रौद्री ततः ग्ररा ५ ग्नानि युगानि शेषाः।
सम्वत्सराः स्युः परिवत्सरेदानूद्वत्सराः पञ्च पुनः क्रमेण॥

## अथाब्दाधिपानयनम्।

The author Aśvaghoṣa has been described as the son of Suvarṇākṣī, an inhabitant of Sāketa, Ārya, Bhadanta, Mahāpaṇḍita and Mahāvādin. All this points him out as a great Buddhist preacher and writer. Nanjio attributes seven works to him and Suzuki enumerates eight works as composed by him. The awakening of faith in Mahāyāna translated by Suzuki into English belongs undoubtedly to the Mahāyāna school. But the doctrine of Śūnyavāda or spiritual nihilism of Nāgārjuna has not yet been developed, while the idea of saving others and not being contented with the saving of one's own soul differentiates Aśvaghoṣa's doctrines from the older Śrāvakayāna, which remains content with one's own salvation only. There is an Indian tradition preserved in China that Aśvaghoṣa was the spiritual preceptor of Kaniṣka, the great Indo-Scythian monarch of Peshwar. In the list of patriarchs of Buddhism his place is third in the descending line from that of Pārśva, who presided at the great council of Kaniṣka, and third in the ascending line from Nāgārjuna, the founder of Śūnyavāda. All this shows that he must have flourished about the end of the 1st century A.D. Because Nāgārjuna's date is very nearly fixed by the inscription of his *prāśiṣya* in the Jaggayyapeta Stupa.[3] That

[1] Report on a search of Sanskrit and Tamil Manuscripts for the years 1893-94, pp. 24 and 32.

[2] Z.D.M.G., p. 117. [3] See Arch. Rep., South Ind., Burgess, p. 112.

inscription is written in the third century Kusan Brahmi (and not in later Gupta as Burgess seems to suppose in putting it down at 600 A.D.), so Nāgārjuna must have flourished two successions before him, *i.e.*, about the end of the 2nd century A.D., and Aśvaghoṣa two successions previous to Nāgārjuna, and so he must have flourished about the end of the 1st century.

It may be suggested here that the inscription[1] in the Aśoka pillar at Sāranātha recording something of Rājā Aśvaghoṣa in the 40th year (of Kaniṣka) (?), may be referred to our author, as powerful monks even in our days have the appellation of Rājā and Mahārāja given to them. Thus there is a chain of evidence to connect our author with the early period of Indo-Scythian dominion in India.

As to the place of his birth Suzuki cites several Indian traditions known in China and concludes that he may have been born anywhere in India but in the north. But the tradition embodied in the colophon of the palm-leaf manuscript of Nepal written undoubtedly in the 12th century is much more reliable than echoes of Indian traditions from China; and according to that tradition he was an inhabitant of Sāketa, a city in the modern province of Oudh. That he was a Brahmin by birth is evident from his intimate knowledge of the Vedic lore displayed both in Sāundarananda and Buddhacarita.

Besides the works attributed to him by Nanjio and Suzuki there is another work known in India alone which has undergone a peculiar transformation in the hands of the followers of Śaṁkara. This work is entitled Vajrasūcī or the diamond-needle. It is a polemical work written with great power against the caste-system. Professor Bendall describes it in his Cambridge Catalogue. Rev. Mr. Williamson got a copy of the work at Elichpur, in the

[1] Epi. Ind., Vol. VIII, pp. 171, 172.

Berars, published it in 1839 with a refutation by a Brāhmaṇa, entitled Vajrasūcīṭanka. A MS. of the work is to be found in our Library. But in our Library there are other copies of the Vajrasūcī written almost in the same words but regarded as Upaniṣads and attributed to Śaṁkarācārya. It shows how deeply the Advaitamata is indebted to the great writers of the Mahāyāna school.

The Kavivacanasamuccaya, an anthology discovered by me in Nepal quotes Aśvaghoṣa.[1] It would be exceedingly interesting to compare the verses attributed to Aśvaghoṣa in that work with those in Buddhacarita and Saundarananda. But the work is not in India. It has been borrowed by Mr. Thomas of the India Office Library, who is editing it and who will undoubtedly make the comparison, which I am not in a position to do. But one thing is certain. The MS. is written in the 10th century character and the latest poets mentioned are Bhavabhūti, Murāri and Rājaśekhara, who flourished in the 8th, 9th and 10th centuries, respectively. The work may be safely put down in the 10th century, shewing that at that time Aśvaghoṣa was counted among the great poets of India. So popular was Aśvaghoṣa in ancient and mediæval India that many other poets have been confounded with him. Just as in Bengali common tradition, any pretty story or any smart saying is attributed to Kālidāsa, so the works of many minor poets used in ancient India to be attributed to *the* great poet of Buddhism. Mr. Thomas has ably dealt with these,—what he, following Tārānatha, calls different names of Aśvaghoṣa—in his article in the Album Kern and in his paper on Mātriceṭa and Mahārāja Kanikalekha in the Indian Antiquary, September, 1903, so that I need not discuss the question here at all.

---

1 My Rep. for 1895 to 1900, pp. 21 and 22.

# सौन्दरनन्दम् काव्यम्।

## प्रथमः सर्गः।

ॐ नमो बुद्धाय।

गोतमः कपिलो नाम मुनिर्धर्मभृतां वरः।
बभूव तपसि श्रान्तः काश्यपोवानिव गोतमः ॥१॥
अग्निश्रियत् यस्य ततं दीप्तं काश्यपवत्तपः।
सुश्रियाय च तद्वृद्धौ सिद्धिं काश्यपवत् पराम् ॥२॥
हविषे यश्च स्वात्मार्थं गामधुक्षत् वशिष्ठवत्।
तपःग्निष्टेषु ग्निष्टेषु गामधु(धो)क्षत् वशिष्ठवत् ॥३॥
माहात्म्यात् दीर्घतपसो यो द्वितीय इवाभवत्।
तृतीय इव यश्चासीत् काव्याङ्गिरसयो र्द्वियो ॥४॥
तस्य[1] विस्तीर्णतपसः पार्श्वे हिमवतः शुभे।
चैत्यं चायतनञ्चैव तपसा माश्रयो[2]ऽभवत् ॥५॥
[3]चारुवीरुत्तरुवनः प्रस्निग्धमृदुशाद्वलः।
हविर्धूमवितानेन यस्मादाभ्र इवाबभौ ॥६॥
मृदुभिः सैकतैः[4] स्निग्धैः केसरास्तरपाण्डुभिः[5]।
भूमिभागैरसंकीर्णैः साङ्गरागः[6] इवाभवत् ॥७॥

---

१ P. M. तस्या T.
२ P. M. आश्रियो T.
३ P. M. चरु॰ T.
४ P. M. सैकटैः T.
५ केसरास्तरपाण्डुभिः।
६ P. M. साङ्गराग।

शुचिभिस्तीर्थसंख्यातैः पावनैर्भावनैरपि ।
बन्धुमानिव यस्तस्थौ सरोभिः ससरोरुहैः ॥८॥
पर्य्याप्तफलपुष्पाभिः सर्व्वतो वनराजिभिः ।
शुशुभे वर्द्धते चैव नरः साधनवानिव ॥९॥
नीवारफलसन्तुष्टैः स्वस्थैः[१] शान्तैरनुत्सुकैः ।
आकीर्णोऽपि तपोभृद्भिः शून्यशून्य इवाभवत् ॥१०॥
अग्नीनाम् हूयमानानाम् शिखिनाम् कूजतामपि ।
तीर्थानाञ्चाभिषेकेषु शुश्रुवे तत्र निस्वनः ॥११॥
विरेजुः हरिणा यत्र सुप्ता मेध्यासु[२] वेदिषु ।
सलाजैर्माधवीपुष्पैरुपहाराः कृता इव ॥१२॥
अपि क्षुद्रमृगा यत्र शान्तास्येरुः समं मृगैः ।
अरण्येभ्यस्तपस्विभ्यो विनयं शिक्षिता इव ॥१३॥
सन्दिग्धेऽपि पुनर्भावे विरुद्धेष्वागमेष्वपि ।
प्रत्यक्षिण[३] इवाकुर्व्वंस्तपो यत्र तपोधनाः ॥१४॥
यत्र स्म मीयते[४] ब्रह्म कैश्चित् कैश्चित् न मीयते[५] ।
काले निमीयते[६] सोमो[७] न चाकाले प्रमीयते[८] ॥१५॥
निरपेक्षा[:]शरीरेषु धर्म्मे यत्र स्वबुद्धयः ।
संदृष्टा इव यत्नेन[९] तापसास्तेपिरे तपः ॥१६॥

---

१ P. M. सुस्थैः ।
२ P. M सुप्तमध्यासु ।
३ P. M. प्रदक्षिण ।
४ P. M. लीयते ।
५ P. M. निलीयते ।
६ P. M. भूमौ ।
७ P. M. प्रलीयते ।
८ P. M. यत्तेन ।

आस्थिनो मुनयो यत्र स्वर्गायोद्युक्तचेतसः ।
तपोरागेण धर्मस्य विलोपमिव चक्रिरे ॥१७॥
अथ तेजस्विसदनं[1] तपःक्षेत्रं[2] तमाश्रमम् ।
केचिदिक्ष्वाकवो जग्मू राजपुत्रा विवत्सवः[3] ॥१८॥
सुवर्णस्तम्भवर्ष्माणः सिंहोरस्का महाभुजाः ।
पात्रं शब्दस्य महतः[4] श्रियाश्च[5] विनयस्य च ॥१९॥
अर्हरूपा ह्यनर्हस्य[6] महात्मानस्सुलात्मनः ।
प्राज्ञाः प्रज्ञाविमुक्तस्य भ्रातव्यस्य यवीयसः ॥२०॥
साम्राज्यसुखादुपगतां ते श्रियं न विषेहिरे ।
ररक्षुश्च[7] पितुः सत्यं यस्माच्छिश्रियिरे वनम् ॥२१॥
तेषां मुनिरुपाध्यायो गोतमः कपिलोऽभवत् ।
गुरोर्गोत्रादतः कौत्सास्ते भवन्ति स्म गौतमाः ॥२२॥
एकपित्रोर्यथा भ्रात्रोः पृथग्गुरुपरिग्रहात् ।
राम एवाभवत् गार्ग्यो[8] वासुभद्रोपि गोतमः ॥२३॥
आकृतत्रप्रतिच्छन्नं[9] वासं यस्माच्च चक्रिरे ।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः ॥२४॥

---

१ P. M. तेजास्वसदने ।
२ P. M. ०क्षत्रं ।
३ P. M. विवस्वभूः ।
४ P. M. मेदतः ।
५ P. M. श्रियाच ।
६ P. M. ह्यनेहस्य ।
७ P. M. सरक्षुश्च ।
८ P. M. गर्ग्यो ।
९ P. M. श्रोकवत्रपरिच्छन्नं ।

स तेषां गोतमश्चक्रे खवंशसदृशीः[१] क्रियाः ।
मुनिरत्र्यः [२]कुमारस्य सगरस्येव भार्गवः ॥२५॥
कण्वः शाकुन्तलस्येव भरतस्य तरस्विनः ।
वाल्मीकिरिव धीमांश्च धीमतोः मैथिलेययोः ॥२६॥
तद्वनं मुनिना तेन तैश्च चचियपुङ्गवैः ।
शान्तां गुप्ताञ्च युगपत् ब्रह्मचत्रश्रियं दधे ॥२७॥
अथोदकलसं गृह्य तेषां वृद्धिचिकीर्षया ।
मुनिः स वियदुत्पत्य तानुवाच नृपात्मजान् ॥२८॥
आपतेत्कलशाद्यस्मात् अक्षय्यसलिलात् महीम् ।
धारा तामनतिक्रम्य मामन्वे(न्व)त यथाक्रमम् ॥२९॥
ततः परमित्युक्ता शिरोभिः प्रणिपत्य च ।
रथानारुरुहुः सर्व्वे शीघ्रवाहनलङ्कृतान् ॥३०॥
ततः स तैरनुगतः स्यन्दनस्थैर्नभोगतः ।
तदाश्रममही[ं] यां तु परिचिक्षेप वारिणा ॥३१॥
अष्टापदमिवालिख्य निमित्तैः सुरभीकृत[ा]म् ।
तामुवाच मुनिः स्थित्वा भूमिपालसुतानिदम् ॥३२॥
अस्मिन् धारापरिक्षिप्ते नेमिचिह्नितलक्षणे ।
[३]निर्म्मीर्ध्वं पुरं यूयं मयि याते चिविष्टपम् ॥३३॥
ततः कदाचित् ते वीराः तस्मिन् प्रतिगते मुनौ ।

---

१ P. M. सदृशाः क्रियाः । २ P. M. मनिरत्र्यं ।
३ P. M. निर्म्मिताध्वं T ।

बभ्रमुः[:] [1]यौवनोद्दामा गजा इव निरङ्कुशाः ॥३४॥
[2]बद्धाङ्गुष्ठाङ्गुलित्राणा[3]हस्ताधिष्ठितकार्म्मुकाः[:] ।
अराध्नानं महात्राणं व्यायता विद्धवाससः ॥३५॥
जिज्ञासमाना नागेषु कौशलं श्वापदेषु च ।
अ[नु]चक्रुर्वनस्थस्य दौष्मन्तेर्दैवकर्म्मणः ॥३६॥
तान्[4] दृष्ट्वा प्रहृतिं यातान् वृद्धा[न्] व्याघ्रगिशूनिव ।
तापसास्तत् वनं हित्वा हिमवन्तं सिषेविरे ॥३७॥
ततस्तदाश्रमस्थानं शून्यं तैः शून्यचेतसः ।
पश्यन्तो मन्युना तप्ता व्याला[5] इव निश्वसुः ॥३८॥
अथ ते पुण्यकर्म्माणः प्रत्युपस्थितवृद्धयः ।
तच्च तज्ज्ञैरुपाख्यातान् अवापुर्महतो निधीन् ॥३९॥
अलं धर्म्मार्थकामानां निखिलानामवाप्तये ।
निधयो नैकविधयो भूरयस्ते गतारयः ॥४०॥
ततस्तत्प्रतिलम्भाच्च परिणामाच्च कर्म्मणः ।
तस्मिन् वास्तुनि वास्तुज्ञाः पुरं श्रीमत्यवेशयन् ॥४१॥
परिविस्तीर्णपरिखं स्पष्टाङ्कितमहापथम् ।
शैलकल्पमहावप्रम् गिरिव्रजमिवापरम् ॥४२॥
पाण्डुराट्टालसुमुखं सुविभक्तान्तरापणम्[6] ।

---

१ P. M. यविनोद्दासा T. २ P. M. बद्धगोष्ठाङ्गुलित्राणा T.
३ P. M. हस्तविष्ठित T. ४ P. M. तां T.
५ P. M. व्याजा T. ६ P. M. °रायनम् ।

हर्म्यमालापरिक्षिप्तम् कुक्षिं हिमगिरेरिव ॥४३॥
वेदवेदाङ्गविदुषः तस्थुषः षट्सु कर्म्मसु ।
शान्तये वृद्धये चैव यच्च विप्रानजीजपन् ॥४४॥
तद्भूमेरभियोक्तॄणाम् प्रयुक्तान् विनिवृत्तये ।
यच्च स्वेन प्रभावेन भृत्यैर्दण्डानजीजपन् ॥४५॥
चारित्रधनसम्पन्नान् सलज्जान् दीर्घदर्शिनः ।
अर्हतोऽतिष्ठपन् पैत्र्ये शूरान् दक्षान् कुटुम्बिनः ॥४६॥
व्यस्तैस्तैस्तैर्गुणैर्युक्तान् मतिवाग्विक्रमादिभिः ।
कर्म्मसु प्रतिरूपेषु सचिवांस्तान् न्ययूयुजन् ॥४७॥
वसुमद्भिरविभ्रान्तैरलंविद्यैरविस्मितैः ।
यद्बभासे नरैः कीर्णम् मन्दरः किन्नरैरिव ॥४८॥
यच्च ते हृष्टमनसः पौरप्रीतिचिकीर्षया ।
श्रीमन्त्युद्यानसंज्ञानि यशोधामान्यचीकरन् ॥४९॥
शिवाः पुष्करिणीश्चैव परमाप्यगुणाम्भसः ।
नाम्ना चेतनोत्कर्षात् दित्सु सर्व्वांश्चचीखनन् ॥५०॥
मनोज्ञा[:] श्रीमतीः प्रष्टीः[1] पथिषूपवनेषु च ।
सभाः कूपवतीश्चैव ममन्नात् प्रत्यतिष्ठिपन् ॥५१॥
हस्त्यश्वरथसङ्कीर्णं असङ्कीर्णजनाकुलम् ।
अनिगूढार्थ[2]विभवम् निगूढज्ञानपौरुषम् ॥५२॥

---

१ P. M. षष्ठीः ।
२ P. M. अनिगूढार्थि० ।

सन्निधानमिवार्थानाम् आधानमिव तेजसाम्।
निकेतमिव विद्यानाम् सङ्केतमिव सम्पदाम् ॥५३॥
वासवृत्तं गुणवताम् आश्रयं शरणैषिणाम्।
आनर्त्तं श्रुतशास्त्राणाम् आलानं वाङ्मयालिनाम्[१] ॥५४॥
समाजैरुत्सवैः दायैः[२] क्रियाविधिभिरेव च।
अलंचक्रुरलंवीर्य्यास्ते जगद्धाम तत्पुरम् ॥५५॥
यस्मादन्यायतस्ते च कञ्चिन्नाचीकरत्करम्।
तस्मादल्पेन कालेन तत्तदापूपुरत् पुरम् ॥५६॥
कपिलस्य च तस्यर्षेस्तस्मिन्नाश्रमवासिनि।
यस्मात्ते तत् पुरञ्चक्रुः तस्मात् कपिलवास्तु तत् ॥५७॥
ककन्दस्य मकन्दस्य[३] कुशाम्बस्येव चाश्रमे।
पुर्य्यो यथा हि श्रूयन्ते तथैव कपिलस्य तत् ॥५८॥

आपुः पुरं तत् पुरुहूतकल्पा-
स्ते तेजसार्य्येण न विस्मयेन।
आपुः यशोगन्धमतश्च शश्वत्
सुता ययातेरिव कीर्त्तिमन्तः ॥५९॥
तस्माथवन्तैरपिराजपुत्रै-
रराजकं नैव रराज राष्ट्रम्।

---

१ P. M. आज्ञानां वाङ्सालिनाम्। P. L. M. आलानां वाङ्-मान्दिनाम्। २ P. M. दाश्रियैः। ३ P. M. मकन्दस्य।

तारासहस्रैरपि दीप्यमानैः
अनुत्थिते[१] चन्द्र इवान्तरीक्षम् ॥६०॥
यो ज्यायानथ वयसा गुणैश्च तेषाम्
भ्रातॄणाम् वृषभ इवौजसा वृषाणाम् ।
ते तत्र प्रियगुरवस्तमभ्यषिञ्च-
न्नादित्या दशशतलोचनं दिवीव ॥६१॥
आचारवान् विनयवान् नयवान् क्रियावान्
धर्म्माय ने[२]न्द्रियसुखाय धृतातपत्रः ।
तद्भ्रातृभिः परिवृतः स जुगोप राष्ट्रम्
संक्रन्दनो दिवमिवानुसृतो मरुद्भिः ॥६२॥

सौन्दरनन्द[३]-महाकाव्ये कपिलवस्तुवर्णनो नाम
प्रथमः सर्गः ।

---

१ P. M. अनुदिते । २ P. M. धर्म्मायतेन्द्रिय० ।
३ P. M. सौन्दरानन्द० ।

# द्वितीयः सर्गः ।

ततः कदाचित् कालेन तदवाप कुलं क्रमात् ।
राजा शुद्धोदनो नाम शुद्धकर्म्मा जितेन्द्रियः ॥१॥
यः स सज्जिनकामेषु श्रीप्राप्तौ न विसिस्मिये ।
नावमेने परान् श्रुत्वा परेभ्यो [1]नापि विव्यथे ॥२॥
बलीयान् सत्त्वसम्पन्नः श्रुतवान् बुद्धिमानपि ।
विक्रान्तो नयवांश्चैव धीरः सुमुख एव च ॥३॥
वपुष्मांश्च न च स्तब्धो दक्षिणो न च नार्ज्जवः ।
तेजस्वी न च न क्षान्तः कर्त्ता च न च विस्मितः ॥४॥
आचिन्न[:] शत्रुभिः सं[स]ख्ये सुहृद्भि[श्च] व्यपाश्रितः ।
अभवद्यो न विमुखः तेजसा दित्सयैव च ॥५॥
यः पूर्व्वैः राजभिर्यातां श्रियासुर्धर्म्मपद्धतिम् ।
राज्यं दौहित्रमिव वहन् वृत्तेनान्वगमत्पितॄन् ॥६॥
यस्य सुव्यवहाराच्च रक्षणाच्च सुखं प्रजाः ।
प्रिप्रिरे विगतोद्वेगाः पितुरङ्कगता इव ॥७॥
श्रुतशास्त्रः श्रुतास्त्रो वा जातो वा विपुले कुले ।
अश्रुतार्थो न ददृशे योऽस्य दर्शनमीयिवान् ॥८॥

---

१ P. M. नापि ।

हितं विप्रियमप्युक्तो यः शुश्राव न चुक्षुभे ।
दुष्कृतं बकृपि त्यक्त्वा सस्मार कृतमप्यपि ॥९॥
प्रणताननुजग्राह विजग्राह कुलद्विषः ।
आपन्नान् परिजग्राह निजग्राह स्खिता[न्] पथि ॥१०॥
प्रायेण विषये तस्य तच्छीलमनुवर्त्तिनः ।
अर्ज्जयन्तो ददृशिरे धनानीव गुणानपि ॥११॥
अधै(ध्य)ष्ट यः परं ब्रह्म नाधै(ध्या)ष्ट मततं धृतेः ।
दानान्यदित पात्रेभ्यः पापं नाकृत किञ्चन ॥१२॥
धृत्या [1]रराजीत्प्रतिज्ञां स सद्वाजीवोद्यतां धुरम् ।
नाक्रमीत्क्रान्तिं च्युतः[2] सत्यान्मूर्च्छन्तमपि जीवितम् ॥१३॥
विदुषः पर्य्युपासिष्ट व्यकाशिष्टात्मवत्तया ।
व्यरोचिष्ट च शिष्टेभ्यः मासीषे चन्द्रमा इव ॥१४॥
अवेदीत् बुद्धिशास्त्राभ्याम् इह चामुत्र च क्षमम् ।
अरक्षीत् धैर्य्यवीर्य्याभ्यां इन्द्रियाण्यपि च प्रजाः ॥१५॥
अहार्षीत्[त्] दुःखमार्त्तानाम् द्विषतां चोर्जितं यशः ।
अचैषीत् च नयैः भूमिं भूयसा यशसैव च ॥१६॥
अध्यासीत् दुःखितान् पश्यन् प्रकृत्या करुणात्मकः ।
नाधीषीत् च यशोलोभात् अन्यायाधिगतैर्धनैः ॥१७॥
सौहार्द्दादृढ़भक्तित्वात् मैत्रेषु विगुणेष्वपि ।
नादिदासीत् अदित्सीत्तु सौमुख्यात् सख(त्त)मर्थवत् ॥१८॥

---

१ P. M. ०राज्ञीत् ।

२ P. M. न ह्यवाप्यागच्छतः P. L. M. indistinct आवत ।

अनिवेद्यागमर्हद्भ्यो नाखिचत् किञ्चिदद्भुतः ।
गामधर्म्मेण नाधुचत् खरतर्षेण गामिव ॥१९॥
नासृचत् कलिमप्राप्तम् नाऽचत्मानमेश्वरम् ।
आगमैर्बुद्धिमाधिचत् धर्म्माय न तु कीर्त्तये ॥२०॥
क्लेशार्हानपि कांश्चित्तु नाक्लिष्ट क्लिष्टकर्म्मणः ।
आर्य्यभावाच्च नाद्विचत्[1] द्विषतोऽपि सतो गुणान् ॥२१॥
आऽचत् वपुषा दृष्टीः प्रजानाम् चन्द्रमा इव ।
परखं भुवि नाम्रचत् महाविषमिवौ(वो)रगम् ॥२२॥
नाक्रचत् विषये तस्य कश्चित् कैश्चित् क्वचित् क्वतः[2] ।
अदिचत् तस्य हस्तस्थमार्त्तेभ्यो ह्यभयं धनुः ॥२३॥
कृतागसोऽपि प्रणतान् प्रागेव प्रियकारिणः ।
आदर्शस्निग्धया दृष्ट्या स्नग्धेन वचसाभिचत् ॥२४॥
वङ्कौरध्यगमत् विद्या विषयेष्वकुतूहलः ।
स्थितः कार्त्तयुगे धर्म्मे धर्म्मात् क्लृप्तेऽपि नाखलत् ॥२५॥
अवर्द्धिष्ट गुणैः प्रश्वदृधत् मित्रसम्पदा ।
अवर्त्तिष्ट च वृद्धेषु नावृतत् गर्हिते पथि ॥२६॥
शरैरग्रीग्रमच्छत्रून् गुणैर्[3]बन्धूनरीरमत् ।
रत्नैर्नाचूचुदत् भृत्यान् करैः नापीपिडत् प्रजाः ॥२७॥
रक्षणात् चैव शौर्य्याच्च निखिलां गामवीवपत् ।

---

१ P. M. नाद्युचत् T. २ P. M. कुतः ।
३ P. M. प्रागीः ।

स्पष्टया दण्डनीत्या च राज्ञिसचानवीवपत् ॥२८॥
कुलं राजर्षिवृत्तेन यज्ञयोगन्यमवीवपत् ।
दीप्त्या तम इवादित्यः तेजसारीनवीवपत् ॥२९॥
अपप्रथत् पितॄंश्चैव सत्पुत्रसदृशैः गुणैः ।
सलिलेनेव चाम्भोदो[1] वृत्तेनाजिह्मदत्[2] प्रजाः ॥३०॥
दानैरजस्रविपुलैः सोमं विप्रान् असूषवत् ।
राजधर्म्मस्थितत्वाच्च कालं सखंमसूषवत् ॥३१॥
अधर्म्मिष्ठामचक्रयज्ञकथामकथंकथः ।
चक्रवर्त्तीव च परान् धर्म्मायाभ्युदसी[3]सहत् ॥३२॥
राष्ट्रमन्यच्च बलैर्न स किञ्चिददीदपत् ।
भृत्यैरेव च सोद्योगं द्विषद्दर्पमदीदपत् ॥३३॥
क्षेरेवादीदपत् चापि भूयो भूयो गुणैः कुलम् ।
प्रजा नादीदपच्चैव सर्व्वधर्म्मव्यवस्थया ॥३४॥
अश्रान्तः समये यज्वा यज्ञभूमिममीमपत् ।
पालनाच्च द्विजान् ब्रह्म निरुद्विग्नमीमपत् ॥३५॥
गुरुभिर्विधिवत् काले सौम्यः[4] सोममसीमपत् ।
तपसा तेजसा चैव द्विषत्सैन्यममीमपत् ॥३६॥
प्रजाः परमधर्म्मज्ञः सूक्ष्मं धर्म्ममवीवपत् ।

---

१ P. M. चास्तौ द्यौ । २ P. M. अजिह्मदत् ।
३ P. M. परां धर्म्मायाभ्यदसीवहत् ।
४ P. L. M. सोभ्यः ।

दर्शनाच्चैव धर्मस्य काले स्वर्गमवी[व]पत् ॥३७॥
व्यक्रमय्यर्थकृच्छ्रेषु नाधर्म्मिष्ठमतिष्ठिपत्[१]।
प्रिय इत्येव चाप्रक्षं न मंरागात् अवीवृधत् ॥३८॥
तेजसा च विषा चैव रिपून् दृप्तान् अवीभसत्[२]।
यशोदीपेन दीप्तेन पृथिवीञ्च व्यवीभसत् ॥३९॥
आनृशंस्यान्न यशसे तेनादायि सदार्थिने।
द्रव्यं महदपि त्यक्त्वा न चैवाकीर्त्ति किञ्चन ॥४०॥
तेनारिरपि दुःखार्त्तो नात्याजि शरणागतः।
जित्वा दृप्तानपि रिपून् न तेनाकारि विस्मयः ॥४१॥
न तेनाभेदि मर्य्यादा कामाद् द्वेषाद् भयादपि।
तेन सत्स्वपि भोगेषु नासेवीन्द्रियवृत्तिता ॥४२॥
न तेनादर्शि विषमं कार्य्यं[३] कुत्रचन किञ्चन।
विप्रियप्रिययोः कृत्ये न तेनागामि निक्रियाः ॥४३॥
तेनापायि यथाकल्पं सोमश्च यज्ञ एवच।
वेदश्चाम्नायि सततं वेदोक्तो धर्म्म एवच ॥४४॥
एवमादिभिरत्यक्तो बभूव सुलभैः गुणैः।
अशक्यशक्यसामन्तः शाक्यराजः स शक्रवत् ॥४५॥
अथ तस्मिन् तथा काले धर्म्मकामा दिवौकसः।
विचेरुर्दिशि लोकस्य धर्म्मचर्य्या दिदृक्षवः ॥४६॥

---

१ P. M. ना वर्म्मिष्ठ मतिष्ठपत्। २ P. M. अवीहसत्।
३ P. M. न तेनादार्धि विषमं कार्य्यं।

धर्म्मात्मानः चरन्तस्ते धर्म्मजिज्ञासया जगत् ।
दृढ़शुद्धं विशेषेण धर्म्मात्मानं नराधिपम् ॥४७॥
देवेभ्यस्तुषितेभ्योऽथ बोधिसत्त्वः क्षितिं व्रजन् ।
उपपत्तिं प्रणिदधे कुले तस्य महीपतेः ॥४८॥
तस्य देवी नृदेवस्य माया नाम तदाभवत् ।
वीत[1]क्रोधतमा माया मायेव दिवि देवता ॥४९॥
स्वप्नेऽथ समये गर्भमाविशन्तं ददर्श सा ।
षड्दन्तं वारणं श्वेतम् ऐरावतमिवौजसा ॥५०॥
तं विनिर्दिदिशुः श्रुत्वा स्वप्नं स्वप्नविदो द्विजाः ।
तस्य जन्म कुमारस्य लक्ष्मीधर्म्मयशोभृतः ॥५१॥
तस्य सत्त्वविशेषस्य ज्ञातौ जातिक्षयैषिणः ।
माचला प्रचचालोर्व्वी तरङ्गाभिहतेव नौः ॥५२॥
सूर्य्यरश्मिभिरक्लिष्टं पुष्पवर्षः[:] पपात खात् ।
दिग्वारणकराधूतात् वनाच्चैरथादिव ॥५३॥
दिवि दुन्दुभयो नेदुः दीव्यतां मरुतामिव ।
दिदीपेत्यधिकं सूर्य्यः शिवश्च पवनो ववौ ॥५४॥
तुतुषुस्तुषिताश्चैव शुद्धावासाश्च देवताः ।
सधर्म्मबहुमानेन सत्त्वानां चानुकम्पया ॥५५॥
समाययौ यशःकेतुं श्रेयस्केतुकरः परः ।

---

१ P. M. वीज० T ।

बभ्राजे श्रान्तया लक्ष्म्या धर्म्मो विग्रहवानिव ॥५६॥

देव्यामपि यवीयस्यामरण्यामिव पावकः ।

नन्दो नाम सुतो जज्ञे नित्यानन्दकरः कुले ॥५७॥

दीर्घबाहुर्महावक्षाः सिंहांसो वृषभेक्षणः ।

वपुषाख्येण यो नाम सुन्दरोपपदं दधे ॥५८॥

मधुमास इव प्राप्तः चन्द्रो नव इवोदितः ।

अङ्गवानिव चानङ्गः स बभौ कान्तया श्रिया ॥५९॥

स तौ संवर्द्धयामास नरेन्द्रः परया मुदा ।

अर्थः सज्जनहस्तस्थो धर्म्मकामौ महानिव ॥६०॥

तस्य कालेन सत्पुत्रौ वसुधाते भयापहौ (सतौ) ।

आर्य्यस्यारम्भमहतो धर्म्मार्थाविव मूर्तये ॥६१॥

तयोः सत्पुत्रयोर्मध्ये श्राक्यराजो रराज सः ।

मध्यदेश इव व्यक्तो हिमवत्पारिपात्रयोः ॥६२॥

ततस्तयोः संस्कृतयोः क्रमेण

नरेन्द्रसूनोः कृतविद्ययोश्च ।

कामेष्वजस्रं प्रममाद नन्दः

सर्व्वार्थसिद्धस्तु[1] न संररञ्ज ॥६३॥

स प्रेक्ष्यैव हि जीर्णमातुरञ्च मृतञ्च

विस्मृत्य जगदनभिज्ञमार्त्तहृदयः ।

---

१ P. M. सिद्धिस्तु ।

गतपरमग्रङ्कं [न] विषयरतिमगमत्
जननमरणभयमभितमभितो विजिघांसुः ॥ ४ ॥
उद्वेगात् अपुनर्भवे मनः प्रणिधाय
स ययौ ग्रथितवराङ्गनादनाथः ।
निम्नि नृपतिनिलयनात् वनगमनकृतमनाः
सरस इव मथितनलिनात् कलहंसः ॥ ५ ॥

सौन्दरनन्दे महाकाव्ये राजवर्णनो नाम द्वितीयः सर्गः ।

# तृतीयः सर्गः ।

तपसे ततः कपिलवास्तु हयगजरथौघसङ्कुलम् ।
श्रीमदभयमनुरक्तजनं स विहाय निश्चितमना वनं ययौ ॥१॥
विविधागमांस्तपस्विनांश्च विविधनियमाश्रयान् मुनीन् प्रेक्ष्य ।
स विषयतृषाकृपणान् अनवस्थितं तम इति न्यवर्त्तत ॥२॥
अथ मोक्षवादिनमराडम् उपगममतिं तथोद्रकम् ।
तत्त्वकृतमतिरुपास्य जहावयमप्यमार्ग इति मार्गकोविदः ॥३॥
स विचारयन् जगति किन्नु परममिति तन्नमागमम् ।
निश्चयमनधिगतः परतः परमं चचार तप एव दुष्करम् ॥४॥
अथ नैष्कर्म्य इति वीक्ष्य तदपि विपुलं जहौ तपः ।
व्याधि[1]विषयमवगम्य परम् बुबुधे नराजमस्तत्वबुद्धये ॥५॥
स सुवर्णपीनयुगबाहुः वृषभगतिरायतेक्षणः ।
मुक्तमवनिरुहमभ्यगमत् परमस्य निश्चयविधेर्बुभुत्सया ॥६॥
उपविश्य तत्र कृतबुद्धिरचलधृतिरद्रिराजवत् ।
मारबलमजयदुग्रमथो बुबुधे पदं शिवमहार्य्यमव्ययम् ॥७॥
अवगम्य तं च[2] कृतकार्य्यमस्तमनसो दिवौकसः ।
हर्षमतुलमगमन्मुदिता विमुखी तु मारपरिषत् प्रचुचुभे ॥८॥
सनगा च भूः प्रविचचाल कृतवृष्णयः शिवो[3] ववौ ।
नेदुरपि च सुरदुन्दुभयः प्रववर्ष वाम्बुधरवर्जितं नभः ॥९॥

---

१ P. L. M. ध्यान० । २ P. M. तेन ।
३ P. M. शिवो ।

अवबुध्य चैव परमार्थमजरमनुकम्पया विभुः।
नित्यमस्तमुपदर्शयितुम् स वरणसापरिकरामयात् पुरीम् ॥१०॥
अथ धर्मचक्रमतनाभि धृतिमतिसमाधिनेमिमत्।
तच्च विनयनियमारमृषि जगतो हिताय परिषद्यवर्त्तयत् ॥११॥
इति दुःखमेतदियमस्य समुदयलता प्रवर्त्तिका।
शान्तिरियमयमुपाय इति प्रविभागशः परमिदं चतुष्टयम् ॥१२॥
अभिधाय च त्रिपरिवर्त्तमतुलमनिवर्त्त्यमुत्तमम्।
द्वादशनियतविकल्पमपि विनिनाय कौण्डिनसगोत्रमादितः ॥१३॥
स हि दोषसागरमगाधमुपधिजलमाधिजन्तुकम्।
क्रोधमदभयतरङ्गचपलं प्रततार लोकमपि चाप्यतारयत् ॥१४॥
स विनीय काश्यिषु गयेषु बहुजनमथो गिरिव्रजे।
पित्र्यमपि परमकारुणिको नगरं ययावनुजिघृक्षया तदा ॥१५॥
विषयात्मकस्य हि जनस्य बहुविविधमार्गसेविनः।
सूर्यसदृशवपुरभ्युदितो विजहार सूर्य इव गौतमस्तमः ॥१६॥
अभितस्ततः कपिलवास्तु परमशुभवास्तुसंस्तुतम्।
व[ि]स्तुमतिशुचिग्रिवोपवनम् स ददर्श निष्प्रहतया यथा वनम् ॥१७॥
अपरिग्रहः स हि बभूव नियतिमतिरात्मनीश्वरः।
नैकविधभयकरेषु किमु खलु जनः खलेष्व[२]एव मिश्रवस्तुषु ॥१८॥
प्रतिपूजया न स जहर्ष न च गुरुतमवज्ञयागमत्।
निश्चितमतिरखिलचन्दनयोः न जगाम सुखदुःखयोश्च विक्रियाम् ॥१९॥

---

१ P. M अनित्यम्।
२ P. M. एव P. L. M. lacuna. T.

अथ पार्थिवः समुपलभ्य [1]सुतमुपगतम् तथागतम् ।
तूर्णमवङ्कुतुरगानुगतः सुतदर्शनोत्सुकतयाभिनिर्ययौ ॥२०॥
सुगतस्तथागतमपेत्य नरपतिमधीरमानमतथा ।
शेषमपि जनमश्रुमुखम् विनिनीषया गगनमुत्पपात ह ॥२१॥
स विचक्रमे दिवि भुवीव पुनरुपविवेश तस्थिवान् ।
निस्खलमतिः स्निग्धयिषुः पुन र्बङ्कुधाभवत् पुनरभूत् तथैकधा ॥२२॥
सलिले क्षितावि व चचार जलमिव विवेश मेदिनीम् ।
मेघ इव दिवि व[व]र्ष पुनः पुनरुज्ज्वलश्च दवोदितो रविः ॥२३॥
युगपज्ज्वलन् ज्वलनवच्च जलमवसृजंश्च मेघवत् ।
तप्तकनकसदृशप्रभया स बभौ प्रदीप्त इव सन्ध्यया घनः ॥२४॥
तमुदीक्ष्य हेममणिजालवलयिनमिवोत्थितं ध्वजम् ।
प्रीतिमगमदतुलां नृपतिः जनता नताश्च बङ्कुमानमभ्ययुः ॥२५॥
अथ भाजनीकृतमवेक्ष्य मनुजपतिमृद्धिसम्पदा ।
पौरजनमपि च तत्प्रसवेन निजगाद धर्म्मविनयं विनायकः ॥२६॥
नृपतिस्ततः प्रथममाप फलममृतधर्म्मसिद्धयोः ।
धर्म्ममतुलमधिगम्यमुनेः सुनये ननाम स यतो गुराविव ॥२७॥
बहवः प्रसन्नमनसोऽथ जननमरणार्त्तिभीरवः ।
शाक्यतनयवृषभाः क्षतिनो वृषभा इवानलभयात् प्रवव्रजुः ॥२८॥
विजहुस्तु येपि न गृहाणि तनयपितृमातृपेक्षया ।
तेऽपि नियमविधिमामरणात् जगृहुश्च युक्तमनसश्च दधिरे ॥२९॥

---

१ P. M. सुगत०।

न जिहिंस सूक्ष्ममपि जन्तुमपि परवधोपजीवनः ।
किं वत विपुलगुणः कुलजः सदयः सदा किमु मुनेरुपामया ॥३०॥
अकृशोद्यमः कृषधनोऽपि परपरिभवाभहोऽपि सन् ।
नान्यधनमपजहार तथा भुजगादिवान्यविभवात् विविक्तये ॥३१॥
विभवान्वितोऽपि तरुणोऽपि विषयचपलेन्द्रियोऽपि सन् ।
नैव च परयुवतीरगमत् परमहिला[1] दहनतोप्यमन्यत ॥३२॥
अनृतं जगाद न च कञ्चित् कृतमपि जजल्प नाप्रियम् ।
स्मरणमपि न जगावहितम् हितमप्यवाच न च पैशुनाय यत् ॥३३॥
मनसा लुलोभ न च जातु परवसुषु बद्धमानसः[2] ।
कामसुखमसुखतो विमृशन् विजहार हन्त दव तत्र सज्जनः ॥३४॥
न परस्य कञ्चित् अपघातमपि च मधृणो व्यचिन्तयत् ।
मातृपितृसुतसुहृत्सदृशं स ददर्श तत्र हि परस्परं जनः ॥३५॥
नियतम् भविष्यति परत्र भवदपि च भूतमप्यधो ।
कर्म्मफलमपिच लोकगतिर्नियतेति दर्शनमवाप साधु च ॥३६॥
इति कर्म्मणा दृग्विधेन परमकुशलेन भूरिणा ।
अंशिनि शिथिलगुणेऽपि युगे विजहार तत्र मुनिसंश्रयाज्जनः ॥३७॥
न च तत्र कश्चिदुपपत्तिसुखमभिलषाप तैर्गुणैः ।
सर्व्वमशिवमवगम्य भवम् भवसंक्षयाय वृतते न जन्मने ॥३८॥

---

१ P.|M. P.|L. M. परमहिता T.
२ P. L. M. ग्रहमानसः ।

अकथंकथाग्रहिन एव परमपरिशुद्धदृष्टयः।
स्रोतसि हि वर्तिरे बहवो रजसस्तनुत्वमपि चक्रिरे परे[1] ॥३८॥
वर्तते च योऽपि विषमेषु विभवमदृप्तेषु कस्यन।
त्यागविनयनियमाभिरतो विजहार सोऽपि न चचाल सत्पथात् ॥४०॥
अपि च खतोऽपि परतोऽपि न भयमभवत् न देवतः।
तच्च सुखसुभिक्षगुणैः जहृषुः प्रजाः कृतयुगे राज्ञो मनोरिव ॥४१॥
इति मुदितमनामयक्षिरापत्कुरुरघुपुरुपुरोपमं पुरं तत्।
अभवभयदैग्निके महर्षौ विहरति च शिवाय वीतराग इति ॥४२॥

सौन्दरनन्दे महाकाव्ये तथागतवर्णनो नाम
तृतीयः सर्गः ॥ ३ ॥

---

१ P. M. स्रोतसिह्नौ स ततरे बहवोरजसत्वतमपि चक्रिरे परे।

## चतुर्थः सर्गः ।

मुनौ ब्रुवाणेऽपि तु तत्र धर्म्मम् धर्म्मं प्रति ज्ञातिषु चादृतेषु ।
प्रासादसंस्थो मदनैककार्य्यः प्रियासहायो विजहार नन्दः ॥१॥
स चक्रवाक्येव हि चक्रवाकः तया समेतः प्रियया प्रियार्हः ।
नाचिन्तयत् वैश्रमणम् न शक्रम् तत्स्थानहेतोः कृत एव धर्म्मः ॥२॥
लक्ष्म्या च रूपेण च सुन्दरीति स्तम्भेन गर्व्वेण च मानिनीति ।
दीप्त्या च मानेन च भामिनीति यासौ बभाषे त्रिविधेन नाम्ना ॥३॥
सा हासहंसा नयनद्विरेफा पीनस्तनाभ्युन्नतपद्मकोषा ।
भृशं बभासे स्वकुलोदितेन स्त्रीपद्मिनी नन्ददिवाकरेण ॥४॥
रूपेण चात्यन्तमनोहरेण रूपानुरूपेण च चेष्टितेन ।
मनुष्यलोके हि तदा बभूव सा सुन्दरी स्त्री पुरुषेषु नन्दः ॥५॥
सा देवता नन्दनचारिणीव कुलस्य नान्दीजननस्य नन्दः ।
अतीत्य मर्त्यानुपेत्य देवान् सृष्टावभूतामिव भूतधात्रा ॥६॥
तां सुन्दरीं चेत् न लभेत नन्दः सा वा निषेवेत न तं नतभ्रूः ।
द्वन्द्वं ध्रुवं तत् विकलं न शोभेतान्योन्यहीनाविव राचिचन्द्रौ ॥७॥
कन्दर्पदर्पस्य हि चक्रभूतम् प्रमोदनान्द्योरिव नीडभूतम् ।
प्रहर्षतुष्ट्योरिव पात्रभूतम् द्वन्द्वं जहार[ ]स्य मदान्धभूतम् ॥८॥
परस्परोदीक्षणतत्पराक्षं परस्परं व्याहृतसक्तचित्तम् ।
परस्परश्लेषहृताङ्गरागम् परस्परं तन्मिथुनं जहार ॥९॥
भावानुरक्तौ गिरिनिर्झरस्थौ तौ किन्नरीकिंपुरुषाविवोभौ ।
चिक्रीडतुश्चापि विरेजतुश्च रूपश्रियान्योन्यमिवाक्षिपन्तौ ॥१०॥

अन्योन्यसंरागविवर्द्धनेन तद्वन्दमन्योन्यमरीरमच्च ।
क्षमान्तरे तर्षवलेन तेन[1] सलीलमन्योन्यममीमदच्च ॥ ११ ॥
विभूषयामास ततः प्रि(प)यां स सिषेविषुस्तां न मृजावहार्थम् ।
स्वेनैव रूपेण विभूषिता हि विभूषणानामपि भूषणं सा ॥ १२ ॥
दत्वाथ सा दर्पणमस्य हस्ते ममाग्रतो धारय तावदेनम् ।
विशेषकं यावदहं करोमीत्युवाच कान्तं स च तं बभार ॥ १३ ॥
भर्त्तुस्ततः श्मश्रु निरूप्यमाणा विशेषकं भासि[2] चकार तादृक् ।
निश्वासवातेन च दर्पणस्य चिकित्सयित्वा निजघान नन्दः ॥ १४ ॥
सा तेन चेष्टाललितेन भर्त्तुः प्रायेण चान्तर्मनसा[3] जहास ।
भवेच्च रुष्टा किल नाम तस्मै ललाटजिह्मां भ्रुकुटिं चकार ॥ १५ ॥
चिक्षेप कर्णोत्पलमस्य चांसे करेण सव्येन मदालसेन ।
पचाङ्गुलिं चार्द्धनिमीलिताक्षे वक्त्रेऽस्य तामेव विनिर्दुधाव ॥ १६ ॥
ततश्चलन्नूपुरयन्त्रिताभ्याम् नखप्रभोद्भासितराङ्गुलिभ्याम् ।
पद्भ्यां प्रियाया नलिनोपमाभ्याम् मूर्द्धा भयान्नाम ननाम नन्दः ॥ १७ ॥
स मुक्तपुष्पोन्मिषितेन मूर्द्धा ततः प्रियायाः प्रियकृत् बभासे ।
सुवर्णवेद्यां मणिलावभग्नः पुष्पातिभारादिव नागवृक्षः ॥ १८ ॥
सा तं स्तनोद्वर्त्तितहारयष्टिरुत्थापयामास निपीड्य दोर्भ्याम् ।
कथं कृतोसीति जहास चोच्चैः मुखेन साधीकृतकुण्डलेन ॥ १९ ॥

---

१ P M. तर्षबलेहतेन ।
२ P. M. भासायिषि, not in P. L. M. T.
३ P. M. साध्येन चातुर्मनसा ।

पत्युस्ततो दर्पणसक्तपाणेः मुक्तुर्मुहुर्वक्त्रमवेक्षमाणा ।
तमालपत्रार्द्रतले कपोले समाधयामास विशेषकं तत् ॥२०॥
तस्या मुखं तत् सतमालपत्रम् ताम्राधरोष्ठम् चिकुराग्रताम्रम् ।
रक्ताधिकाग्रम् पतितद्विरेफम् मग्नेवलं पद्ममिवावभासे ॥२१॥
नन्दस्ततो दर्पणमादरेण विभ्रत् तदा मण्डनसाक्षिभूतम् ।
विशेषकावेक्षणकैकराक्षो ललत् प्रियाया वदनं ददर्श ॥२२॥
तत्कुण्डलादस्तविशेषकान्तं कारण्डवक्लिष्टमिवारविन्दम् ।
नन्दः प्रियाया मुखमीक्षमाणो भूयः प्रियानन्दकरो बभूव ॥२३॥

विमानकल्पे स विमानगर्भे ततस्तथा चैव ननन्द नन्दः ।
तथागतस्यागतभैक्षकाङ्क्षो भैक्षाय तस्य प्रविवेश वेश्म ॥२४॥
अवाङ्मुखो निष्कृणतश्च तस्थौ भ्रातुर्गृहेऽन्यस्य गृहे यथैव ।
तस्मादृषौ प्रेष्यजनप्रमादात् भिक्षामलब्ध्वैव पुनर्जगाम ॥२५॥
काचित् पिपेषाक्तविलेपनं हि वासोऽङ्गना काचित् अवासयच्च ।
अयोजयत् स्नानविधिं तथान्या जगन्युरन्याः सुरभीः स्रजश्च ॥२६॥
तस्मिन् गृहे भर्तुरतश्चरण्यः क्रीडानुरूपं ललितं नियोगम् ।
काश्चिन्न बुद्धं ददृशुर्युवत्यः बुद्धस्य वैषा नियतं मनीषा ॥२७॥
काचित् स्थिता तत्र तु हर्म्यपृष्ठे गवाक्षपत्रे प्रणिधाय चक्षुः ।
विनिष्पतन्तं सुगतं ददर्श पयोदगर्भादिव दीप्तमर्कम् ॥२८॥
सा गौरवं तत्र विचार्य्य भर्तुः स्वया च भक्त्यार्हतयार्हतश्च ।
नन्दस्य तस्थौ पुरतोविवक्षुः तदाज्ञया चेति तदाचचक्षे ॥२९॥
अनुग्रहायास्य जनस्य मन्ये गृहगृहं नो भगवान् प्रविष्टः ।
भिक्षामलब्ध्वा गिरमासनं वा शून्यादरण्यादिव याति भूयः ॥३०॥

श्रुत्वा महर्षेः स गृहप्रवेशं सत्कारहीनञ्च पुनः प्रयाणम् ।
चचाल चिताभरणाम्बरस्रग् कल्पद्रुमो धूत इवानिलेन ॥ ३१॥
कृत्वाञ्जलिं मूर्द्धनि पद्मकल्पं ततः स कान्तां गमनं ययाचे ।
कर्त्तुं गमिष्यामि गुरौ प्रणामम् मामभ्यनुज्ञातुमिहार्हसीति ॥३२॥
सा वेपमाना परिषस्वजे तं शालं लता वातममीरितेव ।
ददर्श चाश्रुप्लुतलोलनेत्रा दीर्घञ्च निश्वस्य वचोऽभ्युवाच ॥३३॥
नाहं त्वियासोर्गुरुदर्शनार्थम् अर्हामि कर्त्तुम् तव धर्म्मपीड़ाम्[1] ।
गच्छार्य्यपुत्रेहि च शीघ्रमेव विशेषको यावदयं न शुष्कः ॥३४॥
स चेत् भवेत्त्वम् खलु दीर्घसूत्रो दण्डं महान्तम् त्वयि पातयेयम् ।
मुञ्जमुञ्जस्त्रां ग्रथितम् कुचाभ्याम् विबोधयेयम् च न चालयेयम् ॥३५॥
यथाप्तनानाज्ञानविशेषकार्थां अन्वेष्यसि त्वं त्वरितम् ततः त्वाम् ।
निपीड़यिष्यामि भुजद्वयेन विभूषणेनार्द्रविलेपनेन ॥३६॥

इत्येवमुक्तस्य निपीड़ितस्य तया स वेणुस्तनया जगाम ।
एवं करिष्यामि विमुञ्च चण्डि यावद्गुरुर्दूरगतो न मे सः ॥३७॥
ततस्तनोद्वर्त्तितचन्दनाभ्याम् मुक्तो भुजाभ्याम् न तु मानसेन ।
विहाय वेषम् मदनानुरूपम् तत्कालयोग्यम् स बभूवभार ॥३८॥
सा तं प्रयान्तम् रमणं प्रदध्यौ प्रध्यानशून्यस्खलितनिश्वसाची ।
स्खलोच्चकर्णा व्यधविद्धशय्या भ्रान्तं मृगं भ्रान्तमुखी मृगीव ॥३९॥
दिदृक्षयाच्छिन्नमना मुनेस्तु नन्दः प्रयाणं प्रति तत्वरे च ।
विवृत्तदृष्टिश्च शनैर्ययौ ताम् करीव पश्यन् स खड़त्करेणुम् ॥४०॥

---

१ P. L. M. धर्म्मयाच्ञां ।

ग्रातोदरीं पीनपयोधरोरुम् स सुन्दरीं रुचदरीमिवाद्रेः ।
काञ्चेण पश्यन् न ततर्प नन्दः पिवन्निवैकेन जलं करेण ॥४१॥
तं गौरवं बुद्धगतम् चकर्ष भार्यानुरागः पुनराचकर्ष ।
सोऽनिश्चयात् नापि ययौ न तस्थौ तरंस्तरङ्गेष्विव राजहंसः ॥४२॥
ग्रदर्शनं भूयगतश्च तस्या हर्म्यात्ततश्चावततार तूर्णम् ।
श्रुत्वा ततो नूपुरनिस्वनं स पुनः सलम्बे हृदये गृहीतः ॥४३॥
स कामरागेण निगृह्यमाणो धर्मानुरागेण च ह्रियमानः ।
जगाम दुःखेन विवर्त्यमानः स्रवः प्रतिस्रोत इवापगायाः ॥४४॥
ततः क्रमैर्दीर्घतमैः प्रचक्रमे कथं नु यातो न गुरुर्भवेदिति ।
स्वजेय तां चैव विशेषकप्रियां कथं प्रियामार्द्रविशेषकामिति ॥४५॥
ग्रथ स पथि ददर्श मुक्तमानं पित्तनगरेपि तथा गताभिमानम् ।
दशवलमभितो विलम्बमानम् ध्वजमनुयान इवेन्द्रमर्च्यमानम् ॥४६॥

सौन्दरनन्दे महाकाव्ये भार्यायाचितको नाम
चतुर्थः सर्गः ॥ ४ ॥

## पञ्चमः सर्गः ।

अथावतीर्य्याश्वरथद्विपेभ्यः प्राक्षा यथास्वर्द्धि[1] गृहीतवेषाः ।
महाधनेभ्यो व्यवहारिणश्च महामुनौ भक्तिवशात् प्रणेमुः ॥१॥
केचित् प्रणम्यानुययुर्मुहूर्त्तम् केचित् प्रणम्यार्थवशेन जग्मुः ।
केचित् स्वकेष्वावसथेषु तस्थुः श्रुत्वाञ्जलीन् वीक्षणतत्पराक्षाः ॥२॥
बुद्धस्तुतश्चच नरेन्द्रमार्गे स्रोतो महत् भक्तिमतो जनस्य ।
जगाम दुःखेन विगाह्यमानो जलागमे स्रोत इवापगा[ा]याः ॥३॥
अथो महद्भिः पथि सम्पतद्भिः सम्पूज्यमानाय तथागताय ।
कर्त्तुं प्रणामं न शशाक नन्दस्तेनाभिरेमे तु गुरोर्महिम्ना ॥४॥
स्वश्चावसङ्गम् पथि निर्मुमुक्षुः भक्तिं जनस्यान्यमतेश्च रक्षन् ।
नन्दश्च गेहाभिमुखं जिघृक्षन् मार्गं ततोऽन्यं सुगतः प्रपेदे ॥५॥
ततो विविक्तश्च विविक्तचेताः सन्मार्गवित् मार्गमभिप्रतस्थे ।
गत्वाग्रतस्थाग्र्यतमाय तस्मै नान्दीविमुक्ताय ननाम नन्दः ॥६॥
अनैर्व्रजन्नेव स गौरवेण पटावृतांशो विनताङ्गकायः ।
अधोनिबद्धाञ्जलिरूर्द्धनेत्रः सगद्गदम् वाक्यमिदं बभाषे ॥७॥
प्रासादसंस्थो भगवन्तमन्तःप्रविष्टमश्रौषमनुग्रहाय ।
अतस्त्वरावानहमभ्युपेतो गृहस्य कक्षा[न्][2] महतोभ्यसूयन् ॥८॥
तत् साधु साधुप्रिय मत्प्रियार्थम् तत्रासु भिक्षूत्तम भैक्षकालः ।
असौ हि मध्यं नभसो यियासुः कालं प्रतिस्मारयतीव सूर्य्यः ॥९॥

---

१ P. M. मूर्द्धि ।

२ P. M. कक्षामहतो, P. L. M. कक्ष्यामहतः ।

इत्येवमुक्तः प्रणयेन तेन स्नेहाभिमानोन्मुखलोचनेन ।
तादृङ्निमित्तं सुगतश्चकार नाहार[1]कृत्यं स यथा विवेद ॥ १० ॥
ततः स कृत्वा मुनये प्रणामं गृहप्रयाणाय मतिं चकार ।
अनुग्रहार्थं सुगतस्तु तस्मै पात्रं ददौ पुष्करपत्रनेत्रः ॥ ११ ॥
ततः स लोके ददतः फलार्थं पात्रस्य तस्याप्रतिमस्य पात्रम् ।
जग्राह चापग्रहणक्षमाभ्यां पद्मोपमाभ्याम् प्रयतः कराभ्याम् ॥ १२ ॥
पराङ्मुखन्त्वन्यमनस्कमारात् विज्ञाय नन्दः सुगतं गताश्रम् ।
कृत्स्नस्यपात्रोऽपि गृहं त्रियासुः ससार मार्गात् मुनिमीक्षमाणः ॥ १३ ॥
भार्य्यानुरागेण यदा गृहं स पात्रं गृहीत्वापि त्रियासुरेव ।
विमोहयामास मुनिस्ततस्तं रश्मामुखस्यावरणेन तस्य । १४ ॥
निर्म्मो(र्य्यो)चवीजं[2] हि ददर्श तस्य ज्ञानं मृदु(:) क्लेशरजश्च तीव्र[(')]म् ।
क्लेशाकुलान् [तान्] विषयान् स तस्य नन्दं यतस्तं मुनिराचकर्ष ॥ १५ ॥
संक्लेशपक्षो द्विविधश्च दृष्टः तथा द्विकल्पो व्यवदानपक्षः ।
आत्माश्रयो हेतुबलाधिकस्य वाह्याश्रयः प्रत्ययगौरवस्य ॥ १६ ॥
अयत्नतो हेतुबलाधिकस्तु निर्मुच्यते घट्टितमात्र एव ।
यत्नेन तु प्रत्ययनेयबुद्धिः विमोक्षमाप्नोति पराश्रयेण ॥ १७ ॥
नन्दः स च प्रत्ययनेयचेता[3] यं म्रियिये तन्नयतामवाप ।
यस्मादिमं तत्र चकार यत्नं तत्स्नेहपाशान् मुनिरुज्जिहीर्षन् ॥ १८ ॥

---

१ P. M. कारं वाहार, P. L. M. कालमहार
२ P. M. निर्य्योज्ञ ।
३ P. M. प्रत्ययने प्रचेता T.

नन्दस्तु दुःखेन विचेष्टमानः शनैरगत्या गुरुमभ्यगच्छत् ।
भार्यासुखं वीक्षणलोलनेत्रं विचिन्त्यशार्द्रविशेषकं तत् ॥१८॥

ततो सुनिस्नम् प्रियमाख्यहारम् वमन्तमास्येन कृताभिहारम् ।
निनाय भग्नप्रमदाविहारं विद्याविहाराभिमतं विहारम् ॥२०॥

दीनं महा[का]रुणिकस्तमस्तम् दृष्ट्वा सुहृत्तं करुणायमानः ।
करेण चक्राङ्कतलेन मूर्ध्नि पस्पर्श चैवेदं उवाच चैनम् ॥२१॥

यावन्न हिंस्रस् समुपैति कालः शमाय तावद् कुरु सौम्य बुद्धिम् ।
सर्व्वाखवस्थासिह वर्त्तमानं सर्व्वाभिसारेण निहन्ति मृत्युः ॥२२॥

साधारणात् स्वप्ननिभादसारात् लोलं मनः कामसुखान्नियच्छ ।
हव्यैरिवाग्नेः पवनेरितस्य लोकस्य कामैर्न हि तृप्तिरस्ति ॥२३॥

श्रद्धाधनं श्रेष्ठतमं धनेभ्यः प्रज्ञारसतृप्तिकरो रसेभ्यः ।
प्रधानमध्यात्मसुखं सुखेभ्योऽविद्यारतिः दुःखतमा रतिभ्यः ॥२४॥

हितस्य वक्ता प्रवरः सुहृद्यो धर्म्माय खेदो गुणवान् श्रमेभ्यः ।
ज्ञानाय कृत्यम् परमं क्रियाभ्यः किमिन्द्रियाणामुपगम्य दास्यम् ॥२५॥

तस्मिन्नितं भोक्तमशुचियुक्तम् परेच्छनायत्तमहार्य्यमन्यैः ।
नित्यं शिवं शान्तिसुखं वृणीष्व किमिन्द्रियार्थार्थमनर्थमूढ़ा ॥२६॥

जरा समा नास्त्यसृजा प्रजानाम् व्याधेः समो नास्ति जगत्यनर्थः ।
मृत्योः समं नास्ति भयं पृथिव्यां एतत्त्रयं खल्ववशेन सेव्यम् ॥२७॥

क्षेत्रेण कश्चिन्न समोऽस्ति पाशः स्रोतो न तृष्णासमम्स्ति हारि ।
रागाग्निना नास्ति समस्तथाग्निस्तत्क्षेत् त्रयं नास्ति सुखं च तेऽस्ति ॥२८॥

अवश्यभावौ प्रियविप्रयोगः तस्माच्च शोकः सततं निषेव्यः ।
शोकेन चोन्मादमुपेयिवांसो राजर्षयोन्येऽप्यबला विचेलुः ॥२९॥

प्रज्ञामयं वर्म वधान तस्मात् नैष्यन्ति[1] निघ्नस्य हि शोकबाणाः ।
महच्च दग्धुं भवकक्षजालं संधुक्षयाप्याग्निमिवात्मतेजः ॥ ३० ॥
यथौषधैर्हस्तगतैः स वैद्यो न दृश्यते कस्यन पन्नगेन ।
तथानपेक्ष्योजितलोकमोहो न दृश्यते शोकभुजङ्गमेन ॥ ३१ ॥
आस्थाय योगं परिगम्य तत्त्वं न त्रासमागच्छति मृत्युकाले ।
आबद्धवर्मा सुधनुः कृतास्त्रो जिगीषया शूर इवाहवस्थः ॥ ३२ ॥

इत्येवमुक्तः स तथागतेन सर्व्वेषु भूतेष्वनुकम्पकेन ।
धृष्टं गिरान्तर्हृदयेन भीदंस्तथेति नन्दः सुगतं बभाषे ॥ ३३ ॥
अथ प्रमादाच्च तमुज्झितीर्षन् मत्वागमस्यैव च पाचभूतम् ।
प्रव्राजयानन्द ग्रमाय नन्दं इत्यब्रवीत् मैत्रमना महर्षिः ॥ ३४ ॥
नन्दं ततोन्तर्मनसा रुदन्तम् एहीति वैदेहमुनिर्जगाद ।
ग्रनैस्ततस्तम् समुपेत्य नन्दो न प्रव्रजिष्याम्यहमित्युवाच ॥ ३५ ॥

श्रुत्वाथ नन्दस्य मनीषितं तत् बुद्धाय वैदेहमुनिः ग्रशंस ।
संश्रुत्य तस्मादपि तस्य भावम् महामुनिर्नन्दमुवाच भूयः ॥ ३६ ॥
मय्यग्रजे प्रव्रजिते जितात्मन् भ्रातृष्वनु प्रव्रजितेषु चास्मान् ।
ज्ञातींश्च दृष्ट्वा व्रतिनो गृहस्थान् संविघ्न चित्तेऽस्ति न वास्ति चेतः ॥ ३७ ॥
राजर्षयस्ते विदिता न नूनम् वनानि ये ग्रिश्रियिरे दमन्तः ।
निष्ठीव्य कामान् उपशान्तिकामाः कामेषु नैवं कृपणेषु सक्ताः ॥ ३८ ॥
भूयः समालोक्य गृहेषु दोषान् निशाम्य तत् त्यागकृतं च शर्म ।
नैवास्ति मोक्तुं मतिराश्रयं ते देग्रं सुमूर्षोरिव सोपसर्गम् ॥ ३९ ॥

---

१ Both MSS. नैष्यान्ति ।

संसारकान्तारपरायणस्य शिवे कथं ते पथि नारूढा ।
आरोप्यमाणस्य तमेव मार्गं भ्रष्टस्य सार्थादिव सार्थिकस्य ॥४०॥
यः सर्वतो वेश्मनि दह्यमाने गृहीत मोहात् न ततो व्यपेयात् ।
कालाग्निना व्याधिजराग्निखेन लोके प्रदीप्ते[1] स भवेत् प्रमत्तः ॥४१॥
प्रणीयमानस्य यथा वधाय मत्तो हसेच्च प्रलपेच्च वध्यः ।
मृत्यौ तथा तिष्ठति पाशहस्ते शोच्यः प्रमाद्यन् विपरीतचेताः ॥४२॥
यदा नरेन्द्राश्च कुटुम्बिनश्च विहाय बन्धूंश्च परिग्रहांश्च ।
ययुश्च यास्यन्ति च यान्ति चैव प्रियेष्वनित्येषु कुतोऽनुरोधः ॥४३॥
किञ्चिन्न पश्यामि रतस्य यत्र तदन्यभावेन भवेन्न दुःखम् ।
तस्मात् क्वचिन्न क्षमते प्रसक्तिः यदि क्षमस्तद्विगमाय शोकः ॥४४॥
तत् सौम्य लोलं परिगम्य लोकं मायोपमं चित्तमिवेन्द्रजालम् ।
प्रियाभिधानं त्यज (तो)मोहजालं कर्तुं मतिस्ते यदि दुःखजालम् ॥
४५॥
वरं[1] हितोदर्कमनिष्टमस्त्रम् न खादु यत्स्यादहितानुबद्धम् ।
यस्मादहं(न)त्वां विनियोजयामि शिवे भ्रुवौ वर्त्मनि विप्रियेऽपि ॥
४६॥
बालस्य धात्री विनिगृह्य लोष्टम् यथोद्धरत्यात्मपुटप्रविष्टम् ।
तथोज्झितौर्षुः खलु रागशस्त्रं तत्त्वामवोचं परुषं हिताय ॥४७॥
अनिष्टमप्यौषधमातुराय ददाति वैद्यस्य यथा निगृह्य ।
तदन्मयोक्तम् प्रतिकूलमेतत् तुभ्यम् हितोदर्कमनुग्रहाय ॥४८॥

---

१ Both P. L. M. and P. M. प्रदीप्ते स T.

तद्यावदेव क्षणसन्निपातो न मृत्युरागच्छति यावदेव ।
यावद्वयो योगविधौ समर्थं बुद्धिं कुरु श्रेयसि तावदेव ॥४९॥

इत्येवमुक्तः स विनायकेन हितैषिणा कारुणिकेन नन्दः ।
कर्त्तास्मि सर्वं भगवन् वचस्ते तथा यथाज्ञापयसीत्युवाच ॥५०॥

आदाय वैदेहमुनिस्तदस्त्रम् निनाय संश्लिष्य विचेष्टमानम् ।
व्ययोजयच्चाश्रुपरिप्लुताक्षं केशग्रहं क्षत्रनिभस्य मूर्ध्नः ॥५१॥

अथो हृतं तस्य मुखं सवाष्पम् प्रवाह्यमानेषु शिरोरुहेषु ।
वक्राग्रनालं नलिनं तडागे वर्षोदकक्लिन्नमिवावभासे ॥५२॥

नन्दस्ततः तरुकषायविविक्तवासा-
श्चिन्तावशो नवगृहीत इव द्विपेन्द्रः ।
पूर्णः प्रणो बकुलपङ्क्तगतः क्षपान्ते
बालातपेन परिषिक्त इवावभासे ॥५३॥

सौन्दरनन्दमहाकाव्ये नन्दप्रव्राजनं नाम पञ्चमः सर्गः ।

## षष्ठः सर्गः ।

ततो हते भर्त्तरि गौरवेण प्रीतौ हृतायामरतौ हृतायां ।
तत्रैव हर्म्योपरि वर्त्तमाना न सुन्दरी सैव तदा बभासे ॥ १ ॥
सा भर्त्तुरभ्यागमनप्रतीक्षा गवाक्षमाक्रम्य पयोधराभ्याम् ।
द्वारोन्मुखी हर्म्यतलाग्नलम्बे मुखेन [1]तिर्य्यङ्नतकुण्डलेन ॥ २ ॥
विलम्बहारा चलयोल्लिका सा तस्माद् विमानाद्विनता चकाशे ।
तपःक्षयात् अप्सरसां वरेव च्युतं[2] विमानात् प्रियमीक्षमाणा ॥ ३ ॥
सा खेदसंखिन्नललाटकेन निश्वासनिष्पीतविशेषकेण ।
चिन्ताचलाक्षेण मुखेन तस्थौ भर्त्तारमन्यच्च विशङ्कमाना ॥ ४ ॥
ततश्चिरस्थानपरिश्रमेण स्थितैव पर्य्यङ्कतले पपात ।
तिर्य्यक्च शिश्ये प्रविकीर्णहारा सपादुकैवार्द्धविलम्बपादा ॥ ५ ॥

अथाच काचित् प्रमदा सवाष्पां तां दुःखितां द्रष्टुमनीश्वरा सा ।
प्रासादसोपानतलप्रणादं चकार पद्भ्यां सहसा रुदन्ती ॥ ६ ॥
तस्याश्च सोपानतलप्रणादं श्रुत्वैव तूर्णं पुनरुत्पपात ।
प्रीत्या प्रसक्तेव च संजहर्ष प्रियोपयानं परिशङ्कमाना ॥ ७ ॥
सा चासयन्ती वलभीपुटस्थान् पारावतान् नूपुरनिःस्वनेन ।
सोपानकुड्यं प्रससार हर्षात् भ्रष्टं दुकूलान्तमचिन्तयन्ती ॥ ८ ॥
तामङ्गनां प्रेक्ष्य च विप्रलब्धा निश्चित्य भूयः शयनं प्रपेदे ।
विवर्णवक्त्रा न रराज चारु विवर्णचन्द्रेव हिमागमे द्यौः । ९ ॥
सा दुःखिता भर्त्तुरदर्शनेन कामेन कोपेन च दह्यमाना ।
हत्वा करे वक्त्रमथोपविष्टा चिन्तानदीं शोकजलां ततार ॥ १० ॥

---

१ P. M. तिर्य्यन्नत० । २ P. M. च्युता ।

तस्या मुखं पद्मसपत्नभूतम् पाणौ स्थितं पल्लवरागताम्रे ।
छायामयस्याम्भसि पङ्कजस्य बभौ नतं पद्ममिवोपरिष्टात् ॥ ११ ॥
सा स्त्रीस्वभावेन विचिन्त्य तत्तत् दृष्टानुरागेऽभिमुखेऽपि पत्यौ ।
धर्माश्रिते तत्त्वमविन्दमाना संकल्प्य तत्तत् विललाप तत्तत् ॥ १२ ॥
एष्यामनाप्तानविशेषकायां त्वयीति कृत्वा मयि तां प्रतिज्ञां ।
कस्मात्तु हेतोर्दयितप्रतिज्ञः सोद्य प्रियो मे वितथप्रतिज्ञः ॥ १३ ॥
आर्य्यस्य साधोः करुणात्मकस्य मन्नित्यभीरोरतिदक्षिणस्य ।
कुतो विकारोयमभूतपूर्व्वः स्वेनापराधेन ममापचारात् ॥ १४ ॥
रतिप्रियस्य प्रियवर्त्तिनो मे प्रियस्य नूनं हृदयं विरक्तम् ।
तथा हि रागो यदि तस्य हि स्यात् मच्चित्तरक्षी न मनागतः[1] स्यात् ॥ १५ ॥
रूपेण भावेन न च यत् विशिष्टा प्रियेण दृष्टा नियतं ततोऽन्या ।
तथा हि कृत्वा मयि सोघमास्थं लग्नां सतीं मामगमत् विहाय ॥ १६ ॥
भक्तिं स बुद्धे प्रति यामवोचत् तस्य प्रयातुं मयि सोऽपदेशः ।
सुतौ प्रसादो यदि तस्य हि स्यात् मृत्योरिवोर्याद्नु तत् विभीयात् ॥ १७ ॥
लेखार्थं[2] मादर्शमनन्यचित्तो विभूषयन्त्या मम धारयित्वा ।
विभर्त्ति सोऽन्यस्य जनस्य तच्चेत् नमोस्तु तस्मै चलसौहृदाय ॥ १८ ॥
नेच्छन्ति याः प्रोकमवाप्तुमेवं[3] श्रद्धातुमर्हन्ति न ता नराणाम् ।
क्व चानुवृत्तिर्मयि तस्य पूर्व्वं त्यागः क्व चायं जनवत् क्षणेन ॥ १९ ॥

इत्येवमादि प्रियविप्रयुक्ता प्रियेऽन्यदाशङ्क्य च सा जगाद ।
सम्भ्रान्तमारुह्य च तत् विमानं सा स्त्री सबाष्पा गिरमित्युवाच ॥ २० ॥

---

१ P. M. न समागतः स्यात ।
२ P. M. लेखार्थं P. L. M lacuna T. ३ P. L. M. एतम् ।

युवापि तावत् प्रियदर्शनोऽपि सौभाग्यभाग्याभिजनान्वितोऽपि ।
यस्त्वां प्रियो नाभ्यचरत्[1] कदाचित् तमन्यथा यास्यसि कातरासि॥२१॥
मा स्वामिनम् स्वामिनि दोषमागाः प्रियं प्रियाहं प्रियकारिणं तम् ।
न म त्वदन्यां प्रमदामवैति स्वचक्रवाक्या दव चक्रवाकः ॥२२॥
स तु त्वदर्थं गृहवासमीप्सन् जिजीविषुस्त्वत्परितोषहेतोः ।
भ्राचा किलार्य्येण तथागतेन प्रव्राजितो नेत्रजलार्द्रवक्त्रः ॥२३॥

श्रुत्वा ततो भर्त्तरि तां प्रवृत्तिं सवेपथुः सा सहसोत्पपात ।
प्रगृह्य बाहू विरराव चोच्चैः हृदीव[र्]दग्धाभिहता करेणुः ॥२४॥
सा रोदनारोषितरक्तदृष्टिः सन्तापसंक्षोभितगात्रयष्टिः ।
पपात शीर्णाकुलहारयष्टिः फलातिभारादिव चूतयष्टिः ॥२५॥
सा पद्मरागं वमनं वमाना पद्मानना पद्मदलायताक्षी ।
पद्मा विपद्मा पतिताचलाक्षी शुशोष [प]द्मस्त्रगिवातपेन ॥२६॥
संचिन्त्य संचिन्त्य गुणांश्च भर्त्तुः दीर्घं निश्श्वास ततामं चैव ।
विभूषणश्रीर्निहिता प्रको[तो]ष्ठे ताम्रे कराग्रे च विनिर्दुधाव ॥२७॥
न भूषणे[णा]र्थो मम संप्रतीति सा दिक्षु चिक्षेप विभूषणानि ।
निर्भूषणा सा पतिता चकाशे विशीर्णपुष्पस्तवका लतेव ॥२८॥
धृतः प्रियेणाद्यमभूत् ममेति रुक्मात्सरं दर्पणमालिलिङ्गे ।
यन्नाक्ष विन्यस्ततमालपत्रौ दृष्टेव दृष्टं प्रममार्ज गण्डौ ॥२९॥
सा चक्रवाकीव भृशं चुकूज श्येनाग्रपक्षच्युतचक्रवाका ।
विस्पर्द्धमानेव विमानसंस्थैः पारावतैः कूजनलोलकण्ठैः ॥३०॥
विचित्रमुद्दास्तरणेऽपि सुप्ता वैदूर्य्यवज्रप्रतिमण्डितेऽपि ।

---

१ P. M. नाभ्यच[र]त् ।

रुक्माङ्गपादे शयने महार्हे न शर्म लेभे परिचेष्टमाना ॥ ३ १॥
संदृश्य भर्त्तुश्च विभूषणानि वासांसि वीणाप्रभृतीश्च लीलाः ।
तमो विवेशाभिननाद चोच्चैः पद्भावतीर्णेव च संसमाद ।। ३ २॥
सा सुन्दरी श्यामचलोदरी हि वज्राग्निसंभिन्नदरीगुहेव ।
शोकाग्निनान्तर्हृदि दह्यमाना विभ्रान्तचित्तेव तदा बभूव ।। ३ ३॥
रुरोद मम्लौ विरुराव जग्लौ बभ्राम तस्थौ विललाप दध्यौ ।
चकार रोषं विचकार माल्यं चकर्त्त वक्त्रं विचकर्ष वस्त्रम् ॥ ३ ४॥

तां चारुदन्तीं प्रमदां रुदन्तीं संश्रुत्य नार्य्यः परमाभितप्ताः ।
अन्तर्गृहादारुरुहुर्विमानं चासेन किन्नर्य्य इवाद्रिपृष्ठम् ।। ३ ५॥
वाष्पेण ताः क्लिन्नविषण्णवक्त्रा वर्षेण पद्मिन्य इवार्द्रपद्माः ।
स्थानानुरूपेण यथाभिमानं निलिल्यिरे तामनुदह्यमानाः ।। ३ ६॥
ताभिर्वृता हर्म्यतलेऽङ्गनाभिः चिन्नातनुः सा सुतनुर्बभासे ।
शतह्रदाभिः परिवेष्टितेव शशाङ्कलेखा शरदभ्रमध्ये ।। ३ ७॥

या तत्र तासां वचसोपपन्ना मान्या च तस्या वयसाधिका च ।
सा पृष्ठतस्तां तु[1] समालिलिङ्गे प्रमृज्य चाश्रूणि वचांस्युवाच ॥ ३ ८॥
राजर्षिबन्धो स्तव नानुरूपो धर्माश्रिते भर्त्तरि जातु शोकः ।
दृष्ट्वाकुवंशे ह्यभिकाङ्क्षितानि दायाद्यभूतानि तपोवनानि ॥ ३ ९॥
प्रायेण मोक्षाय विनिःसृतानाम् शाक्यर्षभाणां विदिताः स्त्रियस्ते[2] ।
तपोवनानीव गृहाणि यासां साध्वीव्रतं[3] कामवदाश्रितानाम् ॥ ४ ०॥
धैर्यान्वया रूपगुणाधिकत्वात् भर्त्ता हतस्ते कुरु वाष्पमोक्षम् ।

---

१ P. M. च । २ P. M. स्त्रियस्ता ।
३ P. M. साध्विपथं, P. L. M. साध्विव्रतम् T.

मनस्विनी रूपवती गुणाढ्या हृदि क्षते कान्न हि नाम मुञ्चेत् ॥४१॥
अथापि किञ्चित् व्यसनं प्रपन्नो मा चैव तद्भूत् सदृशोऽत्र वाप्यः।
अतो विशिष्टं न हि दुःखमस्ति कुलोद्भतायाः पतिदेवतायाः ॥४२॥
अथ त्विदानीं [1]लडितः सुखेन स्वस्थः फलस्थो व्यसनान्यदृष्ट्वा।
वीतस्पृहो धर्ममनुप्रपन्नः किं विक्लवे[2] रोदिषि हर्षकाले ॥४३॥

इत्येवमुक्तापि बहुप्रकारम् स्नेहात्[3] तया नैव धृतिं चकार।
अथापरा तां मनसोनुकूलं कालोपपन्नम् प्रणयादुवाच ॥४४॥
ब्रवीमि सत्यं सुविनिश्चितं मे प्राप्तं प्रियं द्रक्ष्यसि शीघ्रमेव।
त्वया विना स्थास्यति तत्र नासौ सत्त्वाश्रयस्तेजनयेव हीनः ॥४५॥
अङ्केपि लक्ष्म्याः न स निर्वृतः स्यात् त्वं तस्य पार्श्वे यदि तत्र न स्याः।
आपत्सु कृच्छ्रास्वपि चागतासु त्वां पश्यतस्तस्य भवेन्न दुःखम् ॥४६॥
त्वं निर्वृतिं गच्छ नियच्छ वाष्पम् तप्ताश्रुमोक्षात् परिरक्ष चक्षुः।
यत्तस्य भावस्त्वयि यश्च रागो न रंस्यते त्वद्विरहात् स धर्मे ॥४७॥
स्यादत्र नासौ कुलसत्त्वयोगात् काषायमादाय विहास्यतीति।
अनात्मनादाय गृहोन्मुखस्य पुनर्विमोक्तुं क एवास्ति दोषः ॥४८॥

इति युवतिजनेन सान्त्वयमाना
हृतहृदया रमणेन सुन्दरी सा।
द्रुमिडमभिमुखे पुरेव रम्भा
क्षितिमगमत् परिवारिताप्सरोभिः ॥४९॥

सौन्दरनन्दे महाकाव्ये भार्य्याविलापो नाम षष्ठः सर्गः।

---

१ P. M. चलितः। २ P. M. विक्लवा। ३ P. M. स्तदा।

## सप्तमः सर्गः ।

लिङ्गं ततश्चास्तु विधिप्रदिष्टम् गार्चेण विभ्रच्च तु चेतसा तत् ।
भार्य्यागतैरेव मनोवितर्कैः यो ह्रीयमानो न ननन्द नन्दः ॥ १ ॥
स पुष्यमासस्य च पुष्यलक्ष्म्या सर्व्वाभिसारेण च पुष्यकेतोः ।
यानीयभावेन च यौवनस्य विहारसंस्थो न शमं जगाम ॥ २ ॥
स्थितः स दीनः सहकारवीथ्यामालीनसंमूर्च्छितषट्पदायाम् ।
भृशं जजृम्भे युगदीर्घबाहुः ध्यात्वा प्रियां चापमिवाचकर्ष ॥ ३ ॥
स पातकच्चोदमिव प्रतीच्छ[न्] चूतद्रुमेभ्यस्तनुपुष्पवर्षम् ।
दीर्घं निश्वास विचिन्त्य भार्य्यां नवग्रहो नाग इवाववृद्धः[१] ॥ ४ ॥
शोकस्य हर्त्ता शरणागतानाम् शोकस्य कर्त्ता प्रतिगर्व्वितानाम् ।
अशोकमालम्ब्य स जातशोकः प्रियां[२] प्रियाशोकवनां शुशोच ॥ ५ ॥
प्रियां प्रियायाः प्रतनुं प्रियङ्गुं[३] निश्राम्य भीतामिव निष्पतन्तीम् ।
सस्मार तामश्रुमुखीं सवाष्पः प्रियां प्रियङ्गुप्रसवावदाताम् ॥ ६ ॥
पुष्पावनद्धे तिलकद्रुमस्य दृष्ट्वान्यपुष्टां शिखरे निविष्टाम् ।
सङ्कल्पयामास शिखां प्रियायाः शुक्लांशुकाद्दालमपाश्रितायाः ॥ ७ ॥
लतां प्रफुल्लामतिमुक्तकस्य चूतस्य पार्श्वे परिरभ्य जाताम् ।
निश्राम्य चिन्तामगमत् तदैवं श्लिष्टा भवेत् मामपि सुन्दरीति ॥ ८ ॥
पुष्पै[र]राला[४] अपि नागवृक्षा दान्तैः समुद्गैरिव[५] हेमगर्भैः ।
कान्तारवृक्षा इव दुःखितस्य न चक्षुराचिक्षिपुरस्य तत्र ॥ ९ ॥

---

१ P. M. इव नागावबुद्धः T. २ P. M. प्रियं भूः T.
३ P. M. प्रियां प्रियं सप्रसवावदाता T. ४ P. M. पुष्पोत्करा।
५ P. M. दान्तैः समुद्गैः P. L. M. lacuna.

गन्धं वमन्तोपि च गन्धपूर्णा गन्धर्व्वदेश्या इव गन्धपूर्णाः।
तस्यान्यचित्तस्य मृगात्मकस्य[1] घ्राणं न जह्रुः[2] हृदयं प्रतेपुः ॥१०॥
संरक्तकण्ठैरपि [3]नीलकण्ठैः तुष्टैः प्रहृष्टैरपि चान्यपुष्टैः।
लेलिह्यमानैश्च मधु द्विरेफैः स्वनद्वनं तस्य मनो नुनोद[4] ॥११॥
स तत्र भार्य्यारणिसम्भवेन वितर्कधूमेन तमःशिखेन।
कामाग्निनान्तर्हृदि दह्यमानो[5] विहाय धैर्य्यं विललाप तत्तत् ॥१२॥

अद्यावगच्छामि सुदुष्करं ते चक्रुः करिष्यन्ति च कुर्व्वते च।
त्यक्त्वा प्रियामश्रुमुखीं तपो[6] ये चेरुश्चरिष्यन्ति चरन्ति चैव ॥१३॥
तावद्दृढं बन्धनमस्ति लोके न दारवं तान्तव[7]मायसं वा।
यावद्दृढं बन्धनमेतदेव सुखं चलाक्षम् ललितञ्च वाक्यम् ॥१४॥
छित्त्वा च भित्त्वा च हि यान्ति तानि स्वपौरुषाच्चैव सुहृद्बलाच्च।
ज्ञानाच्च रौक्ष्याच्च विना विमोक्तुं न शक्यते स्नेहमयस्तु पाशः ॥१५॥
ज्ञानं न मे तच्च शमाय यत् स्यात् न चास्मि रौक्षं करुणात्मकोस्मि।
कामात्मकश्चास्मि गुरुश्च बुद्धेः स्थितोऽन्तरे चक्रगतेरिवास्मि ॥१६॥
अहं गृहीत्वापि हि भिक्षुलिङ्गं भ्रातृस्नेहेन द्विगुणानुशिष्टः।
सर्व्वास्ववस्थासु लभे न शान्तिं प्रियावियोगादिव चक्रवाकः ॥१७॥
अद्यापि तन्मे हृदि वर्त्तते च यद्दर्पणे व्याकुलिते मया सा।
कृतानृतक्रोधकमत्रवीन्मां कथं कृतोसी[8]ति शठं हसन्ती ॥१८॥

---

१ P. M. सुखात्मकस्य। २ P. M. जघ्रुः। ३ P. L. M. संरक्तकण्ठैश्च विनील०। ४ P. M. ननानुमोद P. L. M. has only the lower halves of the five letters remaining.
५ P. M. तद्वद्विदह्यमानो। ६ P. M. तथा ये।
७ P. M. आस्मरं। ८ P. M. कृतोसीति।

यथैष्यनाख्यानविशेषकार्यां मयीति यन्मामवदच्च साश्रु ।
पारिप्लवाक्षेण सुखेन बाला तन्मे वचोऽद्यापि मनो रुणद्धि ॥१९॥
बद्धासनं पादपनिर्ज्वरस्थः स्वस्थो यथा ध्यायति भिक्षुरेषः ।
ग्रक्षः क्वचिन्नाहमिवैष नूनम् ग्राम्तस्तथा ह्यप्त इवोपविष्टः ॥२०॥
पुंस्कोकिलानामविचिन्त्य घोषं वसन्तलक्ष्म्यामविचार्य्य चक्षुः ।
ग्राम्रं यथाभ्यस्यति चैष युक्तः ग्रङ्के प्रियाकर्षति नास्य चेतः ॥२१॥
ग्रस्मै नमोस्तु स्थिरनिश्चयाय निवृत्तकौतूहलविस्मयाय ।
ग्रान्तात्मनेऽन्तर्गतमानसाय चङ्क्रम्यमानाय[1] निरुत्सुकाय ॥२२॥
निरौत्तमाणस्य जलं सपद्मम् वनञ्च पुष्पम् परपुष्टजुष्टम् ।
कस्यास्ति वीर्य्यं नवयौवनस्य मासे मधौ धर्म्मसपत्नभूते ॥२३॥

भावेन गर्व्वेण गतेन लक्ष्म्या स्मितेन कोपेन मदेन वाग्भिः ।
जह्रुः स्त्रियो देवनृपर्षिसंघान् कस्माद्धि नास्मद्विधमाक्षिपेयुः ॥२४॥
कामाभिभूतो हि हिरण्यरेताः स्वाहां सिषेवे मघवानहल्यां ।
सत्त्वेन सर्गेण च तेन हीनः स्त्रीनिर्जितः किं वत मानुषोऽहम् ॥२५॥
सूर्य्यः स रम्भां प्रति जातरागस्तत्प्रीतये नष्ट इति श्रुतं नः ।
यामस्वभूतोऽश्ववधूं समेत्य र(य)तोऽश्विनौ तौ जनयाम्बभूव ॥२६॥
स्त्रीकारणं वैरविषक्तबुद्धोः वेवस्वताम्योश्चलितात्मधृत्योः ।
बह्वनि वर्षाणि बभूव युद्धं कः स्त्रीनिमित्तं न चलेदिहान्यः । २७॥
भेजे श्वपाकीं मुनिरत्तमाख्यां कामाद् वशिष्ठश्च स सद्वरिष्ठः ।
यस्यां विवस्वानिव भूजलादः सुतः प्रसूतोऽस्य कपिञ्जलादः ॥२८॥
पराशरः शापशरस्तथर्षिः काल्यां[1]सिषेवे झषगर्भयोनिं ।

---

१ Both P. M. and P. L. M. यं क्रम्यमानाय T.

अतोऽस्य यस्यां सुषुवे[१] महात्मा द्वैपायनो वेदविभागकर्त्ता ॥ २९॥
द्वैपायनो धर्मपरायणश्च रेमे समं काश्यिषु वेश्मवध्वा[२] ।
यथा हतोभूत् चलनूपुरेण पादेन विद्युन्नतयेव मेघः ३०॥
तथाङ्गिरा रागपरीतचेताः सरस्वती[] ब्रह्मसुतः षिषेवे ।
सारस्वतो यत्र सुतोऽस्य जज्ञे नष्टस्य वेदस्य पुनःप्रवक्ता ॥३१॥
तथा नृपर्षेर्दिलिपस्य य(ज)ज्ञे स्वर्गस्त्रियां काश्यप आगतास्थः ।
स्रुचं गृहीत्वा स्वदात्मतेजः चिक्षेप वह्नौ[३] असितो यतोऽभूत् ॥३२॥
तथाङ्गदोऽन्त[]तपसोऽपि गत्वा कामाभिभूतो यमुनामगच्छत् ।
धीमत्तरं यत्र रथोतरं स सारङ्गजुष्टं जनयाम्बभूव ॥३३॥
निग्राह्य शान्तां नरदेवकन्यां वनेऽपि शान्तेऽपि च वर्त्तमानः ।
चचाल धैर्य्यात् मुनिर्ऋष्यशृङ्गः[४] शैलो महीकम्प इवोच्चशृङ्गः ॥३४॥
ब्रह्मर्षिभावार्थमपास्य राज्यं भेजे वनं यो विषयेष्वनास्थः ।
स गाधिजश्चापहृतो घृताच्या समा दशैकं[५] दिवसं विवेद ॥३५॥
तथैव कन्दर्पशराभिमृष्टो रम्भां प्रति स्थूलशिरा सुमूर्च्छ ।
यः कामरोषात्मतयानपेक्ष[:] शशाप तामप्रतिगृह्यमानः ॥३६॥
प्रमत्वरायां च रुरुः प्रियायां भुजङ्गमेनापहृतेन्द्रियायां ।
संदृश्य संदृश्य जघान सर्व्वेन्द्रियं[६] न रोषेण तपो ररक्ष[७] ॥३७॥

---

१ P. M. यंस्यासुषुवे । २ P. L. M. lacuna P. M. वेश्मवर्धा । ३ P. M. वह्निं T. ४ P. M. धैर्य्य न्मुनि ऋषिशृङ्गः P. L. M. धैर्य्यान्मुनि ऋष्यशृङ्गः । ५ P. M. दशौकं T.
६ सर्व्वान्द्रियं ( both P. L. M. and P. M. ) T.
७ P. M. तथोररक्षं ।

नप्ता ग्रग्राङ्कस्य यशोगुणाङ्को बुधस्य सूनुर्विबुधप्रभावः ।
तथोर्व्वशीमप्सरसं विचिन्त्य राजर्षिरुन्मादमगच्छदैडः ॥ ३८॥
रक्तो गिरेर्मूर्द्धनि मेनकायां कामात्मकत्वाच्च स तालजङ्घः ।
पादेन विश्वावसुना सरोषम् वज्रेण हिंताल इवाभिजघ्ने ॥ ३९॥
नाग्रङ्गतायां परमाङ्गनायां गङ्गाजलेऽनङ्गपरीतचेताः ।
जङ्घस्य गङ्गां नृपतिर्भुजाभ्याम् रुरोध मैनाक[1] इवाचलेन्द्रः ॥ ४०॥
भूपस्य गङ्गाविरहात् जुघूर्ण गङ्गाभसा ग्राल इवात्तमूलः ।
कुलप्रदीपः प्रतिपस्य सूनु[:] श्रीमत्तनु[:] ग्रान्तनुरक्षतन्त्रः ॥ ४१॥
हृताच्च सौनन्दकिनानुशोचन् प्राप्तामिवोर्व्वीं स्त्रियमुर्व्वशीं तां ।
सहस्रवर्म्मा किल सोमवर्म्मा बभ्राम चित्तोद्भवभिन्नधर्म्मा ॥ ४२॥
भार्य्यां सुतां चानुममार राजा भीमप्रभावो भुवि भीमकः सः ।
बलेन सेनाक इति प्रकाग्रः सेनापतिर्देव इवार्त्तसेनः ॥ ४३॥
स्वर्गं गते भर्त्तरि ग्रान्तनौ च कालीं जिहीर्षन् जगमेजयः सः ।
ग्रवाप भीष्मात् समवेत्य मृत्युं न तद्गतं मन्मथमुत्ससर्ज ॥ ४४॥
ग्रग्रस्य पाण्डुर्मदनेन नूनम् स्त्रीसङ्गमे मृत्युमवाप्स्यसीति ।
जगाम माद्रीं न महर्षिग्रापात् ग्रसेव्यमेतत् विममर्ष मृत्युम् ॥ ४५॥

एवंविधा देवनृपर्षिसङ्घा स्त्रीणां वशं कामवशेन जग्मुः ।
धिया च सारेण च दुर्ब्बलः स प्रियामपश्यन् किमु विक्लवोऽहम् ॥ ४६॥
यास्यामि तस्मात् ग्रहमेव भूयः कामं करिष्ये विधिवत्सकामम् ।
नह्यन्यचित्तस्य चलेन्द्रियस्य लिङ्गं क्षमं धर्म्मपथाच्युतस्य ॥ ४७॥

---

१ P. M. मनामक ।

पाणौ कपालमवधाय विधाय मौण्ड्यम्
मानं निधाय विकृतं परिधाय वासः ।
यस्योद्भवो न धृतिरस्ति न शान्तिरस्ति
चित्रप्रदीप इव सोऽस्ति च नास्ति चैव ॥४८॥
यो निःसृतश्च न च निःसृतकामरागः
काषायमुद्वहति यो न च निष्कषायः ।
पात्रं बिभर्त्ति च गुणैर्न च पात्रभूतो
लिङ्गं वहन्नपि स नैव गृही न भिक्षुः ॥४९॥
न न्याय्यमन्वयवतः परिगृह्य लिङ्गम्
भूयो विमोक्तुमिति योऽपि हि मे विचारः ।
सोऽपि प्रणश्यति विचिन्त्य नृपप्रवीरां
स्तान् ये तपोवनमपास्य गृहाञ्श्रयीयुः ॥५०॥
श्राद्धाधिपो हि सगरोऽपि तथाम्बरीषो
रामोऽभ्र एव स च साङ्कृतिरन्तिदेवः ।
चीराण्यपास्य दधिरे पुनरंशुकानि
क्षिप्त्वा जटाश्च कुटिला मुकुटानि बभ्रुः ॥५१॥
तस्माद् भिक्षार्थं मम गुरुरितो यावदेव प्रयातः
त्यक्त्वा काषायं गृहमहमितस्तावदेव प्रयास्ये ।
पूज्यं लिङ्गं हि स्खलितमनसो बिभ्रतः क्लिष्टबुद्धेः
नामुत्रार्थः स्यात् उपहतमतेर्नाप्ययं जीवलोकः ॥५२॥

इति सौन्दरनन्दे महाकाव्ये नन्दविलापो नाम सप्तमः सर्गः ॥

## अष्टमः सर्गः ।

अथ नन्दमधीरलोचनम् गृहयानोत्सुकमुत्सुकोत्सुकम् ।
अभिगम्य शिवेन चक्षुषा श्रमणः कश्चिदुवाच मैत्रया[१] ॥१॥
किमिदं मुखमश्रुदुर्दिनम् हृदयस्थं विवृणोति ते श्रमः ।
धृतिमेहि नियच्छ विक्रियां न हि वाष्पश्च श्रमश्च शोभते ॥२॥
द्विविधा समुदेति वेदना नियतं चेतसि देह एव च ।
श्रुतविध्युपचा[र]कोविदा द्विविधा एव तयोश्चिकित्सकाः ॥३॥
तदियं यदि कायिकी रुजा भिषजे तूर्णमसौ समुच्यताम्[२] ।
विनिगुह्य हि रोगमातुरो नचिराच्छीघ्रमनर्थमृच्छति ॥४॥
अथ दुःखमिदं मनोमयं वद वक्ष्यामि यदत्र भेषजम् ।
मनसो हि रजस्तमःसतां[३] भिषजोऽध्यात्मविदः परीक्षकाः ॥५॥
निखिलेन च सत्यमुच्यताम् यदि वाच्यं मयि सौम्य मन्यसे ।
गतयो विविधा हि चेतसाम् वक्तु[गु]ह्यानि महाकुलानि च ॥६॥
इति तेन स बोधितस्तदा व्यवसायं प्रविवक्षुरात्मनः ।
अवलम्ब्य करेण करेण तं प्रविवेशान्यतरत्[४] वनान्तरम् ॥७॥
अथ तत्र शुचौ लतागृहे कुसुमोद्गारिणि तौ निषेदतुः ।
मृदुभिर्मृदुमारुतेरितैः उपगूढावि[व]बालपल्लवैः ॥८॥
स जगाद ततश्चिकीर्षितम् घननिश्वासगृहीतमन्तरा ।
श्रुतवाग्विभवाय[५] भिक्षवे विदुषा प्रव्रजितेन दुर्वचम् ॥९॥

---

१ P. M. मैत्रयः । २ P. M. मभूनमुच्यतां T.
३ P. M. •सत्त्व T. ४ P. M. प्रविश्यान्यतराद् T.
५ P. M. वाग्भिसदाय T.

सदृशं यदि धर्मचारिणः सततं प्राणिषु मैत्रचेतसः ।
अधृतौ यदियं हितैषिता मयि ते स्यात् करुणात्मनः सतः ॥ १० ॥
अत एव च मे विशेषतः प्रविवक्षा वचनादिनि त्वयि ।
न हि भावमिमं चलात्मने कथयेयं ब्रुवतेऽप्यसाधवे ॥ ११ ॥
तदिदं शृणु मे समासतो न रमे धर्मविधावृते प्रियां ।
गिरिसानुषु कामिनीमृते कृतरेता इव किन्नरश्वरन् ॥ १२ ॥
वनवाससुखात् पराङ्मुखः प्रथियासा गृहमेव येन मे ।
न हि धर्म्म लभे तया विना नृपतिर्हीन इवोत्तमश्रिया ॥ १३ ॥

अथ तस्य निशम्य तद्वचः प्रियभार्य्याभिमुखस्य शोचतः ।
श्रमणः स शिरः प्रकम्पयन् निजगादात्मगतं शनैरिदम् ॥ १४ ॥
कृपणं वत यूथलालसो महतो व्याधभयात् विनिःसृतः ।
प्रविविक्षति वागुरां मृगः चपलो गीतरवेण वञ्चितः ॥ १५ ॥
विहगः खलु जालमंवृतो हितकामेन जनेन मोचितः ।
विचरन् फलपुष्पवद् वनम् प्रविविक्षुः स्वयमेव पञ्जरम् ॥ १६ ॥
कलभः करिणा खलूद्धृतो बलपङ्कात् विषमात् नदीतलात् ।
जलतर्षवशेन तां पुनः सरितं ग्राहवतीं तितीर्षति ॥ १७ ॥
शरणे सभुजङ्गमे स्वपन् प्रतिबुद्धेन परेण बोधितः ।
तरुणः खलु जातविभ्रमः स्वयमुग्रं भुजगं जिघृक्षति ॥ १८ ॥
महता खलु जातवेदसा ज्वलितादुत्पतितो वनद्रुमात् ।
पुनरिच्छति नीडतृष्णया पतितुं तत्र गतव्यथो द्विजः ॥ १९ ॥
अवशः खलु काममूर्च्छया प्रियया श्येनभयाद् विनाकृतः ।
न धृतिं समुपैति न ह्रियं करुणं जीवति जीवजीवकः ॥ २० ॥

अकृतात्मतया दृषान्वितो दृणया चैव धिया च वर्जितः ।
अशनं खलु वान्तमात्मना कृपणः[:] श्वा पुनरत्तुमिच्छति ॥२१॥

इति मन्मथशोककर्षितम् तमनुध्याय सुकृर्निरीक्ष्य च ।
अमणः स हिताभिकाङ्क्षया गुणवद् वाक्यमुवाच विप्रियम् ॥२२॥
अविचारयतः शुभाशुभम् विषयेष्वेव निविष्टचेतसः ।
उपपन्नमलञ्चचक्षुषो न रतिः श्रेयसि चेत् भवेत्तव ।२३॥
श्रवणे ग्रहणेऽथ धारणे परमार्थावगमे मनःशमे ।
अविषक्तमतेः चलात्मनः न हि धर्मेऽभिरतिर्विधीयते ॥२४॥
विषयेषु तु दोषदर्शिनः परितुष्टस्य शुचेरमानिनः ।
शमकर्मसु युक्तचेतसः कृतबुद्धेर्न रतं न विद्यते[१] ॥२५॥
रमते दृषितो धनश्रिया रमते कामसुखेन वालिशः ।
रमते प्रशमेन सज्जनः परिभोगान् परिभूय विद्यया ॥२६॥
अपि च प्रथितस्य धीमतः कुलजस्यार्चितलिङ्गधारिणः ।
सदृशी न गृहाय चेतना प्रणतिर्वायुवशात् गिरेरिव ॥२७॥
स्पृहयेत् परसंश्रिताय यः परिभूयात्मवशां स्वतन्त्रतां ।
उपशान्तिपथे स्थिवे स्थितः स्पृहयेद्दोषवते गृहाय सः ॥२८॥
व्यसनाभिहतो यथा विशेत् परिमुक्तः पुनरेव बन्धनम् ।
समुपेत्य वनं तथा पुनः गृहसंज्ञं मृगयेत बन्धनम् ॥२९॥
पुरुषश्च विहाय यः कलिम् पुनरिच्छेत् कलिमेव सेवितुम् ।
स विहाय भजेत वालिशः कलिभूतामजितेन्द्रियः स्त्रियम् ॥३०॥
सविषा इव संश्रिता लताः परिसृष्टा इव सोरगा गुहाः ।

---

१ न हितिन्नविन्दे ।

विकृता इव चामयो धृता व्यसनान्ता हि भवन्ति योषितः ॥ २ १॥
प्रमदाः ममदा मदप्रदाः प्रमदा वीतमदा भयप्रदाः ।
इति दोषभयावहाश्च ताः कथमर्हन्ति निषेवणं नु ताः ॥ २ २॥
खजनः खजनेन भिद्यते सुहृदश्चापि सुहृज्जनेन यत् ।
परदोषविचक्षणाग्रथास्तदनार्य्याः प्रचरन्ति योषितः ॥ २ ३॥
सुजनाः (कुराजा) कृपणीभवन्ति यत् यदयुक्तम् प्रचरन्ति साहसम् ।
प्रविशन्ति च यच्चमूमुखं रभसा तव[1] निभिन्नभङ्गना ॥ २ ४॥
वचनेन हरन्ति वर्णना[2] निशितेन प्रहृ[र]न्ति चेतसा ।
मधु निष्ठति वाचि योषितां हृदये हालहलम्[3] महद् विषम् ॥२५॥
प्रदहन् दहनोऽपि गृह्यते विशरीरः पवनोऽपि गृह्यते ।
कुपितो भुजगोऽपि गृह्यते प्रमदानां तु मनो न गृह्यते ॥ २ ६॥
न वपुर्विमृशन्ति न स्त्रि(पि)यम् न मतिं नापि कुलं न विक्रमम् ।
प्रहरन्त्यविशेषतः स्त्रियः सरितो गा[ह]कुलाकुला इव ॥ २ ७॥
न वचो मधुरं न लालनम्[4] स्मरति स्त्री न [च] सौहृदम् [कदा] ।
बलिना वनितेव चञ्चला तदितरा भुवने न विद्यते[5] ॥ २ ८॥
अददत्सु भवन्ति नर्दाः प्रददत्सु प्रविशन्ति विभ्रमम् ।
प्रणतेषु भवन्ति गर्व्विता प्रमदास्तृणतराश्च मानिषु ॥ २ ९॥
गुणवत्सु चरन्ति भर्त्तृवत् गुणहीनेषु चरन्ति शत्रुवत्[6] ।

---

१ Both P. L. M. and P. M. खत्र ।
२ P. M. वचनेन न हन्ति वर्णना ।
३ P. M. हलाहलं T. ४ P. M राढनं T.
५ P. M. तदिदरेष्ठि वनावद्यते P. L. M. lacuna T.
६ P. M. शूतवत् ।

धनवत्सु चरन्ति तृष्णया धनहीनेषु चरन्त्यवज्ञया ॥४०॥
विषयाद् विषयान्तरं गता प्रचरत्येव यथा हतापि गौः ।
अनवेक्षितपूर्वसौहृदा रमतेऽन्यत्र गता तथाङ्गना ॥४१॥
प्रविशन्त्यपि हि स्त्रियः चितामनुबध्नन्त्यपि मुक्तजीविताः ।
अपि बिभ्रति नैव यत्नतो न तु भावेन वहन्ति सौहृदम् ॥४२॥
रमयन्ति पतीन् कथञ्चन प्रमदा याः पतिदेवताः क्वचित् ।
चलचित्ततया महत्तमो रमयन्ते हृदयं स्वमेव ताः ॥४३॥
श्वपचं किल शक्रजित्सुता वकमौनरिपुं कुमुद्वती ।
मृगराजमथो बृहद्रथा प्रमदानामगतिर्न विद्यते ॥४४॥
कुरुहैहयवृष्णिवंशजा बहुमायाकवचोऽथ शंवरः ।
मुनिरुद्भ्रान्तमनाश्च गौतमः समवापुर्वनितोद्भवं रजः ॥४५॥
अहतज्ञमनार्यमस्थिरम् वनितानामिदमीदृशं मनः ।
कथमर्हति तासु पण्डितो हृदयं सञ्जयितुं चलात्मसु ॥४६॥
अथ सूक्ष्मधृतिः प्रियाशया लघुता सा हृदयं न पश्यसि ।
किमु कायमसद्दृढं सवत् वनितानाञ्चरितं न पश्यसि ॥४७॥
यदहन्यहनि प्रधावनैर्वसनैश्चाभरणैश्च संस्कृतम् ।
अशुभं तममावृतेक्षणः शुभतो गच्छसि नावगच्छसि ॥४८॥
अथवा समवैषि तत्तनुम् अशुभं त्वम् न तु संविदस्ति ते ।
सुरभिं विदधासि हि क्रियां अशुचेस्तत्प्रभवस्य शान्तये ॥४९॥
अनुलेपनमज्जनं स्रजो मणिमुक्तातपनीयमंशुकम् ।
यदि माधु किमत्र योषितां महत्तं तासु विचीयतां[1] शुचि ॥५०॥

---

१ P. M. विनीयताम् ।

मलपङ्कधरा दिगम्बरा प्रकृतिस्त्वेनखदन्तरोमभिः ।
यदि सा तव सुन्दरी भवेत् नियतं नेऽद्य न सुन्दरी भवेत् ॥५१॥
स्रवतीमशुचिं स्पृशेच्च कः सततं जर्जरभाण्डवत् स्त्रियम् ।
यदि केवलया त्वचावृता न भवेन्मक्षिकपक्षमात्रया ॥५२॥
त्वचवेष्टितमस्थिपञ्जरम् यदि कायं ममवैषि योषिताम् ।
मदनेन च क्रयसे बलाद्वृणः खल्वधृतिश्च मन्मथ[:] ॥५३॥
शुभतामशुभेषु कल्पयन् नखदन्तत्वचकेशरोमसु ।
अविचक्षण किं न पश्यसि प्रकृतिश्च प्रभवश्च योषिताम् ॥५४॥
तदवेत्य मनःशरीरयोर्वनिता दोषवती विशेषतः ।
चपलं भवतोत्सुकं मनः प्रतिसङ्ख्यानबलेन वार्यताम् ॥५५॥

श्रुतवान् मतिमान् कुलोद्गतः परमस्य प्रशमस्य भाजनम् ।
उपगम्य यथा तथा पुनर्न हि भेत्तुं नियमं त्वमर्हसि ॥५६॥
अभिजनमहतो मनस्विनः प्रियतयशसो बहुमानमिच्छतः ।
निधनमपि वरं स्थिरात्मनः श्रुतविनयस्य नचैव[1] जीवितम् ॥५७॥

बद्ध्वा यथा हि कवचम् प्रगृहीतचापो
निघ्नो भवत्यपसृतः समराद्रथस्थः ।
भैक्षाकमभ्युपगतः परिगृह्य लिङ्गम्
निघ्नस्तथा भवति कामहतेन्द्रियास्त्रः ॥५८॥
हास्यो यथा च परमाभरणाम्बरस्रग्
भैक्ष्यं चरन् धृतधनुश्शलक्ष्णमौलिः ।

---

१ P. M. तवैव ।

वैरूप्यमभ्युपगतः परपिण्डभोजी
हास्यस्तथा गृहसुखाभिमुखः सतृष्णः ॥५८॥

यथा खनं भुक्त्वा परमग्रथनीयेऽपि ग्रथितो
वराहो निर्मुक्तः पुनरशुचि धावेत् परिचितम् ।
तथा श्रेयः गृह्णन् प्रशमसुखमास्वाद्य गुणवद्
वनं शान्तं हित्वा गृहमभिलषेत् कामदूषितः ॥६०॥

यथोल्का हस्तस्था दहति पवनप्रेरितशिखा
यथा पादाक्रान्तो दशति भुजगः क्रोधरभसः ।
यथा हन्ति व्याघ्रः शिशुरपि गृहीतो गृहगतः
तथा स्त्रीसंसर्गो बहुविधमनर्थाय भवति ॥६१॥

तदित्यात्मन्यात्मन्यात्मन

## नवमः सर्गः ।

अथैवमुक्तोऽपि स तेन भिक्षुणा
जगाम नैवोपशमं प्रियां प्रति ।
तथाहि तामेव तदा स चिन्तयन्
न तस्य शुश्राव विसंज्ञबान्धवः[१] ॥१॥
यथा हि वैद्यस्य चिकीर्षतः शिवम्
वचो न गृह्णाति मुमूर्षुरातुरः ।
तथैव मत्तो बलरूपयौवनैः
हितं न जग्राह स तस्य तद्वचः ॥२॥
न चाच्च चित्तं यदि रागपाशना
मनोऽभिभूयेत तमोवृतात्मनः ।
नरस्य पाशा हि तदा निवर्त्तते
यदा भवत्यन्तगतं तमस्तनु ॥३॥
ततस्तथाच्छिन्नमवेक्ष्य तं तदा
बलेन रूपेण च यौवनेन च ।
गृहप्रयाणं प्रति च व्यवस्थितं
जगाम नन्दं श्रमणः स शान्तये ॥४॥
बलञ्च रूपञ्च नवञ्च यौवनम्
तथावगच्छामि यथावगच्छसि ।

---

१ P. L. M. lecuna. P. M. विसंज्ञा० ।

अहन्त्विदं ते चयमव्यवस्थितम्
यथाबबुद्धो न तथा च बुध्यसे ॥५॥
इदं हि रोगायतनं जरार्णवम्
नदीतटौनौकहवच्चलाचलम् ।
न वेत्सि देहं जलफेनदुर्ब्बलम्
बलस्थतामात्मनि येन मन्यसे ॥६॥
यदान्नपानाग्रनयानकर्म्मणा-
मसेवनादप्यतिसेवनादपि ।
शरीरमाशून्नविपत्ति दृश्यते
बलेऽभिमानस्तव केन हेतुना ॥७॥
हिमातपव्याधिजराक्षुदादिभिः
यदाप्यनर्थैरुपनीयते जगत् ।
जलं शुचौ मास इवार्करश्मिभिः
क्षयं व्रजेत् किं बलदृप्त मन्यसे ॥८॥
त्वगस्थिमांसक्षतजात्मकं यदा
शरीरमाहारवशेन तिष्ठति ।
अशक्तमार्त्तं सततप्रतिक्रियम्
बलान्वितोऽस्मीति कथं विहन्यसे ॥९॥
यथा घटं मृण्मयमाममाश्रितो
नरस्तितीर्षेत् क्षुभितं महार्णवम् ।
समुच्छ्रयं तद्वदसारमुद्वहन्-
बलं व्यवस्येत् विषयार्थमुद्यतः ॥१०॥

शरीरमामादपि मृण्मयाद् घटात्
द्रदन्तु निःसारतमं मतं मम ।
चिरं हि तिष्ठेत् विधिवद्धृतो घ[टः]
समुच्छ्रयोऽयं सुधृतोऽपि भिद्यते ॥११॥
यदाम्बुभृद्वाय्वनलाश्च धातवः
सदा [नि]रुद्धाः विषमा इवोरगाः ।
भवन्त्यनर्थाय शरीरमाश्रिताः
कथं बलं रोगविधौ व्यवस्यसि ॥१२॥
प्रयान्ति मन्त्रैः प्रशमं भुजङ्गमा
न मन्त्रसाध्यास्तु भवन्ति धातवः ।
केचिच्च कञ्चिच्च दशन्ति पन्नगाः
सदा च सर्व्वञ्च तुदन्ति धातवः ॥१३॥
इदं हि शय्यान्नपानभोजनैः
गुणैः शरीरं चिरमप्यवेक्षितम् ।
न मर्षयत्येकमपि व्यतिक्रमम्
यतो [1]महागोविषवत् प्रकुप्यति ॥१४॥
यदा हिमार्त्तो ज्वलनं निषेवते
हिमं निदाघाभिहतोऽभिकाङ्क्षति ।
क्षुधान्वितोऽन्नं सलिलं तृषान्वितो
बलं कुतः किञ्च कथञ्च कस्य च ॥१५॥

---

१ P. M. महाहो० ।

तदेवमाज्ञाय शरीरमातुरम्
बलान्वितोऽस्मीति न मन्तुमर्हसि ।
असारमखन्तमनिश्चितं जगत्
जगत्यनित्ये बलमव्यवस्थितम् ॥ १६॥
क्व कार्त्तवीर्य्यस्य बलाभिमानिनः
सहस्रबाहोर्बलमर्জ্জुनस्य तत् ।
चकर्त्त बाहून् युधि यस्य भार्गवो
महाद्रि पृङ्क्षाग्रनिर्गिरेरिव ॥ १७॥
क्व तद्बलं कंसविकर्षिणो हरे-
स्तरङ्गराजस्य पुटावभेदिनः[१] ।
यमेकबाणेन निजघ्निवान् जरा
क्रमागता रूपमिवोत्तमं जरा ॥ १८॥
दितेः सुतस्यामररोषकारिणः
शमूबचेर्वा नमुचेः क्व तद्बलम् ।
यमाहवे क्रुद्धमिवान्तकं स्थितम्
जघान फेनावयवेन वासवः ॥ १९॥
बलं कुरूणां क्व च तत्तदाभवत्
युधि स्खलित्वा तरसौजसा च ये ।
समित्समिद्धा ज्वलना इवाध्वरे
हतासवो भस्मनि पर्य्यवस्थिताः ॥ २०॥

---

१ P. M. पुटोर।

अतो विदित्वा बलवीर्य्य[1]मानिनाम्
बलान्वितानामवमर्हितं बलम् ।
जगज्जरामृत्युवशं विचारयन्
[2]बले ऽभिमानं न विधातुमर्हसि ॥ २१ ॥

बलं महद्वा यदि येन मन्यसे
कुरुष्व युद्धं सह तावदिन्द्रियैः ।
जयस्व [3]तेऽस्ति प्रहरच्च ते बलं
पराजयेद् वितथं च ते बलम् ॥ २२ ॥
तथा हि वीराः पुरुषा न ते मता
जयन्ति ये साश्वरथद्विपान् नरान् ।
यथा मता वीरतरा मनीषिणो
जयन्ति लोकानि ष[ड्]इन्द्रियाणि ये ॥ २३ ॥

अहं वपुष्मानिति यच्च मन्यसे
विचक्षणं नैतदिदं च गृह्यताम् ।
क्व तद्वपुः सा च वपुष्मतो तनुः
महच्च सार्व्यच्च सारणच्च ॥ २४ ॥
यथा मयूरस्खलचित्रचन्द्रको
बिभर्त्ति रूपं गुणवत् स्वभावतः ।
शरीरसंस्कारगुणादृते तथा
बिभर्षि रूपं यदि रूपवानसि ॥ २५ ॥

---

१ P. M. P. L. M. °विर्य्ये ।
२ P. M. परे, P. L. M. पले । ३ P. M. तेन ।

यदि प्रतीपं तृणयान्न वासवा
न शौचकाले यदि संस्पृशेदपः ।
सृजाविशेषं यदि नाददीत वा
वपु र्वपुष्मन् वद कीदृशं भवेत् ॥१६॥
नवं वयस्यात्मगतं निशाम्य यद्
गतोन्मुखं ते विषयाप्तये मनः ।
नियच्छ तच्छैलनदी[1]रयोपमम्
द्रुतं हि गच्छत्यनिवर्त्ति यौवनम् ॥१७॥
ऋतुर्व्यतीतः परिवर्त्तते पुनः
क्षयं प्रयातः पुनरेति चन्द्रमाः ।
गतं गतं नैव तु संनिवर्त्तते
सुखं नदीनाञ्च नृणाञ्च यौवनम् ॥१८॥
विवर्णितश्मश्रु बलीविकुञ्चितम्
विशीर्णदन्तं गतविभ्रमं निष्प्रभम् ।
यदा सुखं द्रक्ष्यसि जर्जरं तदा
जराभिभूतो विमदो भविष्यसि ॥१९॥
निषेव्य पानं मदनीयमुत्तमम्
निशाविवासेषु चिरादिमाद्यति ।
नरस्तु मत्तो बलरूपयौवनैः
न कश्चिदप्राप्य जरां विमाद्यति ॥२०॥
यथेक्षुरभ्यन्तरसंप्रपिण्डितो

---

१ P. M. तलेनदी०।

भुवि प्रविद्धो दहनाय ग्रुह्यते।
तथा जरायन्त्रनिपिष्टिता तनु-
र्निपीतसारा मरणाय तिष्ठति ॥२१॥
यथा हि नृभ्यां करपत्रपीडितम्
समुच्छ्रितं दारु भिनत्त्यनेकधा।
तथोच्छ्रितां पातयति प्रजामिमाम्
अहर्निशाभ्यासुपसंहिता जरा ॥२२॥
स्मृतेः प्रमोषो वपुषः पराभवो
रतेः क्षयो वा श्रुतिचक्षुषां ग्रहः।
श्रमस्य योनि र्बलवीर्य्ययो र्वधो
जरासमो नास्ति ग्ररीरिणां रिपुः ॥२३॥
इदं विदित्वा [वि]निधत्स्व दैशिकम्
जराभिधानं जगतो महद्भयम्।
अहं वपुष्मान् करवान् युवेति वा
न मा[न]मारोढुमनार्य्यमर्हसि ॥२४॥
अहं ममेत्येव च रक्तचेतसाम्
ग्ररीरसंज्ञो भवज(य)ः कलौ ग्रहः।
तमुत्सृजैवं यदि ग्राम्यते भवात्
भयं ह्यहं चेति ममेति वर्क्ष्यति ॥२५॥
यदा ग्ररीरं न वशेऽस्ति[1] कस्यचित्
निरस्यमानं विविधैरुपक्रमैः।

---

१ P. M. ग्ररीरे न वशोऽस्ति०।

कथं चमं वेत्तुमहं ममेति वा
शरीरसंज्ञं गृहमापदामिदम् ॥३६॥
सपन्नगे यः कुणपे सदाऽशुचौ
रमेत नित्यं प्रतिसंस्कृतेऽबले ।
स दुष्टधातावशुचौ चलाचले
रमेत काये विपरीतदर्शनः ॥३७॥
यथा प्रजाभ्यः कुनृपो बलाद् बली
हरत्यशेषं च न चाभिरक्षति ।
तथैव कायो व्यसनादिसाधनम्
हरत्यशेषञ्च न चानुवर्त्तते ॥३८॥
यथा प्ररोहन्ति गृहाण्ययत्नतः
क्षितौ प्रयत्नात्तु भवन्ति शालयः ।
तथैव दुःखानि भवन्त्ययत्नतः
सुखानि यत्नेन भवन्ति वा न वा ॥३९॥
शरीरमार्त्तं परिकर्षतश्चलम्
न चास्ति किञ्चित् परमार्थतः सुखम् ।
सुखं हि दुःखप्रतिकारसेवया
स्थिते च दुःखे तनुनि व्यवस्थति ॥४०॥
यथानपेक्ष्याग्यमपौष्णितं सुखम्
प्रबाधते दुःखमुपेतमप्यपि ।
तथानवेक्ष्यात्मनि दुःखमागतम्
न विद्यते किञ्चन कस्यचित् सुखम् ॥४१॥

शरीरमीदृक् बहुदुःखमध्रुवम्
फलानुरोधाद्यवावगच्छसि ।
द्रुवत् फलेभ्यो धृतिरस्मिभिर्मनो-
ऽभिगच्छतां गौरिव शस्यलालसा ॥ ४२ ॥
न कामभोगा हि भवन्ति तृप्तये
हवींषि दीप्तस्य विभावसोरिव ।
यथा यथा कामसुखेषु वर्त्तते
तथा तथेच्छा विषयेषु वर्द्धते ॥ ४३ ॥
यथा च कुष्ठव्यसनेन दुःखितः
प्रतापयन्नेव शमं निगच्छति ।
तथेन्द्रियार्थैर्व्यजितेन्द्रियश्चरन्
न कामभोगैरुपशान्तिमृच्छति ॥ ४४ ॥
यथा हि भैषज्यसुखाभिकाङ्क्षया
भजेत रोगान्न भजेत तत्क्षयम् ।
तथा शरीरे बहुदुःखभाजने
रमेत मोहाद् विषयाभिकाङ्क्षया ॥ ४५ ॥
अनर्थकामः पुरुषस्य यो जनः
स तस्य शत्रुः किल तेन कर्म्मणा ।
अनर्थमूला विषयाश्च केवला
ननु प्रहेया विषया यथारयः ॥ ४६ ॥
इहैव मूला रिपवो वधात्मकाः
प्रयान्ति काले पुरुषस्य मित्रताम् ।

परत्र चैवेह च दुःखहेतवो
भवन्ति कामा न तु कस्यचित् शिवाः ॥४७॥
यथोपयुक्तम् रसवर्णगन्धवत्
वधाय किम्पाकफलम् न पुष्टये ।
निषेव्यमाणा विषयास्तथात्मनो
भवन्त्यनर्थाय तथा न भूतये ॥४८॥
तदेतदाज्ञाय विपाप्मनात्मना
विमोक्षधर्मो ह्युपसंहितं हितम् ।
जुषस्व मे सज्जनसम्मतं मतम्
प्रयच्छ वा निश्चयमुद्गिरन् गिरम् ॥४९॥

इति हितमपि वक्तुमुद्यतः
श्रुतमहता श्रमणेन तेन नन्दः ।
न धृतिमुपययौ च न शर्म लेभे
द्विरद इवातिमदो मदान्धचेताः ॥५०॥
नन्दस्य भावमवगम्य ततः स भिक्षुः
पारिप्लवं गृहसुखाभिमुखं न धर्मे ।
सत्त्वाशयानुशयभावपरीक्षकाय ।
बुद्धाय तत्त्वविदुषे कथयाञ्चकार ॥५१॥

सौन्दरनन्दे महाकाव्ये मदापवादो नाम
नवमः सर्गः ॥

## दशमः सर्गः ।

श्रुत्वा ततः सद्भुतमुत्सिसृक्षुं भार्य्यादिदृक्षुं भवनं विविक्षुम् ।
नन्दं निरानन्दमपेतधैर्य्यं अभ्युज्जिहीर्षुं मुनिराजुहाव ॥१॥
तं प्राप्तमप्राप्तविमोक्षमार्गं पप्रच्छ चित्तस्खलितं सुचित्तः ।
स ह्रीमते ह्रीवितनो जगाद स्वं निश्चयं निश्चयकोविदाय ॥२॥
नन्दं विदित्वा सुगतस्ततस्तं भार्य्याभिधाने तमसि भ्रमन्तम् ।
पाणौ गृहीत्वा वियदुत्पपात मलं जले साधुरिवोज्जिहीर्षुः ॥३॥
काषायवस्त्रौ कनकावदातौ विरेजतुस्तौ नभसि प्रसन्ने ।
अन्योन्यसंश्लिष्टविकीर्णपक्षौ सरःप्रकीर्णाविव चक्रवाकौ ॥४॥
तौ देवदारूत्तमगन्धवन्तम् नदीसरःप्रस्रवणौघवन्तम् ।
आजग्मतुः कञ्चन धातुमन्तम् देवर्षिमन्तं हिमवन्तमाशु ॥५॥
तस्मिन् गिरौ चारणसिद्धजुष्टे शिवे हविर्धूमकृतोत्तरीये ।
अगम्यपारस्य निराश्रयस्य तौ तस्थतुर्द्वीप इवाम्बरस्य ॥६॥
शान्तेन्द्रिये तत्र मुनौ स्थिते तु सविस्मयं दिक्षु ददर्श नन्दः ।
दरीश्च कुञ्जांश्च वनौकसश्च विभूषणं रत्नमेव चाद्रेः ॥७॥
बद्धायते तत्र सिते हि शृङ्गे संछिन्नवर्हः ग्रथितो मयूरः ।
भुजे बलस्यायतपीनबाहोः वैदूर्य्यकेयूर इवावभासे ॥८॥
मनःशिलाधातुशिलाश्रयेण पीनीकृताङ्गो[1] विरराज सिंहः ।
[2]सन्तप्तचामीकरभक्तिचित्रम् रूप्याङ्गदं शीर्णमिवाम्बरस्य ॥९॥
व्याघ्रः क्रमव्यायतखेलगामी लाङ्गूलचक्रेण कृतापसव्यः ।
बभौ गिरेः प्रस्रवणं पिपासुर्दित्सन् पितृभ्योऽम्बु इवावतीर्णः ॥१०॥

---

१ P. M. तापीकृताङ्गो T. २ P. M. तं तप्त T.

चलत्कदम्बे हिमवन्नितम्बे तरौ प्रलम्बे चमरो ललम्बे ।
क्षेप्तुं विलग्नं न शशाक बालं कुलोद्वतः प्रीतिमिवार्य्यवृत्तः ॥ ११ ॥
सुवर्णगौरास्य किरातसंघा मयूरपिच्छो[1]ज्ज्वलगाचरेखाः ।
शार्दूलपातप्रतिमा गुहाभ्यो निष्पेतुरुद्गार इवाचलस्य ॥ १२ ॥
दरीचरीणामतिसुन्दरीणां मनोहरश्रोणिकुचोदरीणाम् ।
वृन्दानि रेजुर्दिशि किन्नरीणां पुष्पोत्किराणामिव वल्लरीणाम् ॥ १३ ॥
नगान्नगस्योपरि देवदारूनायासयन्तः कपयो विचेरुः ।
तेभ्यः फलं नापुरतोऽपजग्मुः मोघप्रसादेभ्य इवेश्वरेभ्यः ॥ १४ ॥

तस्मात्तु यूथादपमार्य्यमाणां निष्पीड़ितालक्तकरक्तवक्त्राम् ।
शाखामृगीमेकविपन्नदृष्टिं दृष्ट्वा मुनिर्नन्दमिदं बभाषे ॥ १५ ॥
का नन्द रूपेण च चेष्टया च संपश्यतस्त्वारुतरा मता ते ।
एषा मृगी वैकविपन्नदृष्टिः स वा जनो यत्र गता तवेष्टिः ॥ १६ ॥
इत्येवमुक्तः सुगतेन नन्दः श्रुत्वा स्मितं किञ्चिदिदं जगाद ।
क्व चोत्तमस्त्री भगवन् वधूस्ते मृगी नगक्लेशकरी क्व चैषा ॥ १७ ॥

ततो मुनिस्तस्य निगृह्य वाक्यं हेत्वन्तरं किञ्चिदवेक्षमाणः ।
आलम्ब्य नन्दं प्रययौ तथैव क्रीड़ावनं वज्रधरस्य राज्ञः ॥ १८ ॥
ऋतावृतावाकृतिमेक एके क्षणे क्षणे बिभ्रति यत्र वृक्षाः ।
चित्रां समस्तामपि केचिदन्ये षडाम्रतूणां श्रियमुद्वहन्ति ॥ १९ ॥
पुष्पन्ति केचित् सुरभीरुदारा मालाः सृजश्च ग्रथिता विचित्राः ।
कर्णानुकूलानवतंसकांश्च प्रत्यर्थिभूतानिव कुण्डलानाम् ॥ २० ॥

---

१ P. M. °पिच्छो ।

रक्तानि फुल्लाः कमलानि यत्र प्रदीपवृक्षा इव भान्ति वृक्षाः ।
प्रफुल्लनीलोत्पलरोहिणोऽन्ये मोन्मीलिताक्षा इव भान्ति वृक्षाः ॥२१॥
नानाविरागाण्यथ पाण्डुराणि सुवर्णभक्तिव्यवभासितानि ।
अताम्रवान्येकघनानि यत्र सूक्ष्माणि वासांसि फलन्ति वृक्षाः ॥२२॥
हारान् मणीनुत्तमकुण्डलानि केयूरवर्य्याण्यथ नूपुराणि ।
एवंविधान्याभरणानि यत्र स्वर्गानुरूपाणि फलन्ति वृक्षाः ॥२३॥
वैदूर्य्यनालानि च काञ्चनानि पद्मानि वज्राङ्कुरकेसराणि ।
स्वर्गोचमाण्युत्तमगन्धवन्ति रोहन्ति निष्कम्पतला नलिन्यः ॥२४॥
पद्मायतांश्चैव ततांश्च तांस्तान् वाद्यस्य हेतून् सुखरान् घनांश्च ।
फलन्ति वृक्षा मणिहेमचित्रा क्रीडासहायांस्त्रिदशालयानाम् ॥२५॥
मन्दारवृक्षांश्च कुशेशयांश्च पुष्पाननान् कोकनदांश्च वृक्षान् ।
आक्रम्य माहात्म्यगुणैर्विराजन् प्रजायते यत्र स पारिजातः ॥२६॥
तप्ते तपःश्रीलफलैरखिन्नैस्त्रिपिष्टपक्षेत्रतले प्रसूताः ।
एवंविधा यत्र सदानुवृत्ता दिवौकसां भोगविधानवृक्षाः ॥२७॥

मनःशिलाभैर्वदनैर्विहङ्गा यत्राद्रिभिः स्फाटिकसन्निभैश्च ।
शृङ्गैश्च पद्मैरतिलोहितान्तैः माञ्जिष्ठकैरर्द्धसितैश्च पादैः ॥२८॥
चित्रैः सुवर्णच्छदनैस्तथान्यैः वैदूर्य्यनीलैः नयनैः प्रसन्नैः ।
विहङ्गमा श्रोत्रिरिकाभिधाना रुतैर्मनः श्रोत्रहरैर्भ्रमन्ति ॥२९॥
रक्ताभिरग्रेषु च वल्लरीभिः मध्येषु चामीकरपिञ्जराभिः ।
वैदूर्य्यवर्णाभिरुपान्तमध्येष्वलङ्कृता यत्र खगाश्चरन्ति ॥३०॥
रोचिष्णवो नाम पतत्रिणोऽन्ये दीप्ताग्निवर्णाज्ज्वलितैरिवास्यैः ।
भ्रमन्ति दृष्टीर्विषुषाचिपन्तः खनैः शुभैरप्सरसो हरन्तः ॥३१॥

यत्रेष्टचेष्टाः सततप्रहृष्टा निरर्त्तयो निर्ज्वरसो विशोकाः।
स्वैः कर्म्मभिर्हीनविशिष्टमध्याः स्वयंप्रभाः पुण्यकृतो रमन्ते ॥३२॥
नित्योत्सवं तच्च निशाम्य लोकं निस्तन्द्रिनिद्रारतिशोकरोगम्।
नन्दो जरामृत्युवशं सदार्त्तं मेने श्मशानप्रतिमं नृलोकम् ॥३३॥
ऐन्द्रं वनं तच्च ददर्श नन्दः समन्ततो विस्मयफुल्लदृष्टिः।
हर्षान्विताप्सारसः परीयुः सगर्व्वमन्योन्यमवेक्षमाणाः ॥३४॥
सदा युवत्यो मदनैककार्य्याः साधारणाः पुण्यकृतां विहाराः।
दिव्याश्च निर्द्वेषपरिग्रहाश्च तपःफलस्याश्रयणं सुराणाम् ॥३५॥
तासां जगुर्धीरमुदात्तमन्याः पद्मानि काश्चित् ललितं वभञ्जुः।
अन्योन्यहर्षात् ननृतुस्तथान्याश्चिच्छेदुरन्याः स्तनभिन्नहाराः ॥३६॥
पूर्व्वं तपोमूल्यपरिग्रहेण स्वर्गक्रयार्थं कृतनिश्चयानाम्।
मनांसि खिन्नानि तपोधनानां हरन्ति यत्राप्सरसो लताभ्यः ॥३७॥
कासाञ्चिदासां वदनानि रेजुर्वनान्तरेभ्यश्चलकुण्डलानि।
व्याविद्धपर्णेभ्य इवाकरेभ्यः पद्मानि कादम्बविघट्टितानि ॥३८॥
ता निःसृताः प्रेक्ष्य वनान्तरेभ्यस्तडित्पताका इव तोयदेभ्यः।
नन्दस्य रागेण तनुर्विवेपे जले चले चन्द्रमसः प्रभेव ॥३९॥
वपुश्च दिव्यं ललिताश्च चेष्टाः ततः स तासां मनसा जहार।
कौतूहलावर्जितया तु दृष्ट्या संश्लेषतर्षादिव जातरागः ॥४०॥
स जाततर्षोऽप्सरसः पिपासुः तत्प्राप्तयेऽधिष्ठितविक्लवार्त्तः।
लोलेन्द्रियाश्वेन मनोरथेन ह्रीयमानो न धृतिं जगाम ॥४१॥

यथा मनुष्या मलिनं हि वासः क्षारेण भूयो मलिनीकरोति।
मलक्षयार्थं न मलोद्भवार्थं रजस्तथाम्भो मुनिराचकर्ष ॥४२॥

दोषा[']श्च (स्व)काया[द्] भिषगुज्झिहीर्षुः भूयो यथा क्लेशयितुं यतेत।
रागं तथा तस्य मुनिर्जिघांसुर्भूयस्तरं रागमुपानिनाय ॥४३॥
दीपप्रभां हन्ति यथा च काले सहस्ररश्मेरुदितस्य दीप्तिः ।
मनुष्यलोके द्युतिमङ्गनानामन्तर्दधात्यप्सरसां तथा श्रीः ॥४४॥
महच्च रूपं खलु हन्ति रूपं शब्दो महान् हन्ति च शब्दमल्पम् ।
गुर्वी रुजा हन्ति रुजां सुमृद्धौ सर्व्वा महान् हेतुरणोर्वधाय ॥४५॥

मुनेः प्रभावाच्च शशाक नन्दस्तद्दर्शनं सोढुमसह्यमन्यैः ।
अवीतरागस्य हि दुर्ब्बलस्य मनो दहेदप्सरसां वपुःश्रीः ॥४६॥
मत्वा ततो नन्दमुदीर्णरागं भार्य्यानुरोधादपवृत्तरागम् ।
रागेण रागं प्रतिहन्तुकामो मुनिर्विरागो गिरमित्युवाच ॥४७॥
एताः स्त्रियः पश्य दिवौकसस्त्वं निरीक्ष्य च ब्रूहि यथार्थ तत्त्वम् ।
एताः कथं रूपगुणैर्मतास्ते स वा जनो यच्च गतं मनस्ते ॥४८॥

अथाप्सरस्येव निविष्टदृष्टौ रागाग्निनान्तर्हृदये प्रदीप्तः ।
सगद्गदं कामविषक्तचेताः कृताञ्जलिर्वाक्यमुवाच नन्दः ॥४९॥
दृष्यैङ्गनासौ सुषितैकदृष्टिर्यदन्तरे स्यात् तव नाथ वध्वाः ।
तदन्तरेऽसौ कृपणा वधूस्ते वपुश्चतीरप्सरसः प्रतीत्य ॥५०॥
आस्था यथा पूर्व्वमभूच्च काचित् अन्यासु मे स्त्रीषु निशाम्य भार्य्याम् ।
तस्यां तथा संप्रति काचिदास्था न मे निशाम्यैव हि रूपमासाम् ॥५१॥
यथा प्रतप्तो मृदुनातपेन दह्येत कश्चिन्महतानलेन ।
रागेण पूर्व्वं मृदुनाभितप्तो रागाग्निनाजेन तथाभिदह्ये ॥५२॥
वामारिणा मां परिषिञ्च तस्माद् यावन्न दह्ये स हवाजशत्रुः ।
रागाग्निरद्यैव हि मां दिधक्षुः कक्षं स वृक्षायमिवोत्थितोऽग्निः ॥५३॥

प्रसीद सौदामि विमुञ्च मां मुने वसुन्धराधैर्य्य न धैर्य्यमस्ति मे ।
असून् विमोक्ष्यामि विमुक्तमानसः प्रयच्छ वा वागमृतं सुमूर्षवे ॥५ ४॥
अनर्थभोगेन विघातदृष्टिना प्रमादद्दष्टेन तमोविषाग्निना ।
अहं हि दष्टो हृदि मन्मथाहिना विधत्स्व तस्मादगदं महाभिषक्॥५५॥
अनेन दष्टो मदनाहिनाऽहिना न कश्चिदात्मन्यवस्थितः स्थितः ।
सुमोह बोद्धो[र्हि] चलात्मनो मनो बभूव धीमांश्च स ग्रन्थनुस्थनुः॥५६॥
स्थिते विशिष्टे त्वयि संश्रये श्रेये यथा न यायी(मी) वडवंदिग्रं
दिग्रम् ।
यथा च लभ्या व्यसनक्षयं क्षयं व्रजामि तन्मे कुरु शंसतः सतः ॥५ ७॥
ततो जिघांसुर्हृदि तस्य तत्तमस्तमोनुदो नक्तमिवोत्थितं तमः ।
महर्षिचन्द्रो जगतस्तमोनुदस्तमःप्रहीणो निजगाद गौतमः ॥५ ८॥
धृतिं परिष्वज्य विधूय विक्रियां निगृह्य तावत् श्रुतिचेतसी शृणु ।
दृमा यदि प्रार्थयसे त्वमङ्गना विधत्स्व शुल्कार्थमिहोत्तमं तपः ॥५९॥
[1]दृमा हि शक्यन्त बलान्न सेवया न संप्रदानेन न रूपवत्तया ।
दृमा ह्रियन्ते खलु धर्म्मचर्य्यया स चेत् प्रहर्षस्तव धर्म्ममादृतः ॥६ ०॥
दृढाधिवासो दिवि दैवतैः समं वनानि रम्याण्यजरास्त्र योषितः ।
इदं फलं खल्वस्य शुभस्य कर्म्मणः न दत्तमन्येन न वाप्यहेतुतः ॥६ १॥
क्षितौ मनुष्यो धनुरादिभिः श्रमैः स्त्रियः कदाचिद् विलभेत वा नवा ।
असंशयं यत्त्विह धर्म्मचर्य्यया भवेयुरेता दिवि पुण्यकर्म्मणः ॥६ २॥
तदप्रमत्तो नियमे समुद्यतो रमस्व यच्चारुतरोऽभिलिप्ससे ।
अहं च तेऽत्र प्रतिभूः स्थिरे व्रते यथा त्वमाभिर्मिथतं समेष्यसि ॥६३॥

---

१ P. L. M. दृमा हि शक्या एव गात्र सेवया ।

अतःपरं परमिति व्यवस्थितः परां धृतिं परमसुनौ चकार सः ।
ततो मुनिः पवन इवाम्बरात् पतन् प्रगृह्य तं पुनरगमन् महीतलम् ॥
६४॥

इति सौन्दरनन्दे महाकाव्ये स्वर्गनिदर्शनो
नाम दशमः सर्गः ।

## एकादशः सर्गः।

ततस्ता योषितो दृष्ट्वा नन्दो नन्दनचारिणीः।
बबन्ध नियमस्तम्भे दुर्दमं चपलं मनः ॥१॥
सोऽनिष्टनैष्कर्म्यरसो ज्ञानतामरसोपमः।
चचार विरसो धर्म्मं निवेश्याप्यरसो हृदि ॥२॥
तथा लोलेन्द्रियो भूत्वा दयितेन्द्रियगोचरः।
इन्द्रियार्थवशादेव बभूव नियतेन्द्रियः ॥३॥
कामचर्य्यासु कुशलो भिक्षुचर्य्यासु विक्लवः।
परमाचार्य्यविष्टब्धो ब्रह्मचर्य्यं चचार सः ॥४॥
संवृतेन च शान्तेन तीव्रेण मदनेन च।
जलाग्नेरिव संसर्गात् शशाम[1] च ववोष च ॥५॥
स तावद् दर्शनीयोऽपि वैरूप्यमगमत् परम्।
चिन्तयाप्यरसाच्चैव नियमेनायतेन च ॥६॥
प्रस्तावेष्वपि भार्य्यायाः प्रियभार्य्यस्तथापि सः।
वीतराग इवास्वस्थो न जहर्ष न चुक्षुभे ॥७॥
तं व्यवस्थितमाज्ञाय भार्य्यारागात् पराङ्मुखम्।
अभिगम्याब्रवीत् नन्दमानन्दः प्रणयादिदम् ॥८॥
अहो सदृशमारब्धं श्रुतस्याभिजनस्य च।
निगृहीतेन्द्रियः स्वस्थो नियमे यदि संस्थितः ॥९॥

---

१ P. M. जलाग्नेः T. २ P. M. शशास T.

अभिव्यक्तस्य कामेषु रागिणो विषयात्मनः ।
यदियं संविदुत्पन्ना नेयमल्पेन हेतुना ॥ १० ॥
व्याधिरल्पेन यत्नेन मृदुः प्रतिनिवार्य्यते ।
प्रबलः प्रबलैरेव यत्नैर्नश्यति वा न वा ॥ ११ ॥
दुर्हरो मानसो व्याधिर्बलवांश्च तवाभवत् ।
विनिवृत्तो यदि स ते सर्व्वथा धृतिमानसि ॥ १२ ॥
दुष्करं साधनार्य्येण मानिना चैव मार्दवम् ।
अतिसर्गश्च लुब्धेन ब्रह्मचर्य्यञ्च रागिणा ॥ १३ ॥
एकस्तु मम सन्देहस्तवास्यां नियमे धृतौ ।
अचानुनयमिच्छामि वक्तव्यं यदि मन्यसे ॥ १४ ॥
आर्ज्जवाभिहितं वाक्यं न च गन्तव्यमन्यथा ।
रक्षमप्याश्रये मुग्धे रक्षतां नैति सज्जनः ॥ १५ ॥
अप्रियं हि हितं स्निग्धमस्निग्धमहितं प्रियम् ।
दुर्लभं तु प्रियहितं स्वादु पथ्यमिवौषधम् ॥ १६ ॥
विश्वासश्चार्थचर्य्या च सामान्यं सुखदुःखयोः ।
मर्षणं प्रणयश्चैव मित्रवृत्तिरियं सताम् ॥ १७ ॥
तदिदं त्वां विवक्षामि प्रणयान्न जिघांसया ।
लक्ष्योहि विवक्षा मे यते नार्हस्युपेक्षितुम् ॥ १८ ॥
अपरोभूतको धर्म्मं चरसीत्यभिधीयसे ।
किमिदं भूतमाहोस्वित् परिहासोऽयमीदृशः ॥ १९ ॥

---

१ P. L.-M. रक्षतो ।

यदि तावदिदं सत्यं वक्ष्याम्यत्र यदौषधम् ।
औद्धत्यमथ वक्तृणामभिधास्यामि तद्रुजः ॥२०॥

स्मृत्वा पूर्व्वमथो तेन हृदि सोऽभिहतस्तदा ।
ध्यात्वा दीर्घं निशश्वास किञ्चिच्चावाङ्मुखोऽभवत् ॥२१॥

ततस्तस्येङ्गितं ज्ञात्वा मनःसंकल्पसूचकम् ।
बभाषे वाक्यमानन्दो मधुरोदर्कमप्रियम् ॥२२॥

आकारेणावगच्छामि तव धर्म्मप्रयोजनम् ।
यज्ज्ञात्वा त्वयि जातं मे हास्यं कारुण्यमेव च ॥२३॥

यथाध्वनार्थं स्कन्धेन कश्चिद् गुर्व्वीं शिलां वहेत् ।
तद्वत् त्वमपि कामार्थं नियमं वोढुमुद्यतः ॥२४॥

तिताड़यिषया दृष्टो यथा मेषोऽपसर्पति ।
तद्वदब्रह्मचर्य्याय ब्रह्मचर्य्यमिदं तव ॥२५॥

विक्रीषन्ति यथा पण्यं वणिजो लाभलिप्सया ।
धर्म्मचर्य्या तव तथा पण्यभूता न शान्तये ॥२६॥

यथा फलविशेषार्थं बीजं वपति कर्षकः ।
तद्वद्विषयकार्पण्यात् विषयांस्त्यक्तवानसि ॥२७॥

आकाङ्क्षन्ति यथा रोगं प्रतीकारसुखेप्सया ।
दुःखमिच्छति भवान् तथा विषयतृष्णया ॥२८॥

यथा पश्यति मध्वेव[1] न प्रपातमवेक्षते ।
पश्यस्यपरसस्तद्वद् भ्रंशमन्ते न पश्यसि ॥२९॥

---

१ P. L. M. मध्वेव P. M. मध्वेव ।

यदि कामाग्निना दीप्ते कायेन वहतो व्रतम् ।
किमिदं ब्रह्मचर्य्यं ते मनसाऽब्रह्मचारिणः ॥ २० ॥
संसारे वर्त्तमानेन यदा चाप्सरसस्त्वया ।
प्राप्ताश्चक्राश्च शतशस्ताभ्यः किमिति ते स्पृहा ॥ २१ ॥
तृप्तिर्नास्तीन्धनैरग्नेर्नाम्भसा लवणाम्भसः ।
नापि कामेष्वतृप्तस्य तस्मात् कामा न तृप्तये ॥ २२ ॥
अतृप्तौ च कुतः शान्तिरशान्तौ च कुतः सुखम् ।
असुखे च कुतः प्रीतिरप्रीतौ च कुतो रतिः ॥ २३ ॥
रिरंसा यदि ते तस्मादध्यात्मे धीयतां मनः ।
प्रशान्ता चानवद्या च नास्त्यध्यात्मसमा रतिः ॥ २४ ॥
न तत्र कार्य्यं तूर्य्यैस्ते न स्त्रीभिर्न विभूषणैः ।
एकस्त्वं यत्र तत्रस्थस्तया रत्याभिरंस्यसे ॥ २५ ॥
मानसं बलवद्दुःखं तर्षं तिष्ठति तिष्ठति ।
तं तर्षं छिन्धि दुःखं हि तृष्णा नास्ति च नास्ति च ॥ २६ ॥
सम्पत्तौ वा विपत्तौ वा दिवा वा नक्तमेव वा ।
कामेषु हि मनुष्यस्य न शान्तिरुपपद्यते ॥ २७ ॥
कामानां प्रार्थना दुःखा प्राप्तौ तृप्तिर्न विद्यते ।
वियोगाच्चियतः शोको वियोगश्च ध्रुवो दिवि ॥ २८ ॥
कृत्वापि दुष्करं कर्म स्वर्गं लब्ध्वापि दुर्लभम् ।
मनुष्यलोकं पुनरेवैति प्रपातात् क्षतजं यथा ॥ २९ ॥
यथा भ्रष्टस्य कुशलं शिष्टं किञ्चिन्न विद्यते ।
तिर्य्यक्षु पितृलोके वा नरके वोपपद्यते ॥ ३० ॥

तस्य भुक्तवतः स्वर्गे विषयानुत्तमानपि ।
भ्रष्टस्यार्त्तस्य दुःखेन किमास्वादः करोति सः ॥४१॥

श्येनाय प्राणिवात्सल्यात् स्वमांसान्यपि दत्तवान् ।
शिविः स्वर्गात् परिभ्रष्टस्तादृक् कृत्वापि दुष्करम् ॥४२॥

शक्रस्यार्द्धासनं गत्वा पूर्व्वपार्थिव एव यः ।
स देवत्वं गतः काले मान्धाताधः पुनर्ययौ ॥४३॥

राज्यं कृत्वापि देवानां पपात नहुषो भुवि ।
प्रायः किल भुजङ्गत्वं नाद्यापि परिमुच्यते ॥४४॥

तथैव दिविड़ो राजा राजवृत्तेन संस्कृतः ।
स्वर्गं गत्वा पुनर्भ्रष्टः कूर्म्मीभूतः किलार्णवे ॥४५॥

भूरिद्युम्नो ययातिश्च एते चान्ये नृपर्षभाः ।
कर्म्मभिर्द्यामभिक्रीय तत्क्षयात्पुनरत्यजन् ॥४६॥

असुराः पूर्व्वदेवास्तु सुरैरपहृतश्रियः ।
श्रियं समनुशोचन्तः पातालं शरणं ययुः ॥४७॥

किञ्च राजर्षिभिस्तावत्सुरैर्वा सुरादिभिः ।
महेन्द्राः शतशः पेतुर्माहात्म्यमपि न स्थिरम् ॥४८॥

संसदं क्षोभयित्वेन्द्रीमुपेन्द्रश्चण्डविक्रमः ।
क्षीणकर्म्मा पपातोर्व्वीं मध्यादप्सरसां रसन् ॥४९॥

हा चैचरथ हा वापि हा मन्दाकिनि हा प्रिये ।
इत्यार्त्ता विलपन्तोपि गां पतन्ति दिवौकसः ॥५०॥

तीव्रं ह्युत्पद्यते दुःखं धीमतां[1] यन्मुमूर्षताम् ।

---

१ P. M. हिमतावत् T.

किं पुनः पततां स्वर्गाद्देवानन्दसुखसेविनाम् ॥५१॥

रजो गच्छति वासांसि स्रावयन्ति परमा[:]स्रजः ।
गात्रेभ्यो जायते स्वेदो रतिर्भवति नाग्नौ ॥५२॥
एतान्यादौ निमित्तानि च्युतौ स्वर्गाद्दिवौकसाम् ।
अनिष्टानीव मर्त्यानामरिष्टानि मुमूर्षताम् ॥५३॥
सुखमुत्पद्यते यच्च दिवि कामानुपाश्नताम् ।
त(थ)च्च दुःखं निपततां दुःखमेवावशिष्यते ॥५४॥

तस्मादखण्डमचाण(णा)मविश्रान्तमतर्पकम् ।
विज्ञाय क्षयिणं स्वर्गमपवर्गे मतिं कुरु ॥५५॥
अशरीरं भवाग्र्यं हि गत्वापि मुनिरुद्रकः ।
कर्मणोऽन्ते च्युतस्तस्मात् तिर्य्यग्योनिं प्रपद्यते ॥५६॥
मैत्रया सप्तवार्षिक्या ब्रह्मलोकमितो गतः ।
सुनेत्रः पुनरावृत्तो गर्भवासमुपेयिवान् ॥५७॥
यदा चैश्वर्य्यवन्तोपि क्षयिणः स्वर्गवासिनः ।
को नाम स्वर्गवासाय क्षिण्वते स्पृहयेद्बुधः ॥५८॥

सूत्रेण बद्धोहि यथा विहङ्गो व्यावर्त्तते दूरगतोपि भूयः ।
अज्ञानसूत्रेण तथावबद्धो गतोपि दूरं पुनरेति लोकः ॥५९॥
ज्ञात्वा[1] कालविलक्षणं प्रतिभुवा मुक्तो यथा बन्धनाद्
भुक्त्वा वेश्मसुखान्यतीत्य समयं भूयो विशेद् बन्धनम् ।
तद्वद् द्यां प्रतिभूवदात्मनियमे ध्यानादिभिः प्राप्तवान्
काले कर्मसु तेषु शुक्रविषयेष्वाक्रम्यते गां पुनः ॥६०॥

---

१ P. M. ज्ञात्वार्थं T.

अन्तर्जालगताः प्रमत्तमनसो मीनाखुडागे यथा
जानन्ति व्यसनं निरोधजनितं खस्थास्वरन्ध्यभ्रमि ।
अन्तर्लोकगताः कृतार्थमतयस्तद्वद्दिवि ध्यायिनो
मन्यन्ते शिवमच्युतं ध्रुवमिति खं स्थानमावर्त्तकम् ॥ ६१ ॥
तच्चन्मव्याधिमृत्युव्यसनपरिगतं मत्वा जगदिदं
संसारे भ्राम्यमाणं दिवि नृषु नरके तिर्य्यक्पिशाचेषु च ।
यत्राणं निर्भयं यत् शिवममरमजरं निःशोकमक्षतम्
तद्धेतोर्ब्रह्मचर्य्यं चर जहिहि चलं खर्गं प्रति रुचिम् ॥ ६२ ॥

इति सौन्दरनन्दे महाकाव्ये खर्गापवादो नाम
एकादशः सर्गः ॥

## द्वादशः सर्गः ।

अथारोभूतको धर्म्मश्चरसीत्यथ चोदितः ।
आनन्देन तदा नन्दः परं व्रीड़मुपागमत् ॥ १ ॥
तस्य व्रीड़ेन महता प्रमोदो हृदि नाभवत् ।
अप्रामोद्येन विमुखं नावतस्थे व्रते मनः ॥ २ ॥
कामरागप्रधानोऽपि परिहासक्षमोऽपि सन् ।
परिपाकगते हेतौ न स तन्मर्म्मृषे वचः ॥ ३ ॥
अपरीक्षकभावाच्च पूर्व्वं मत्वा दिवं ध्रुवम् ।
तस्मात् चिष्णुं परिभ्रुत्य भृशं संवेगमीयिवान् ॥ ४ ॥
तस्य स्वर्गात् निवर्त्तते संकल्पाश्वो मनोरथः ।
महारथ इवोन्मार्गादप्रमत्तस्य सारथेः ॥ ५ ॥
स्वर्गतर्षाग्निवृत्तस्य सद्यः स्वस्थ इवाभवत् ।
मृष्टादपथ्याद्विरतो जिजीविषुरिवातुरः ॥ ६ ॥
विमस्मार प्रियां भार्य्यामप्सरोदर्शनाद् यथा ।
तथा नित्यतयोद्विग्नस्तत्याजाप्सरसोऽपि सः ॥ ७ ॥
महतामपि भूतानामावृत्तिरिति चिन्तयन् ।
संवेगाच्च सरागोऽपि वीतराग इवाभवत् ॥ ८ ॥
बभूव सहि संवेगः श्रेयसस्तस्य वृद्धये ।
[1]धातोरधिरिवाख्याते पठितोऽक्षरचिन्तकैः ॥ ९ ॥

---

१ P, L, M. धातु ।

न तु कामात्मनस्तस्य केनचित् जगदे धृतिः ।
चिषु कालेषु सर्व्वेषु निपातोऽस्त्रिरिव स्थितः ॥ १० ॥
खेलगामी महाबाहु र्गजेन्द्र इव निर्म्मदः ।
सोभ्यगच्छद् गुरुं काले विवक्षुर्भावमात्मनः ॥ ११ ॥
प्रणम्य च गुरौ मूर्ध्ना बाष्पव्याकुललोचनः ।
कृत्वाञ्जलिमुवाचेदं क्रिया किञ्चिदवाङ्मुखः ॥ १२ ॥
अपारःप्राप्तये यत्ने भगवन् प्रतिभूरसि ।
नापरोभि ममार्थोऽस्ति प्रतिभूत्वं त्यजाम्यहम् ॥ १३ ॥
श्रुत्वा ह्यावर्त्तकं स्वर्गं संसारस्य च चिन्तताम् ।
न मर्त्येषु न देवेषु प्रवृत्तिर्म्मम रोचते ॥ १४ ॥
यदि प्राप्य दिवं यत्नान्नियमेन दमेन च ।
अविघ्नाः पतन्त्यस्मे स्वर्गाय त्यागिने नमः ॥ १५ ॥
अतश्च निखिलं लोकं विदित्वा सचराचरम् ।
सर्व्वदुःखक्षयकरे त्वद्धर्म्मे परमे रमे ॥ १६ ॥
तस्माद् व्यासमसासाभ्यां तन्मे व्याख्यातुमर्हसि ।
यच्छ्रुत्वा शृण्वतां श्रेष्ठ परमं प्राप्नुयां पदम् ॥ १७ ॥
ततस्तस्याशयं ज्ञात्वा विपक्षाणीन्द्रियाणि च ।
श्रेयश्चैवामुखीभूतं निजगाद तथागतः ॥ १८ ॥
अहो प्रत्यवमर्शोऽयं श्रेयस्ते पुरोजवः ।
अरण्यां मथ्यमानायामग्नेर्धूम इवोत्थितः ॥ १९ ॥
चिरमुन्मार्गविहतो लोलैरिन्द्रियवाजिभिः ।
अवतीर्णोऽसि पन्थानं दिष्ट्या दृष्ट्याऽविमूढया ॥ २० ॥

अद्य ते सफलं जन्म लाभोऽद्य सुमहांस्तव ।
यस्य कामरसज्ञस्य नैष्कर्म्म्यायोत्सुकं मनः ॥ २१ ॥
लोकेऽस्मिन्नालयारामे निवृत्तौ दुर्लभा रतिः ।
व्यथन्ते ह्यपुनर्भावात् प्रपातादिव बालिशाः ॥ २२ ॥
दुःखं न स्यात् सुखं मे स्यादिति प्रयतते जनः ।
अत्यन्तदुःखोपरमं सुखं तच्च न बुध्यते ॥ २३ ॥
अरिभूतेष्वनित्येषु सततं दुःखहेतुषु ।
कामादिषु जगत् सक्तं न वेत्ति सुखमव्ययम् ॥ २४ ॥
सर्व्वदुःखापहं तत्तु हस्तस्थममृतं तव ।
विषं पीत्वा यदगदं समये पातुमिच्छसि ॥ २५ ॥
अनर्हसंसारभयं मानार्हं ते चिकीर्षितम् ।
रागाग्निस्नादृशो यस्य धर्म्मोन्मुखपराङ्मुखः ॥ २६ ॥
रागोद्दामेन मनसा सर्व्वथा द्रष्टुराधृतिः ।
सदोषं सलिलं दृष्ट्वा पथिकेन पिपासुना ॥ २७ ॥
ईदृग्गी नाम बुद्धिस्ते निरुद्धा रजसाऽभवत् ।
रजसा चण्डवातेन विवस्वत इव प्रभा ॥ २८ ॥
सा जिघांसुस्तमो हार्द्दं या संप्रति विजृम्भते ।
तमो नैशं प्रभा सौरी विनिर्गीर्णेव भेदणा ॥ २९ ॥
युक्तरूपमिदञ्चैव मुद्धसत्वस्य चेतसः ।
यत्ते स्यात्सैष्टिके सूक्ष्मे श्रेयसि श्रद्दधानता ॥ ३० ॥
धर्म्मच्छन्दमिमं तस्माद् विवर्द्धयितुमर्हसि ।
सर्व्वधर्म्मा हि धर्म्मज्ञ नियमाच्छन्दहेतवः ॥ ३१ ॥

सत्यां गमनबुद्धौ हि गमनाय प्रवर्त्तते ।
प्रयाबुद्धौ च प्रयनं स्थानबुद्धौ तथा स्थितिः ॥ २२ ॥
अन्तर्भूमिगतं क्षम्भः श्रद्दधाति नरो यदा ।
अर्थिते सति यत्नेन तदा खनति गामिमाम् ॥ २३ ॥
नार्थी यद्यग्निना वा स्यात् श्रद्दध्यात्तु न वारणौ ।
मथ्नीयात्सारणिं कश्चित् तद्भावे सति मथ्यते ॥ २४ ॥
सस्योत्पत्तिं यदि न वा श्रद्दध्यात् कर्षकः क्षितौ ।
अर्थी सस्येन वा न स्याद् बीजानि न वपेद्भुवि ॥ २५ ॥
अतस्त्व हस्त इत्युक्ता मया श्रद्धाविशेषतः ।
यस्माद् गृह्णाति सद्धर्मं दायं हस्त इवाचतः ॥ २६ ॥
प्राधान्यादिन्द्रियमिति स्थिरत्वाद् बलमित्यतः ।
गुणदारिद्र्यगमनाद् धनमित्यभिवर्णिता ॥ २७ ॥
रक्षणार्थेन धर्मस्य तथेषीकेत्युदाहृता ।
लोकेऽस्मिन् दुर्लभत्वाच्च रत्नमित्यभिभाषिता ॥ २८ ॥
पुनस्त्व बीजमित्युक्ता निमित्तं श्रेयसो यदा ।
पावनार्थेन पापस्य नदीत्यभिहिता पुनः ॥ २९ ॥
यस्माद्धर्मस्य चोत्पत्तौ श्रद्धा कारणमुत्तमम् ।
मयोक्ता कार्यतस्तस्मात् तच्च तच्च तथा तथा ॥ ४० ॥
श्रद्धाङ्कुरमिमं तस्मात् संवर्द्धयितुमर्हसि ।
तद्वृद्धौ वर्द्धते धर्मो मूलवृद्धौ यथा द्रुमः ॥ ४१ ॥

---

१ P. M. •चीके• ।

व्याकुलं दर्शनं यस्य दुर्मनस्को यस्य निश्चयः ।
तस्य पारिप्लवा श्रद्धा न हि कृत्याय वर्त्तते ॥ ४२ ॥

यावत्तत्त्वं न भवति हि दृष्टं श्रुतं वा
तावच्छ्रद्धा न भवति वलवती स्थिरा वा ।
दृष्टे तत्त्वे नियमपरिभूतेन्द्रियस्य
श्रद्धावृद्धो भवति सफलस्याश्रयस्य ॥

इति सौन्दरनन्दे महाकाव्ये प्रत्यवमर्शो नाम
द्वादशः सर्गः ।

## चयोदशः सर्गः ।

अथ संराधितो नन्दः श्रद्धां प्रति महर्षिणा ।
परिषिक्तोऽमृतेनेव युयुजे परया मुदा ॥ १ ॥
कृतार्थमिव तम् मेने संबुद्धः श्रद्धया तया ।
मेने प्राप्तमिव श्रेयः स च बुद्धेन संस्कृतः ॥ २ ॥
श्लक्ष्णेन वचसा कांश्चित् कांश्चित् परुषया गिरा ।
कांश्चिदाभ्यामुपायाभ्याम् स विनिन्ये विनायकः ॥ ३ ॥
पांशुभ्यः काञ्चनं जातं विशुद्धं निर्मलं शुचि ।
स्थितं पांशुष्वपि यथा पांशुदोषैर्न लिप्यते ॥ ४ ॥
पद्मपर्णं यथा चैव जले जातं जले स्थितम् ।
उपरिष्टादधस्ताद् वा न जलेनोपलिप्यते ॥ ५ ॥
तद्वल्लोके मुनिर्जातो लोकस्यानुग्रहं चरन् ।
कृतित्वान्निर्मलत्वाच्च लोकधर्मैर्न लिप्यते ॥ ६ ॥
स्नेहं त्यागं प्रियं रुक्षं कथाश्च ध्यानमेव च ।
मन्त्रकाले चिकित्सार्थं चक्रे नात्मानुवृत्तये ॥ ७ ॥
अतश्च सन्दधे कार्यं महाकरुणया तया ।
मोचयेयं कथं दुःखात् सत्वानीत्यनुकम्पकः ॥ ८ ॥
अथ संहर्षणाच्चन्दं विदित्वा भाजनीकृतम् ।
अब्रवीद् ब्रुवतां श्रेष्ठः क्रमज्ञः श्रेयसां क्रमम् ॥ ९ ॥
अतः प्रभृति भृत्यस्त्वम् श्रद्धेन्द्रियपुरःसरः ।
अमृतस्याप्तये सौम्य वृत्तं रक्षितुमर्हसि ॥ १० ॥

प्रयोगः कायवचसोः शुद्धो भवति ते यथा ।
उत्तानो विवृतो गुप्तोऽनवच्छिद्रस्तथा कुरु ॥ ११ ॥
उत्तानो भावकरणात् विवृतस्त्याज्यगूहनात् ।
गुप्तो रक्षणतात्पर्यादच्छिद्रस्त्वानवद्यतः ॥ १२ ॥
शरीरवचसोः शुद्धौ सन्नाङ्गे चापि कर्म्मणि ।
आजीवसमुदाचारं शौचात् संस्कर्तुमर्हसि ॥ १३ ॥
दोषाणां कुहनादीनां पञ्चानामनिषेवणात् ।
त्यागाच्च ज्योतिषादीनां चतुर्णां वृत्तिघातिनाम् ॥ १४ ॥
प्राणिधान्यधनादीनां वर्ज्यानामप्रतिग्रहात् ।
भैक्ष्याङ्गानां निसृष्टानां नियतानां प्रतिग्रहात् ॥ १५ ॥
परितुष्टः शुचिर्मञ्जुश्चौचया जीवसम्पदा ।
कुर्य्याद्दुःखप्रतीकारं यावदेव विमुक्तये ॥ १६ ॥

कर्म्मणो हि यथा दुष्टात् कायवाक्प्रभवादपि ।
आजीवः पृथगेवोक्तो दुःशोधत्वादयं मया ॥ १७ ॥
गृहस्थेन हि दुःशोधा दृष्टि र्विविधदृष्टिना ।
आजीवो भिक्षुणा चैव परेहायत्तवृत्तिना ॥ १८ ॥

एतावच्छीलमित्युक्तमाचारोयं समासतः ।
अस्य नाशेन नैव स्यात् प्रव्रज्या न इह स्थिता ॥ १९ ॥
तस्माच्चारित्रसम्पन्नो ब्रह्मचर्य्यमिदं चर ।
अणुमात्रेष्ववद्येषु भयदर्शी दृढव्रतः ॥ २० ॥

शीलमास्थाय वर्त्तन्ते सर्व्वा हि श्रेयसि क्रियाः
स्थानाद्यानीव कार्य्याणि प्रतिष्ठाय वसुन्धराम् ॥ २१ ॥

मोक्षस्योपनिषत् सौम्य वैराग्यमिति गृह्यताम् ।
वैराग्यस्यापि संवेगः संविदो ज्ञानदर्शनम् ॥ २२॥
ज्ञानस्योपनिषच्चैव समाधिरुपधार्य्यताम् ।
समाधेरप्युपनिषत् सुखं शारीरमानसम् ॥ २३॥
प्रस्रब्धिः कायमनसः सुखस्योपनिषत्परा ।
प्रस्रब्धेरप्युपनिषत् प्रीतिरप्यवगम्यताम् ॥ २४॥
तथा प्रीतेरुपनिषत् प्रामोद्यं परमं मतम् ।
प्रामोद्यस्याप्यहर्लेखः कुरुतेष्वहतेषु वा ॥ २५॥
अविलेखस्य मनसः शीलन्तूपनिषच्छुचि ।
अतः शीलं नयत्यग्र्यमिति शीलं विशोधय ॥ २६॥
शीलनात् शीलमित्युक्तं शीलनात् सेवनादपि ।
सेवनात्तन्निदेशाच्च निर्देशस्य तदाश्रयात् ॥ २७॥
शीलं हि शरणं सौम्य कान्तार इव दैशिकः ।
मित्रं बन्धुश्च रत्नं च धनञ्च बलमेव च ॥ २८॥
यतः शीलमतः सौम्य शीलं संरक्तुमर्हसि ।
एतत् स्थानमथाग्र्यं च मोक्षारम्भेषु योगिनाम् ॥ २९॥
ततः स्मृतिमधिष्ठाय चपलानि स्वभावतः ।
इन्द्रियाणीन्द्रियार्थेभ्यो निवारयितुमर्हसि ॥ ३०॥
भेतव्यं न तथा शत्रो र्नाखे र्नाहेर्नचाग्नेः ।
इन्द्रियेभ्यो यथा क्षेभ्यस्तैरजस्रं हि हन्यते ॥ ३१॥
द्विषद्भिः शत्रुभिः कश्चित् कदाचित् पीड्यते न वा ।
इन्द्रियैर्बाध्यते सर्व्वः सर्व्वत्र च सदैव च ॥ ३२॥

न च प्रयाति नरकं मनुष्यप्रकृतिर्हतः ।
क्षयते तत्र निघ्नस्तु चपलैरिन्द्रियैर्हतः ॥ २३ ॥
हन्यमानस्य तैर्दुःखं क्वचिद्भवति वा न वा ।
इन्द्रियैर्बाध्यमानस्य क्वचिद्दारीरमेव च ॥ २४ ॥
सङ्कल्पविषदिग्धा हि पञ्चेन्द्रियमया[:] शराः ।
चिन्तापुङ्खा रतिफला विषयाकाशगोचराः ॥ २५ ॥
मनुष्यहरिणान् घ्नन्ति कामव्याधेरिता हृदि ।
विहन्यन्ते यदि न ते ततः पतन्ति तैः क्षत[ाः] ॥ २६ ॥
नियमाजिरसंस्थेन धैर्य्यकार्मुकधारिणा ।
निपतन्तो निवार्य्यास्ते महता स्मृतिवर्म्मणा ॥ २७ ॥
इन्द्रियाणामुपशमादरीणां निग्रहादिव ।
सुखं स्वपिति वास्ते वा यत्र तत्र गतोद्भवः ॥ २८ ॥
तेषां हि सततं लोके विषयानभिकाङ्क्षताम् ।
संविग्नेवास्ति कार्पण्याच्छुनामाशावतामिव ॥ २९ ॥
विषयैरिन्द्रियग्रामो न हृप्तिमधिगच्छति ।
अजस्रं पूर्य्यमाणोऽपि समुद्रः सलिलैरिव ॥ ४० ॥
अवश्यं गोचरे[:] खै[:] खैर्वर्त्तितव्यमिहेन्द्रियैः ।
निमित्तं तत्र न ग्राह्यमनुव्यञ्जनमेव च ॥ ४१ ॥
आलोक्य चक्षुषा रूपं धातुमात्रे व्यवस्थितः ।
स्त्री वेति पुरुषो वेति न कल्पयितुमर्हसि ॥ ४२ ॥
स चेत् स्त्रीपुरुषग्राहः क्वचिद् विद्येत कश्चन ।
शुभतः केशदन्तादीन् नानुप्रस्थातुमर्हसि ॥ ४३ ॥

नापनेयं ततः किञ्चित् प्रक्षेप्यं नापि किञ्चन ।
द्रष्टव्यं भूततो भूतं यादृग्यच्च यथा च यत् ॥ ४४ ॥
एवं ते पश्यतस्तत्त्वं यथादिन्द्रियगोचरे ।
भविष्यति पदस्थानं नाभिध्यादौर्मनस्ययोः ॥ ४५ ॥
अभिध्या प्रियरूपेण हन्ति कामात्मकं जगत् ।
अरिर्मित्रमुखेनेव प्रियवाक् कलुषाशयः ॥ ४६ ॥
दौर्मनस्याभिधानस्तु प्रतिघो विषयाश्रितः ।
मोहाद् येनानुवृत्तेन परत्रेह च हन्यते ॥ ४७ ॥
अनुरोधविरोधाभ्यां शीतोष्णाभ्यामिवार्दितः ।
शर्म नाप्नोति न श्रेयस्यलेन्द्रियमतो जगत् ॥ ४८ ॥
नेन्द्रियं विषये तावत् प्रवृत्तमपि सज्जते ।
यावन्न मनसस्तत्र परिकल्पः प्रवर्त्तते ॥ ४९ ॥
दह्यते सति वायौ च यथा ज्वलति पावकः ।
विषयात् परिकल्पाच्च क्लेशाग्निर्जायते तथा ॥ ५० ॥
अभूतपरिकल्पेन विषयस्य हि बध्यते ।
तमेव विषयं पश्यन् भूततः परिमुच्यते ॥ ५१ ॥
दृष्ट्वैकं रूपमन्यो हि रज्यतेऽन्यः प्रहृष्यति ।
कश्चिद् भवति मध्यस्तत्रैवान्यो घृणायते ॥ ५२ ॥
अतो न वि[ष]यो हेतु र्बन्धाय न विमुक्तये ।
परिकल्पविशेषेण सङ्गो[१] भवति वा न वा ॥ ५३ ॥

---

१ P. M. संयोग T.

कार्य्यः परमयत्नेन तस्मादिन्द्रियसंवरः।
इन्द्रियाणि ह्यगुप्तानि दुःखाय च भवाय च ॥ ५४ ॥
कामभोगभोगवद्भिरात्मदृष्टिदृष्टिभिः
प्रमादनैकमूर्द्धभिः प्रहर्षखोलजिह्मकैः।
इन्द्रियोरगै र्मनोविलम्बयैः स्पृहाविषैः
शमागदादृते न [द]ष्टमस्ति यच्चिकित्सयेत्[1] ॥ ५५ ॥
तस्मादेषामकुशलकराणामरीणाम्
चक्षुर्घ्राणश्रवणरसनस्पर्शनानाम्।
सर्व्वावस्थं भवति नियमाद्प्रमत्तो
मास्मिन्नर्थे क्षणमपि कृथास्त्वं प्रमादम् ॥ ५६ ॥

सौन्दरनन्दे महाकाव्ये श्रीलेन्द्रियजयो नाम
चतुर्दशः सर्गः।

---

१ P. M. शमागदात्तदृते नष्टमस्ति यच्चिकित्सेत् T.

## चतुर्दशः सर्गः ।

अथ स्मृतिकपाटेन पिधायेन्द्रियसंवरम् ।
भोजने भव म[ा]त्र[ा]ज्ञो ध्यानायानामयाय च ॥१॥
प्राणापानौ निरुणद्धि ग्लानिनिद्रे प्रयच्छति ।
कृतो ह्यत्यर्थमाहारो विहन्ति च पराक्रमम् ॥२॥
यथा चात्यर्थमाहा[र]: कृतोऽनर्थाय कल्पते ।
उपयुक्तस्तथात्यल्पो न सामर्थ्याय कल्पते ॥३॥
आशयं द्युतिमुत्साहं प्रयोगं बलमेव च ।
भोजनं कृतमत्यल्पं शरीरस्यापकर्षति ॥४॥
यथा भारेण नमते लघुनोन्नमते तुला ।
समा तिष्ठति युक्तेन भोज्येनेयं तथा तनुः ॥५॥
तस्मादभ्यवहर्त्तव्यं स्वशक्तिमनुपश्यता ।
नातिमात्रं न चात्यल्पं मेयं मानवशादपि ॥६॥
अभ्याक्रान्तो हि कायाग्नि र्गुरुणान्नेन शाम्यति ।
अवच्छन्न इवाल्पोऽग्निः सहसा महतेन्धसा ॥७॥
अत्यन्नमपि संहारो नाहारस्य प्रशस्यते ।
अनाहारो हि निर्व्वाति निरिन्धन इवानलः ॥८॥
यस्मान्नास्ति विनाहारात् सर्व्वप्राणभृतां स्थितिः ।
तस्माद्भुज्यति नाहारो विकल्पोऽत्र तु वार्य्यते ॥९॥
न ह्येकविषयेऽन्यत्र सज्यन्ते प्राणिनस्तथा ।
अविज्ञाते यथाहारे बोद्धव्यं तत्र कारणम् ॥१०॥

चिकित्सार्थं यथा धत्ते व्रणस्यालेपनं व्रणी ।
क्षुद्विघातार्थमाहारमुदत् सेव्यो मुमुक्षुणा ॥ ११ ॥
भारस्योद्वहनार्थञ्च रथाक्षोऽभ्युक्ष्यते यथा ।
भोजनं प्राणयात्रार्थं तद्वद्विद्वान्निषेवते ॥ १२ ॥
समभिक्रमणार्थञ्च कान्तारस्य यथाध्वगौ ।
पुत्रमांसानि खादेतां दम्पती भृशदुःखितौ ॥ १३ ॥
एवमभ्यवहर्त्तव्यं भोजनं प्रतिसंख्यया ।
न भूषार्थं न वपुषे न मदाय न दृप्तये ॥ १४ ॥
धारणार्थं शरीरस्य भोजनं हि विधीयते ।
उपस्तम्भः पिपतिषो र्दुर्ब्बलस्येव वेश्मनः ॥ १५ ॥
शवं यत्नात् यथा कश्चिद् बध्नीयाद् धारयेदपि ।
न तत्स्नेहेन यावत्तु महौघस्योत्तितीर्षया ॥ १६ ॥
तथोपकरणैः कायं धारयन्ति परीक्षकाः ।
न तत्स्नेहेन यावत्तु दुःखौघस्य तितीर्षया ॥ १७ ॥
शोचता पीड्यमानेन दीयते शरवे यथा ।
न भक्त्या नापि तर्षेण केवलं प्राणगृध्नये ॥ १८ ॥
योगाचारस्तथाहारं शरीराय प्रयच्छति ।
केवलं क्षुद्विघातार्थं न रागेण न भक्तये ॥ १९ ॥
मनोधारणया चैव परिणाम्यात्मवानरः ।
विधूय निद्रां योगेन निष्कामप्यतिनामयेत् ॥ २० ॥
यदि यत् संज्ञिनश्चैव निद्रा प्रादुर्भवेत्तव ।
गुणवत्संज्ञितां संज्ञां तदा मनसि मा कृथाः ॥ २१ ॥

धातुरारम्भधृत्योश्च स्थामविक्रमयोरपि ।
नित्यं मनसि कार्य्यस्ते बाध्यमानेन निद्रया ॥२१॥
आम्नातव्याश्च विग्रहं ते धर्म्मा ये परिश्रुताः ।
परेभ्यश्चोपदेष्टव्याः सच्छिष्याः स्वयमेव च ॥२२॥
प्रक्षेप्तव्यमङ्गिर्वदनं विलोक्याः सर्व्वतो दिशः ।
चार्य्या दृष्टिश्च तारासु जिज्ञागरिषुणा सदा ॥२४॥
अन्तर्गतैरचपलै र्वशस्थायिभिरिन्द्रियैः ।
अविच्छिन्नेन मनसा चंक्रम्यस्वास्व वा निशि ॥२५॥
भये प्रीतौ च शोके च निद्रया नाभिभूयते ।
तस्मान्निद्राभियोगेषु सेवितव्यमिदं त्रयम् ॥२६॥
भयमागमनान्मृत्योः प्रीतिं धर्म्मपरिग्रहात् ।
जन्मदुःखादपर्य्यन्तात् शोकमागन्तुमर्हसि ॥२७॥
एवमादिः क्रमः सौम्य कार्य्यो जागरणं प्रति ।
बन्ध्यं हि शयनादायुः कः प्राज्ञः कर्त्तुमर्हति ॥२८॥
दोषव्यालानतिक्रम्य व्यालान् गृहगतानिव ।
क्षमं प्राज्ञस्य न स्वप्तुं निस्तितीर्षोर्भवद्भयम् ॥२९॥
प्रदीप्ते जीवलोके हि मृत्युव्याधिजराग्निभिः ।
कः शयीत निरुद्वेगः प्रदीप्त इव वेश्मनि ॥३०॥
तस्मात् तम इति ज्ञात्वा निद्रां नावेष्टुमर्हसि ।
अप्रशान्तेषु दोषेषु सशस्त्रेष्विव शत्रुषु ॥३१॥
पूर्व्वयामं क्षियामायाः प्रयोगेनातिनाम्यतु ।
सेव्या शय्या शरीरस्य विश्रामार्थमतन्द्रिणा ॥३२॥

दक्षिणेन तु पार्श्वेन स्थितया लोकसंज्ञया ।
प्रबोधं हृदयं कृत्वा प्रयोध्याः भ्रान्तिमानसः ॥ ३ ३॥
यामे तृतीये चोत्थाय चरन्नासीन एव वा ।
भूयो योगं मनःशुद्धौ कुर्वीथा नियतेन्द्रियः ॥ ३ ४॥
अथासनगत[ा]स्था न प्रेक्षितव्या कृतादिषु ।
सम्प्रजानन् क्रियाः सर्व्वाः स्मृतिमाधातुमर्हसि ॥ ३ ५॥
द्वाराध्यक्ष इव द्वारि यस्य प्रणिहिता स्मृतिः ।
धर्षयन्ति न तं दोषाः पुरं गुप्तमिवारयः ॥ ३ ६॥
न तस्योत्पद्यते क्लेशो यस्य कायगता स्मृतिः ।
चित्तं सर्व्वास्ववस्थासु बालं धात्रीव रक्षति ॥ ३ ७॥
प्रख्यः स तु दोषाणां यो हीनः स्मृतिवर्म्मणा ।
रणस्थः प्रतिग्रहणां विहीन इव वर्म्मणा ॥ ३ ८॥
अनाथं तन्मनो ज्ञेयं यत् स्मृतिर्नाभिरक्षति ।
निर्णेता दृष्टिरहितो विषयेषु चरन्निव ॥ ३ ९॥
अनर्थेषु प्रसक्तास्य स्वार्थेभ्यश्च पराङ्मुखाः ।
यङ्गये सति नोद्विग्नाः स्मृतिनाशोऽत्र कारणम् ॥ ४ ०॥
स्वभूमिषु गुणाः सर्व्वे ये च शीलादयः स्थिताः ।
विकीर्णा इव गा गोपः स्मृतिस्ताननुगच्छति ॥ ४ १॥
प्रनष्टममृतम् तस्य यस्य विप्रसृता स्मृतिः ।
हस्तस्थममृतं तस्य यस्य कायगता स्मृतिः ॥ ४ २॥
आर्य्यो न्यायः कुतस्तस्य स्मृतिर्यस्य न विद्यते ।
यस्यार्य्यो नास्ति च न्यायः प्रनष्टस्तस्य सत्पथः ॥ ४ ३॥

प्रनष्टो यस्य सन्मार्गो नष्टं तस्यामृतं पदम् ।
प्रनष्टममृतम् यस्य स दुःखान्न विमुच्यते ॥४४॥
तस्माच्चरन् चरोऽस्मीति स्थितोऽस्मीति च तिष्ठतः ।
एवमादिषु कालेषु स्मृतिमाधातुमर्हसि ॥४५॥

योगानुलोमं विजनं[१] विशब्दं
प्रय्यासनं सौम्य तथा भजस्व ।
कायस्य ज्ञात्वा हि विवेकमादौ
सुखोऽधिगन्तुं मनसो विवेकः ॥४६॥
अलब्धचेतःप्रशमः सरागो
यो न प्रचारं भजते विविक्तम् ।
स क्षिप्यते ह्यप्रतिलब्धमार्गः
चरन्निवोर्व्यां बडिशकण्टकायाम् ॥४७॥
अदृष्टतत्त्वेन परीक्षकेण
स्थितेन चित्ते विषयप्रचारे ।
चित्तं निषेद्धुं न सुखेन शक्यं
क्षुद्रोदका गौरिव सस्यमध्यात् ॥४८॥
अनीर्ष्यमाणस्तु यथानिलेन
प्रशान्तिमागच्छति चित्रभानुः ।
अल्पेन यत्नेन तथा विविक्ते-
ष्वघट्टितं शान्तिमुपैति चेतः ॥४९॥

---

१ P. M. विजलं

क्वचिद्भुक्ता यत्तद्वसनमपि यत्तत्परिहितो
वसन्नात्मारामः क्वचन विजने योऽभिरमते ।
कृतार्थः स ज्ञेयः शमसुखरसज्ञः कृतमतिः
परेभ्यः संसर्गं परिहरति यः कण्टकमिव ॥५०॥
यदि द्वन्द्वारामे जगति विषयव्यग्रहृदये
विविक्ते निर्द्वन्द्वो विहरति कृती शान्तहृदयः ।
ततः पीत्वा ब्रह्मारसमसृतवत् तृप्तहृदयो
विविक्तः संसक्तं विषयकृपणं शोचति जगत् ॥५१॥
वसन् शून्यागारे यदि सततमेकोऽभिरमते
यदि क्लेशोत्पादैः सह न रमते मनुजैरिव ।
चरन्नात्मारामो यदि च पिबति प्रीतिसलिलं
ततो भुङ्क्ते श्रेष्ठं चिदमृतपतिराज्यादपि सुखम् ॥५२॥

सौन्दरनन्दे महाकाव्ये आदिप्रस्थानो नाम
चतुर्दशः सर्गः ।

## पञ्चदशः सर्गः

यत्र तत्र विविक्ते तु[1] बद्ध्वा पर्य्यङ्कमुत्तमम् ।
ऋजुं कायं समाधाय स्मृत्याभिमुखयान्वितः ॥ १ ॥
नासाग्रे वा ललाटे वा भ्रुवोरन्तर एव वा ।
कुर्व्वीथाश्चपलं चित्तमालम्बनपरायणम् ॥ २ ॥
स चेत् कामवितर्कस्त्वां धर्षयेन्मानसो ज्वरः ।
चेन्नस्यो नाधिवास्यः स वस्त्रे रेणुरिवागतः ॥ ३ ॥
यद्यपि प्रतिसंख्यानात् कामानुत्सृष्टवानसि ।
तमांसीव प्रकाशेन प्रतिपक्षेण तान् जहि ॥ ४ ॥
तिष्ठत्यनुशयस्त्वेषां क्लमोऽग्निरिव भस्मना ।
स ते भावनया सौम्य प्रशाम्योऽग्निरिवाम्बुना ॥ ५ ॥
ते हि तस्मात् प्रवर्त्तन्ते भूयो बीजादिवाङ्कुराः ।
तस्य नाशेन ते न स्युः बीजनाशादिवाङ्कुराः ॥ ६ ॥
अर्ज्जनादीनि कामेभ्यो दृष्ट्वा दुःखानि कामिनाम् ।
तस्मात् तान् मुञ्चतश्छिन्धि मित्रसंज्ञानरीनिव ॥ ७ ॥
अनित्या मोघधर्म्माणो रिक्ता व्यसनहेतवः ।
बहुसाधारणाः कामाः वर्ज्या ह्याशीविषा इव ॥ ८ ॥
ये मृग्यमाणा दुःखाय रक्ष्यमाणा न शान्तये ।
भग्नाः शोकाय महते प्राप्ताश्च न विदृप्तये ॥ ९ ॥
दृष्ट्वा वित्तप्रकर्षेण स्वर्गावाप्त्या कृतार्थताम् ।
कामेभ्यश्च सुखोत्पत्तिं यः पश्यति स नश्यति ॥ १० ॥

---

१ P. M. च ।

चलानपरिनिष्पन्नानसारानवस्थितान् ।
परिकल्पसुखान् कामान् न तान् स्मर्त्तुमिहार्हसि ॥ ११ ॥
व्यापादो वा विहिंसा वा चोभयेद् यदि ते मनः ।
प्रमाद्यं तद् विपक्षेण मणिनेवाकुलं जलम् ॥ १२ ॥
प्रतिपक्षस्तयोर्ज्ञेयो मैत्री कारुण्यमेव च ।
विरोधो हि तयोर्नित्यं प्रकाशतममोरिव ॥ १३ ॥
निवृत्तं यस्य दौःशील्यं व्यापादस्य प्रवर्त्तते ।
हन्ति पांशुभिरात्मानं सुस्नात इव वारणः ॥ १४ ॥
दुःखितेभ्यो हि मर्त्तेभ्यो व्याधिमृत्युजरादिभिः ।
आर्य्यः को दुःखमपरं सृष्टणो धातुमर्हति ॥ १५ ॥
दृष्टेन चेह मनसा बाध्यते वा परो न वा ।
मद्यस्तु दह्यते तावत् खमनो दुष्टचेतसः ॥ १६ ॥
तस्मात् सर्व्वेषु भूतेषु मैत्री कारुण्यमेव च ।
न व्यापादं विहिंसां वा विकल्पयितुमर्हसि ॥ १७ ॥
यद्यदेव प्रसक्तं हि वितर्कयति[1] मानवः ।
अभ्यासात् तेन तेनास्य [2]रतिर्भवति चेतसः ॥ १८ ॥
तस्मादकुशलं त्यक्त्वा कुशलं ध्यातुमर्हसि ।
यत्ने स्यादिह चार्थाय परमार्थस्य चाप्तये ॥ १९ ॥
संवर्धन्ते ह्यकुशला वितर्काः सम्भृता हृदि ।
अनर्थजनकास्तुल्यमात्मनश्च परस्य च ॥ २० ॥

---

१ P. M. विवर्ज्जयति । २ P. M. नति॰ T.

श्रेयसो विघ्नकरणात् भवन्त्यात्मविपत्तये ।
पात्रीभावोपघातं तु परभक्तिविपत्तये ॥२१॥
मनः कर्म्मसु विक्षेप्यमपि वा वस्तुमर्हसि[1] ।
[2]नत्वेवाकुशलं सौम्य वितर्कयितुमर्हसि ॥२२॥
या चिकामोपभोगाय चिन्ता म[न]सि वर्त्तते ।
न च तं गुणमाप्नोति बन्धनाय च कल्पते ॥२३॥
सत्त्वानामुपघाताय परिक्लेशाय वा मनः ।
मोहं व्रजति कार्त्स्न्यं नरकाय च वर्त्तते ॥२४॥
तद्वितर्कैरकुशलैर्नात्मानं हन्तुमर्हसि ।
सुशस्त्रं रत्नविकृतं मृदतीर्गाः खनन्निव ॥२५॥
अनभिज्ञो यथा जात्यं दहेदगुरुकाष्ठवत् ।
अन्यायेन मनुष्यत्वमुपहन्यादिदं तथा ॥२६॥
त्यक्त्वा रत्नं यथा लोष्टं रत्नद्वीपाच्च संहरेत् ।
त्यक्त्वा नैःश्रेयसं धर्म्मं चिन्तयेदशुभं तथा ॥२७॥
हिमवन्तं यथा गत्वा विषं भुञ्जीत नौषधम् ।
मनुष्यत्वं तथा प्राप्य पापं सेवेत नो शुभम् ॥२८॥
तद्बुद्ध्या प्रतिपक्षेण वितर्कं चेतुमर्हसि ।
सूक्ष्मेण प्रतिकीलेन कीलं दार्व्यन्तरादिव ॥२९॥
वृद्धवृद्धोरथ भवेच्चिन्ता ज्ञातिजनं प्रति ।
स्वभावो जीवलोकस्य परोक्ष्यस्तन्निवृत्तये ॥३०॥

---

१ P. M. वाग्वस्तुमर्हसि T. २ P. M. नत्वेक॰ T.

संसारे क्रूयमाणानां सत्वानां स्वेन कर्म्मणा ।
को जनः सुजनः को वा मोहात्सक्तो जने जनः ॥२१॥
अतीतेऽध्वनि संवृत्तः स्वजनो हि जनस्तव ।
अप्राप्ते चाध्वनि जनः स्वजनस्ते भविष्यति ॥२२॥
विहगानां यथा सायं तत्र तत्र समागमः ।
जातौ जातौ तथाश्लेषो जनस्य स्वजनस्य च ॥२३॥
प्रतिश्रयं बहुविधं संश्रयन्ति यथाध्वगाः ।
प्रतियान्ति पुनस्त्यक्त्वा तद्वत् ज्ञातिसमागमः ॥२४॥
लोके प्रकृतिभिन्नेऽस्मिन् न कश्चित् कस्यचित् प्रियः ।
कार्य्यकारणसंबद्धं वालुकासुष्टिवज्जगत् ॥२५॥
विभर्त्ति हि सुतं माता धारयिष्यति मामिति ।
मातरं भजते पुत्रो गर्भेणाधत्त मामिति ॥२६॥
अनुकूलं प्रवर्त्तन्ते ज्ञातिषु ज्ञातयो यदा ।
तदा स्नेहं प्रकुर्व्वन्ति रिपुत्वं तु विपर्य्ययात् ॥२७॥
अहितो दृश्यते ज्ञातिरज्ञातिर्दृश्यते हितः ।
स्नेहं कार्य्यान्तरालोकश्छिनत्ति च करोति च ॥२८॥
स्वयमेव यथालिख्य रचेच्चित्रकरः स्त्रियम् ।
तथा कृत्वा स्वयं स्नेहं भङ्गमेति जने जनः ॥२९॥
योऽभवत् बान्धवजनः परलोके प्रियस्तव ।
स ते कमर्थं कुरुते त्वं वा तस्मै करोषि कम् ॥३०॥
तस्मात् ज्ञातिवितर्केण मनो नावेष्टुमर्हसि ।
व्यवस्था नास्ति संसारे स्वजनस्य जनस्य च ॥३१॥

असौ क्षेमो जनपदः सुभिक्षोऽबाधसौ शिवः ।
इत्येवमस्य जायेत वितर्कस्तव कश्चन ॥४२॥
प्रहेयः स त्वया सौम्य नाधिवास्यः कथञ्चन ।
विदित्वा सर्व्वमादीप्तं तैस्तैर्दोषाग्निभिर्जगत् ॥४३॥
ऋतुचक्रविवर्त्ताच्च च्युतिपाताक्रमादपि ।
सर्व्वत्र नियतं दुःखं न क्वचिद्विद्यते शिवम् ॥४४॥
क्वचित् शीतं क्वचिद्घर्मः क्वचिद्रोगो भयं क्वचित् ।
बाधतेऽभ्यधिकं लोके तस्मादशरणं जगत् ॥४५॥
जरा व्याधिश्च मृत्युश्च लोकस्यास्य महद्भयम् ।
नास्ति देशः स यत्रास्य तद्भयं[1] नोपपद्यते ॥४६॥
यत्र गच्छति कायोऽयं दुःखं तत्रानुगच्छति ।
नास्ति काचित् गतिर्लोके गतो यत्र न बाध्यते ॥४७॥
रमणीयोऽपि देशः सन् सुभिक्षः क्षेम एव च ।
कुदेश इति विज्ञेयो यत्र क्लेशैर्विदह्यते ॥४८॥
लोकस्याभ्याहतस्यास्य दुःखैः शारीरमानसैः ।
क्षेमः कश्चिन्न देशोऽस्ति स्वस्थो यत्र गतो भवेत् ॥४९॥
दुःखं सर्व्वत्र सर्व्वस्य वर्त्तते सर्व्वदा यदा ।
छन्दरागमतः सौम्य लोकचित्तेषु मा कृथाः ॥५०॥
यदा तस्मान्निवृत्तस्ते छन्दरागो भविष्यति ।
जीवलोकं तदा सर्व्वमादीप्तमिव मंस्यसे ॥५१॥

---

१ P. M. omits नास्ति देशः स यत्रास्य तद्भयं ।

अथ कश्चित् वितर्कस्ते भवेद्मरणाश्रयः ।
यत्नेन स विहन्तव्यो व्याधिरात्मगतो यथा ॥५२॥
मुहूर्त्तमपि विश्रम्भः कार्य्यो न खलु जीविते ।
निलीन इव हि व्याघ्रः कालो विश्वस्तघातकः ॥५३॥
बलस्थोऽहं युवा वेति न ते भवितुमर्हति[1] ।
मृत्युः सर्व्वास्ववस्थासु हन्ति नावेक्षते वयः ॥५४॥
चेचभूतमनर्थानां शरीरं परिकर्षतः ।
स्वस्थाशा जीविताशा वा न दृष्टार्थस्य जायते ॥५५॥
निर्व्वृतः[2] को भवेत्कायं महाभूताश्रयं वहन् ।
परस्परविरुद्धानामहीनामिव भाजनम् ॥५६॥
प्रश्वसित्यथमन्वञ्चम् यदुच्छ्वसिति मानवः ।
अवगच्छ तदाश्वर्य्यमविश्वास्यं हि जीवितम् ॥५७॥
दृदमाश्वर्य्यमपरं यत्सुप्तः प्रतिबुध्यते ।
स्वपितुत्थाय वा भूयो बङ्कमिचा हि[3] देहिनः ॥५८॥
गर्भात् प्रभृति यो लोकं जिघांसुरनुगच्छति ।
कस्तस्मिन् विश्वसेन्मृत्यावुद्यतासःवराविव ॥५९॥
प्रसूतः पुरुषो लोके श्रुतवान् बलवानपि ।
न जयत्यन्तकं कश्चिज्जायमानापि जेष्यति ॥६०॥
मात्रा[4] दानेन भेदेन दण्डेन नियमेन वा ।
प्राप्तो हि रभसो मृत्युः प्रतिहन्तुं न शक्यते ॥६१॥

---

१ P. M. चेति न ते भवितुमर्हसि । २ P. M. निहतः ।
३ P. L. M. lacuna, P. M. वङ्कमिचालि T. ४ P: M. सान्ना ।

तस्मान्नायुषि विश्वासं चञ्चले कर्त्तुमर्हसि ।
नित्यं[1] हरति कालो हि स्राविष्यं न प्रतीक्षते ॥ ६ २॥
निःशोचं पश्यतो लोकं तोयबुद्बुददुर्ब्बलम् ।
कस्यामरवितर्को हि स्यादनुन्मत्तचेतसः ॥ ६ ३॥
तस्मादेषां वितर्काणां प्रहाणार्थं समासतः ।
आनापानस्मृतिं सौम्य विषयीकर्त्तुमर्हसि ॥ ६ ४॥
इत्यनेन प्रयोगेण काले सेवितुमर्हसि ।
प्रतिपक्षं वितर्काणां गदानामगदानिव ॥ ६ ५॥
सुवर्णहेतोरिव पांशुधावको
विहाय पांशून् बृहतो यथादितः ।
जहाति सूक्ष्मानपि तद्विशुद्धये
विशोध्य हेमावयवान्नियच्छति ॥ ६ ६॥
विमोचहेतोरपि युक्तमानसो
विहाय दोषान् बृहतस्तथादितः ।
जहाति सूक्ष्मानपि तद्विशुद्धये[2]
विशोध्य धर्म्मावयवान्नियच्छति ॥ ६ ७॥
क्रमेणाङ्गिः शुद्धं कनकमिह पांशुव्यवहितम्
यथाग्नौ कर्म्मारः पचति भ्रमयावर्त्तयति च ।
तथा योगाचारो निपुणमिह दोषव्यवहितम्
विशोध्य क्लेशेभ्यः शमयति मनः संक्षिपति च ॥ ६ ८॥

---

१ P. M. नित्य T. २ P. M. द्विशुद्धये ।

यथा च स्वच्छन्दादुपनयति कर्मास्रयसुखं
सुवर्णं कर्मारो बहुविधमलंकारविधिषु ।
मनः शुद्धं भिक्षु र्वशगतमभिज्ञास्वपि तथा
यथेच्छं यत्रेच्छं शमयति मनः प्रेरयति च ॥६८॥

इति सौन्दरनन्दे महाकाव्ये वितर्कप्रहाणो नाम
पञ्चदशः सर्गः ।

## षोड़शः सर्गः ।

एवं मनोधारणया क्रमेण व्यपोह्य किञ्चित् समुपोह्य किञ्चित् ।
ध्यानानि चत्वार्यधिगम्य योगी प्राप्नोत्यभिज्ञा[1] नियमेन पञ्च ॥१॥
ऋद्धिप्रवेकञ्च बहुप्रकारं परस्य चेतश्चरितावबोधम् ।
अतीतजन्मस्मरणञ्च दीर्घं दिव्ये[2] विशुद्धे श्रुतिचक्षुषी च ॥२॥
अतःपरं तत्त्वपरीक्षणेन मनो[3] दधात्यास्रवसंक्षयाय ।
ततो हि दुःखप्रभृतीनि सम्यक् चत्वारि सत्यानि पदान्यवैति ॥३॥
बाधात्मकं दुःखमिदं प्रसक्तं दुःखस्य हेतुः प्रभवात्मकोऽयम् ।
दुःखक्षयो निःसरणात्मकोऽयं चाणात्मकोऽयं प्रशमाय मार्गः ॥४॥
इत्यार्यसत्यान्यवबुध्य बुद्धा चत्वारि सम्यक् प्रतिबुध्य चैव ।
सर्वास्रवान् भावनयाभिभूय न जायते ग्लानिमवाप्य भूयः ॥५॥
अबोधतो ह्यप्रतिवेधतश्च तत्त्वात्मकस्यास्य चतुष्टयस्य ।
भवाङ्गवं याति न ग्लानिमेति संसारदोला[4]मधिरोह्य लोकः ॥६॥
तस्माज्जरादेर्व्यसनस्य मूलं समासतो दुःखमवैहि जन्म ।
सर्वौषधीनामिव भू[5]र्भवाय सर्वापदां क्षेत्रमिदं हि जन्म ॥७॥
यज्जन्म रूपस्य हि सेन्द्रियस्य दुःखस्य तन्नैकविधस्य जन्म ।
यः सम्भवश्चास्य समुच्छ्रयस्य मृत्योश्च रोगस्य च सम्भवः सः ॥८॥
सदाप्यसद्वा विषमिश्रमन्नं यथा विनाशाय न धारणाय ।
लोके तथा तिर्यग्गुपर्यधो वा दुःखाय सर्वं न सुखाय जन्म ॥९॥

---

१ P. M. drops त्य । २ P. M. drops ए in दिव्ये ।
३ P. M. ०रीक्षणे मन । ४ P. M. has दोलाधा ।
५ P. M. भुवर्भवाय ।

जरादयो नैकविधाः प्रजानां सत्यां प्रवृत्तौ प्रभवन्त्यनर्थाः ।
प्रवात्सु घोरेष्वपि मारुतेषु नाग्न्यप्रसूतास्तरवश्चलन्ति ॥१०॥
आकाशयोनिः पवनो यथा हि यथा ग्नमौगर्भग्नयो ऊताग्नः ।
आपो यथान्तर्वसुधाग्नयाश्च दुःखं तथा चित्तशरीरयोनि ॥११॥
अपां द्रवत्वं कठिनत्वमुर्व्या वायोश्चलत्वं ध्रुवमौष्ण्यमग्नेः ।
यथा स्वभावो हि तथा स्वभावो दुःखं शरीरस्य च चेतसश्च ॥१२॥
काये सति व्याधिजरादि दुःखं चुत्तर्षवर्षोष्णहिमादि चैव ।
रूपाश्रिते चेतसि सानुबन्धे शोकारतिक्रोधभयादि दुःखम् ॥१३॥
प्रत्यक्षमालोक्य च जन्मदुःखं दुःखं तथातीतमपीति विद्धि ।
यथा च तद्दुःखमिदञ्च दुःखं दुःखं तथा नागतमप्यवैहि ॥१४॥
बीजस्वभावो हि यथेह दृष्टो भूतोपि भव्योपि तथानुमेयः ।
प्रत्यक्षतश्च ज्वलनो यथोष्णो भूतोऽपि भव्योपि तथोष्ण एव ॥१५॥
तन्नामरूपस्य गुणानुरूप यचैव निर्वृत्तिरुदारवृत्त ।
तचैव दुःखं न हि तद्विमुक्तं दुःखं भविष्यत्यभवद्भवेद्वा ॥१६॥

प्रवृत्तिदुःखस्य च तस्य लोके तृष्णादयो दोषगणा निमित्तम् ।
नैवेश्वरो न प्रकृतिर्न कालो नापि स्वभावो न विधिर्यदृच्छा ॥१७॥
ज्ञातव्यमेनेन च कारणेन लोकस्य दोषेभ्य इति प्रवृत्तिः ।
यस्माद् म्रियन्ते सरजस्तमस्का न जायते वीतरजस्तमस्कः ॥१८॥
दृच्छाविशेषे सति तत्र तत्र यानासनादिर्भवति प्रयोगः ।
यस्मादतस्तर्षवशात्] तथैव जन्म प्रजानामिति वेदितव्यम् ॥१९॥
सत्त्वान्यभिष्वङ्गवशानि दृष्ट्वा स्वजातिषु प्रीतिपराण्यतीव ।
अभ्यासयोगादुपपादितानि तैरेव दो[षै]रिति तानि विद्धि ॥२०॥

क्रोधप्रहर्षादिभिराश्रयाणामुत्पद्यते चेह यथा विशेषः ।
तथैव जन्मस्वपि नैकरूपो निर्वर्त्तते क्लेशकृतो विशेषः ॥२१॥
दोषाधिके[1] जन्मनि तीव्रदोष उत्पद्यते रागिणि तीव्ररागः ।
मोहाधिके मोहबलाधिकस्तु तदल्पदोषे च तदल्पदोषः ॥२०॥
फलं हि यादृक् समवैति साक्षात् तदागमो बीज[2]मवैत्यतौतम् ।
अवैत्य बीजप्रकृतिञ्च साक्षादनागतं तत्फलमभ्युपैति ॥२३॥
दोषक्षयो जातिषु यासु यस्य वैराग्यतस्तासु न जायते सः ।
दोषाग्रयस्तिष्ठति यस्य यत्र तस्योपपत्तिर्विवशस्य तत्र ॥२४॥

तज्जन्मनो नैकविधस्य सौम्य तृष्णादयो हेतव इत्यवेत्य ।
तांश्छिन्धि दुःखाद् यदि निर्मुमुक्षा कार्य्यक्षयः कारणसङ्क्षयाद्धि ॥२५॥
दुःखक्षयो हेतुपरिक्षयाच्च प्राप्तं शिवं साधिकुरुष्व धर्म्मम्[3] ।
तृष्णाविरागं क्षयनं निरोधं शमातनं त्राणमहार्य्यमार्य्यम् ॥२६॥
यस्मिन्न जाति र्न जरा न मृत्युर्न व्याधयो नाप्रियसम्प्रयोगः ।
नेच्छाविपन्न प्रियविप्रयोगः क्षमं पदं नैष्ठिकमच्युतं तत् ॥२७॥
दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ॥२८॥
एवं कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम् ॥२९॥

---

१ P. M. रोषा॰ T. २ P. M. बीजग॰ । ३ P. M. धर्म्मे ।

अस्याभ्युपायोऽधिगमाय मार्गः प्रज्ञाविकल्पः प्रशमद्विकल्पः ।
स भावनीयो विधिवद् बुधेन[1] शीले शुचौ चित्तमुखे स्थितेन ॥२०॥
वाक्कर्म सम्यक् सहकायकर्म यथावदाजीवनयश्च शुद्धः ।
इदं त्रयं वृत्तविधौ प्रवृत्तं शीलाश्रयं धर्मपरिग्रहाय ॥२१॥
सत्येषु दुःखादिषु दृष्टिरार्या सम्यग्वितर्कश्च पराक्रमश्च ।
इदं त्रयं ज्ञानविधौ प्रवृत्तं प्रज्ञाश्रयं क्लेशपरिक्षयाय ॥२२॥
न्यायेन सत्याभिगमाय युक्ता सम्यक् स्मृतिः सम्यगथो समाधिः ।
इदं द्वयं योगविधौ प्रवृत्तं शमाश्रयं चित्तपरिग्रहाय ॥२३॥

क्लेशाङ्कुरान्[2] प्रतनोति शीलं बीजाङ्कुरान् काल इवातिवृत्तः ।
शुचौ हि शीले पुरुषस्य दोषा मनः सलज्जा इव धर्षयन्ति ॥२४॥
क्लेशांस्तु विष्कम्भयते समाधिर्वेगानिवाद्रिर्महतो नदीनाम् ।
स्थिते समाधौ हि न धर्षयन्ति दोषा भुजङ्गा इव मन्त्रबद्धाः ॥२५॥
प्रज्ञा त्वशेषेण निहन्ति दोषांस्तीरद्रुमान् प्रावृषि निम्नगेव ।
दग्धा यथा न प्रभवन्ति दोषा वज्राग्निनेवानुसृतेन वृत्ताः ॥२६॥

त्रिस्कन्धमेतं प्रविगाह्य मार्गं प्रख्यष्टमष्टाङ्गमहार्यमार्यम् ।
दुःखस्य हेतून् प्रजहाति दोषान् प्राप्नोति चात्यन्तशिवं पदं तत् ॥२७॥
अस्तोपचारं धृतिरार्जवञ्च ह्रीरप्रमादः प्रविविक्तता च ।
अल्पेच्छता तुष्टिरसङ्गता च लोकप्रवृत्ता च रतिः क्षमा च ॥२८॥
याथात्म्यतो विन्दति यो हि दुःखं तस्योद्भवं तस्य च यो निरोधम् ।
आर्येण मार्गेण स शान्तिमेति कल्याणमित्रैः सह वर्त्तमानः ॥२९॥

---

१ P. M. drops धे in बुधेन । २ P. M. •क्लुरं ।

यो व्याधितो व्याधिमवैति सम्यग् व्याधेर्निदानञ्च तदौषधञ्च ।
आरोग्यमाप्नोति हि सोऽचिरेण[1] भिषग्भिरुपचर्य्यमाणः ॥ ४० ॥
तद् व्याधिसंज्ञां कुरु दुःखसत्ये दोषेष्वपि व्याधिनिदानसंज्ञाम् ।
आरोग्यसंज्ञाञ्च निरोधसत्ये भैषज्य[2]संज्ञामपि मार्गसत्ये ॥ ४१ ॥
तस्मात् प्रवृत्तिं परिगच्छ दुःखं प्रवर्त्तकानप्यवगच्छ दोषान् ।
निवृत्तिमागच्छ च तन्निरोधं निवर्त्तकञ्चाप्यवगच्छ मार्गम् ॥ ४२ ॥

शिरस्यथो वाससि संप्रदीप्ते सत्यावबोधाय मतिर्विचार्य्या ।
दग्धं जगत् सत्यनयं ह्यदृष्ट्वा प्रदह्यते सम्प्रति धक्ष्यते[3] च ॥ ४३ ॥
यदेव यः पश्यति नामरूपं क्षयीति तद्दर्शनमस्य सम्यक् ।
सम्यक् च निर्वेदमुपैति पश्यन् नन्दीक्षयाच्च क्षयमेति रागः ॥ ४४ ॥
तयोश्च नन्दीरजसोः क्षयेण सम्यग् विमुक्तं प्रवदामि चेतः ।
सम्यग् विमुक्तिर्मनसश्च ताभ्यां न चास्य भूयः करणीयमस्ति ॥ ४५ ॥
यथा स्वभावेन हि नामरूपं तद्धेतुमेवास्तगमं च तस्य ।
विजानतः पश्यत एव चाहं ब्रवीमि सम्यक् क्षयमास्रवाणाम् ॥ ४६ ॥
तस्मात् परं सौम्य विधाय वीर्य्यं शीघ्रं चकारास्रवसंक्षयाय ।
दुःखाननित्यांश्च निरात्मकांश्च धातून् विशेषेण[4] परीक्षमाणः ॥ ४७ ॥
धातून् हि षड्भू[5]सलिलानलादीन् सामान्यतः स्वेन च लक्षणेन ।

---

१ P. M. चिरेण, P. L. M. अचिरेण which spoil the metre.
२ P. L. M. भैषज्य° । ३ P. M. सम्प्रतिवक्ष्यते ।
४ P. M. धातुविशेषेण which spoils the metre.
५ P. M. धातुं हि षट्कं ।

अवैति यो नान्यमवैति तेभ्यः सोत्यन्तिकं मोक्षमवैति तेभ्यः ॥४८॥

क्लेशप्रहाणाय च निश्चितेन कारोऽभ्युपायश्च परीक्षितव्यः ।
योगोऽप्यकाले ह्यनुपायतश्च भवत्यनर्थाय न तदगुणाय ॥४९॥
अजातवत्सा यदि गा दुहीत नैवाप्नुयात् क्षीरमकालदोही ।
कालेऽपि वा स्यान्न पयो लभेत मोहेन मूढ्वाद् यदि गा दुहीत ॥५०॥
आर्द्राच्च काष्ठाज्ज्वलनाभिकामो नैव प्रयत्नादपि वह्निमृच्छेत् ।
काष्ठाच्च शुष्काद्पि पातनेन नैवाग्निमाप्नोत्यनुपायपूर्व्वम् ॥५१॥
तद्वेगकालौ विधिवत्परीक्ष्य योगस्य मात्रामपि चाभ्युपायम् ।
बलाबले चात्मनि संप्रधार्य्य कार्य्यः प्रयत्नो न तु तद्विरुद्धः ॥५२॥

प्रग्राहकं यत्तु निमित्तमुक्तमुद्धुन्यमाने हृदि तत्र सेव्यम् ।
एवं हि चित्तं प्रशमं न याति [न] वह्निना वह्निरिवेर्य्यमाणः ॥५३॥
शमाय [य]त्स्याग्नियमनिमित्तं जातोद्भवे चेतसि तस्य कालः ।
एवं हि चित्तं प्रशमं नियच्छत्य[ु]दीर्य्यमाणोऽग्निरिवोदकेन ॥५४॥
शमावहं यत् [नियतं] निमित्तं सेव्यं न तच्चेतसि लीयमाने ।
एवं हि भूयो लयमेति चित्तमनीर्य्यमाणोऽग्निरिवाल्पसारः ॥५५॥
प्रग्राहकं यन्नियतं निमित्तं लयं गते चेतसि तस्य कालः ।
क्रियासमर्थं हि मनस्तथा स्यात् मन्द्यायमानोऽग्निरिवेन्धनेन ॥५६॥
औपेक्षिकं नापि निमित्तमिष्टं लयं गते चेतसि सोद्भवे वा ।
एवं हि तीव्रं जनयेदनर्थमुपेक्षितो व्याधिरिवातुरस्य ॥५७॥
यत्स्यादुपेक्षा नियतं निमित्तं साम्यं गते चेतसि तस्य कालः ।
एवं हि कृत्याय भवेत् प्रयोगो रथो विधेयाश्व इव प्रयातः ॥५८॥
रागोद्भवव्याकुलितेऽपि चित्ते नैवोपसंहारविधिर्न कार्य्यः ।

रागात्मको मुह्यति मैत्र्या हि स्नेहं कफक्षोभ[1] दवोपयुज्य ॥५८॥
रागोद्भवे चेतसि धैर्य्यमेत्य निषेवितव्यं त्वशुभं निमित्तम् ।
रागात्मको ह्येवमुपैति शर्म्म कफात्मको रूक्षमिवोऽपयुज्य ॥६०॥
व्यापाद[2]दोषेण मनस्युदीर्णे न सेवितव्यं त्वशुभं निमित्तम् ।
द्वेषात्मकस्य ह्यशुभा वधाय पित्तात्मनस्तीक्ष्ण दवोपचारः ॥६१॥
व्यापाददोषक्षुभिते तु चित्ते सेव्या क्षपक्षोपनयेन मैत्री ।
द्वेषात्मनो हि प्रशमाय मैत्री पित्तात्मनः शीत दवोपचारः ॥६२॥
मोहानुबद्धे मनसः प्रचारे मैत्र्या शुभा चैव भवत्ययोगः ।
ताभ्यां हि संमोहमुपैति भूयो वाय्वात्मको रूक्षमिवोपनीय ॥६३॥
मोहात्मिकायां मनसः प्रवृत्तौ सेव्यस्त्विदंप्रत्ययताविचारः ।
मूढे मनस्येष हि शान्तिमार्गो वाय्वात्मके स्निग्ध दवोपचारः ॥६४॥
उल्कामुखस्थं हि यथा सुवर्णं सुवर्णकारो धमतीह काले ।
काले परिप्रोक्षयते जलेन क्रमेण काले समुपेक्षते च ॥६५॥
दहेत्सुवर्णं हि धमन् न काले जले क्षिपन् संशमयेदकाले ।
न चापि सम्यक् परिपाकमेनं नयेदकाले समुपेक्षमाणः ॥६६॥
संग्रहस्य प्रशमस्य चैव तथैव काले समुपेक्षणस्य ।
सम्यग् निमित्तं मनसा त्वबेद्यं नाशो हि यत्नोऽप्यनुपायपूर्व्वः ॥६७॥

इत्येवमन्यायनिवर्त्तनञ्च न्यायञ्च तस्मै सुगतो बभाषे ।
भूयश्च तत्तच्चरितं विदित्वा वितर्कहानाय विधीनुवाच ॥६८॥
यथा भिषक् पित्तकफानिलानां य एव कोपं[3] समुपैति दोषः ।

---

१ P. L. M. •क्षोभय । २ P. M. व्यापार• ।
३ P. M. कोपं ।

शमाय तस्यैव विधिं विधत्ते व्यधत्त दोषेषु तथैव बुद्धः ॥६९॥
एकेन कल्पेन स चेन्न हन्यात् स्वभ्यस्तभावादशुभान् वितर्कान् ।
ततो द्वितीयं क्रममारभेत नत्वेव हेयो गुणवान् प्रयोगः ॥७०॥
अनादिकालोपचितात्मकत्वात् बलीयसः क्लेशगणस्य चैव ।
सम्यक्प्रयोगस्य च दुष्करत्वात् क्लेत्तुं न शक्याः सहसा हि दोषाः ॥७१॥
अल्पा यथाल्पा विपुलाणिरन्या निर्वाह्यते तद्विदुषा नरेण ।
तद्वत् तदेवाकुशलं निमित्तं क्षिपेन् निमित्तान्तरसेवनेन ॥७२॥
तवाथवाध्यात्मनवग्रहत्वान्नैवोपशाम्येदशुभो वितर्कः ।
हेयः स तद्दोषपरीक्षणेन सम्यापदो मार्ग इवाध्वगेन ॥७३॥
यथा क्षुधार्त्तोपि विषेण पृक्तं जिजीविषुर्नेच्छति भोक्तुमन्नम् ।
तथैव दोषावहमित्यवेत्य जहाति विद्वानशुभं निमित्तम् ॥७४॥
न दोषतः पश्यति यो हि दोषं कर्त्तुं ततो वारयितुं समर्थः ।
गुणं गुणे पश्यति यस्य यत्र स वार्य्यमाणोपि ततः प्रयाति ॥७५॥
व्यपत्रपन्ते हि कुलप्रसूता मनःप्रचारैरशुभैः प्रवृत्तैः ।
कर्णे मनस्वांस्य युवा वपुष्मान् न चाक्षुषैरप्रयुते र्विषैः ॥७६॥
निर्धूयमाणास्त्वथ लोभतोपि तिष्ठेयुरेवाकुशला वितर्काः ।
कार्य्यान्तरैरध्ययनक्रियाद्यैः सेव्यो विधिर्विस्मरणाय तेषाम् ॥७७॥
स्वप्नव्यमप्येव विच[च्च]णेन कायक्रमो वापि निषेवितव्यः ।
नत्वेव सञ्चिन्त्यमसन्निमित्तं यचावसक्तस्य भवेदनर्थः ॥७८॥
यथा हि भीतो निशि तस्करेभ्यो दार[ं] प्रियेभ्योऽपि न दातुमिच्छेत् ।
प्राज्ञस्तथा संहरति प्रयोगं समं शुभस्याप्यशुभस्य[1] दोषैः ॥७९॥

---

१ P. L. M. drops ०प्यशुभस्य ।

एवं प्रकारैरपि यद्युपायैर्निवार्य्यमाणा न पराङ्मुखाः स्युः ।
ततो यथास्थूलनिवर्हणेन सुवर्णदोषा इव ते प्रहेयाः ॥८०॥
द्रुतप्रयाणप्रभ्र[तौंश्च] तीक्ष्णकामप्रयोगात् परिखिद्यमानः ।
यथा नरः संश्रयते तथैव प्राज्ञेन दोषेष्वपि वर्त्तितव्यम् ॥८१॥
ते चेदलब्धप्रतिपक्षभावा नैवोपशाम्येयुरसंहितर्कोः ।
मुहूर्त्तमप्यप्रतिबध्यमाना गृहे भुजङ्गा इव नाधिवास्याः ॥८२॥
दन्तेऽपि दन्तं[१] प्रणिधाय कामं तालव्यमुत्पीड्य च जिह्वयापि ।
चित्तेन चित्तं परिगृह्य चापि कार्य्यः प्रयत्नो न तु तेऽनुवृत्त्याः ॥८३॥
किमत्र चित्रं यदि वीतमोहो वनं गतः स्वप्नमना न मुह्येत् ।
आक्षिप्यमाणो हृदि तन्निमित्तैर्न क्षोभ्यते यः स कृती स धीरः ॥८४॥
तदार्य्यसत्याधिगमाय पूर्वं विशोधयानेन नयेन मार्गम् ।
यत्नागतः प्रत्युविनिग्रहार्थं[२] राजेव लक्ष्मीमजितां जिगीषन् ॥८५॥
एतान्यरण्यान्यभितः शिवानि योगानुकूलान्यजनेरितानि ।
कायस्य ज्ञात्वा प्रविवेकमात्रं क्लेशप्रहाणाय भजस्व मार्गम् ॥८६॥
कौण्डिन्य-नन्दक्रिमिलालिरुद्रा: तिष्योपसेनौ विमलोऽथ राधः[३] ।
वाष्पोत्तरौ धौतकि-मोहराजौ कात्यायनद्रव्यपिलिन्दवत्साः ॥८७॥
भद्रालि-भद्रायण-सर्पदास-सुभूति-गोदत्त-सुजात-वत्साः ।
संग्रामजिद् भद्रजिदश्वजिच्च श्रोणश्च श्रोणश्च स कोटिकर्णः ॥८८॥
क्षेमाजितो[४] नन्दकनन्दमाता वृषालि-वागीश-यशोयशोदाः ।
महाकृपो वल्कलि-राष्ट्रपालौ सुदर्शन-स्वागत-मेघिकाश्च ॥८९॥

---

१ P. M. दत्तं । २ P. M. ०विनिर्व्वहार्थं ।
३ P. M. रुधः । ४ P. M. क्षमाजितो ।

स कण्किनः काश्यपस्योरुविल्वो महामहाकाश्यप-तिष्य-नन्दाः ।
पूर्णस्य पूर्णस्य स पूर्णकस्य शोणापरान्तस्य स पूर्ण एव ॥८०॥
शारद्वतीपुत्र-सुवाहु-चुन्दाः कोन्देय-काप्य-भृगु-कुण्डधानाः ।
सप्तैवलौ रेवत-कण्ठिलौ च मौद्गल्यगोत्रस्य गवांपतिश्च ॥८१॥
यं विक्रमं योगविधावकुर्व्वंस्तमेव शीघ्रं विधिवत् कुरुष्व ।
ततः पदं प्राप्स्यसि तैरवाप्तं संख्याच्च तै स्वन्नियतं यशश्च ॥८२॥

द्रव्यं यथा स्यात् कटुकं रसेन तच्चोपयुक्तं मधुरं विपाके ।
तथैव वीर्य्यं[1] कटुकं श्रमेण तस्यार्थसिद्धौ मधुरो विपाकः ॥८३॥
वीर्य्यं परं कार्य्यकृतौ हि मूलं वीर्य्यादृते काचन नास्ति सिद्धिः ।
उदेति वीर्य्यादिह सर्वसम्पन्निर्वीर्य्यता चेत्सकलस्य पाप्मा ॥८४॥

अलब्धस्यालाभो नियतमुपलब्धस्य विगमः
तथैवात्मावज्ञा कृपणमधिकेभ्यः परिभवः ।
तमो निस्तेजस्त्वं श्रुतिनियमतुष्टिव्युपरमो
नृणां निर्वीर्य्याणां भवति विनिपातश्च भवति ॥८५॥
नयं श्रुत्वाग्रन्थो यदयमभिवृद्धिं न लभते
परं धर्म्मं ज्ञात्वा यदुपरि निवासं न लभते ।
गृहं त्यक्त्वा मुक्तौ यदयमुपशान्तिं न लभते
निमित्तं कौसीद्यं भवति पुरुषस्यान्तररिपुः ॥८६॥
अनिच्छिन्नोत्साहो यदि खनति गां वारि लभते
प्रसक्तं व्यामथ्नन् ज्वलनमरणिभ्यां जनयति ।

---

१ P. M. वीर्य्य०/

प्रयुक्ता योगे तु ध्रुवमुपलभन्ते श्रमफलं
द्रुतं नित्यं याप्यो गिरिमपि हि भिन्दन्ति सरितः ॥९७॥
हत्वा गां परिपाल्य च श्रमगतैरश्नाति सस्यश्रियं
यत्नेन प्रविगाह्य सागरजलं रत्नश्रिया क्रीड़ति ।
शत्रूणामवधूय वीर्य्यमिषुभिर्भुङ्क्ते नरेन्द्रः श्रियं
तद्वीर्य्यं कुरु शान्तये विनियतं वीर्य्यं हि सर्वर्द्धये ॥९८॥

इति सौन्दरनन्दे महाकाव्ये आर्य्यसत्यव्याख्यानो
नाम षोड़शः सर्गः ।

## सप्तदशः सर्गः ।

अथैवमादेशितत्त्वमार्गो नन्दस्तदा प्राप्तविमोक्षमार्गः ।
सर्वेण भावेन गुरौ प्रणम्य क्लेशप्रहाणाय वनं जगाम ॥१॥
तच्चावकाशं[1] मृदुनीलशष्पं ददर्श शान्तं तरुषण्डवन्तम् ।
निःशब्दया निम्नगयोपगूढं वैदूर्यनीलोदकया वहन्त्या ॥२॥
स पादयोश्चैव विधाय शौचं शुचौ शिवे श्रीमति वृक्षमूले ।
मोक्षाय बद्ध्वा व्यवसायकक्षां पर्य्यङ्कमाभोगवहितं बबन्ध ॥३॥
राजन्[2] समर्थं प्रणिधाय कायं काये स्मृतिं चाभिमुखीं विधाय ।
सर्वेन्द्रियाण्यात्मनि सन्निधाय स तत्र योगं प्रयतः प्रपेदे ॥४॥
ततः स तत्त्वं निखिलं चिकीर्षुर्मोक्षानुकूलांश्च विधीञ्चिकीर्षन् ।
ज्ञानेन लोकेन शमेन चैव चचार चेतः परिकर्मभूमौ ॥५॥
संधाय धैर्य्यं प्रणिधाय वीर्य्यं[3] व्यपोह्य सक्तिं परिगृह्य शक्तिम् ।
प्रशान्तचेता नियमस्थचेताः स्वस्थस्ततो[4]ऽभूद्विषयेष्वनास्थः ॥६॥
आतप्तबुद्धेः प्रहितात्मनोऽपि स्वभ्यस्तभावाद्य कामसंज्ञा ।
पर्य्याकुलं तस्य मनश्चकार प्रावृट्सु विद्युज्ज्वलमागतेव ॥७॥
स पर्य्यवस्थानमवेत्य यत्नाच्चिच्छेप तां धर्मविघात-कर्त्रीम् ।
प्रियामपि क्रोधपरीतचेता नारीमिवोद्दृत्तगुणां मनस्वी ॥८॥
आरब्धवीर्य्यस्य मनः शमाय भूयस्तु तस्याकुशलो वितर्कः ।
व्याधिप्रणाशाय निविष्टबुद्धेरुपद्रवो घोर इवाजगाम ॥९॥

---

१ P. M. तच्चावभासं । २ P. M. राज्यं ।
३ P. M. धैर्य्यं । ४ P. M. निरस्त० ।

स तद्विघाताय निमित्तमन्त्यद्योगानुकूलं कुग्रहं प्रपेदे ।
आर्त्तायनं क्षीणबलो बलस्थं निरस्यमानो बलिनारिणेव ॥१०॥
पुरं विधायानुविधाय दण्डं मित्राणि संगृह्य रिपून् विगृह्य ।
राजा यथाप्नोति हि गामपूर्वां नीतिं मुमुक्षोरपि सैव योगे ॥११॥
विमोक्षकामस्य हि योगिनोपि मनः पुरं ज्ञानविधिश्च दण्डः ।
गुणाश्च मित्राण्यरयश्च दोषा भूमिर्विमुक्तिर्यतते यदर्थम् ॥१२॥
स दुःखजालान्महतो मुमुक्षुर्विमोक्षमार्गाधिगमे विविक्षुः ।
पन्थानमार्य्यं परमं दिदृक्षुः शमं ययौ किञ्चिदुपात्तचक्षुः[1] ॥१३॥
यः स्याच्चिकेतस्तमसोऽनिकेतः श्रुत्वापि तत्त्वं स भवेत्प्रमत्तः ।
यस्मात्तु[2] मोक्षाय स पात्रभूतः तस्मान्मनः स्वात्मनि संजहार ॥१४॥
सस्मारतः प्रत्ययतः स्वभावादास्वादतो दोषविशेषतश्च ।
अथात्मवान् निःशरणात्मतश्च धर्म्मेषु चक्रे विधिवत् परीक्षाम् ॥१५॥
सरूपिणं क्षत्तमरूपिणञ्च सारं दिदृक्षुर्विचिकाय कायम् ।
अथाशुचिं दुःखमनित्यमस्वं निरात्मकं चैव चिकाय कायम् ॥१६॥
अनित्यतस्तत्र हि शून्यतश्च निरात्मतो दुःखत एव चापि ।
मार्गप्रवेकेन स लौकिकेन क्लेशद्रुमं सञ्जघनाञ्चकार ॥१७॥
यस्माद्भूत्वा भवतीह सर्व्वं भूत्वा च भूयो न भवत्यवश्यम् ।
सहेतुकञ्च क्षयिहेतुमच्च तस्मादनित्यं जगदित्यविन्दत् ॥१८॥
यतः प्रसूतस्य च कर्म्मयोगः प्रसज्यते बन्धविघातहेतुः ।
दुःखप्रतीकारविधौ सुखाख्यं ततो भवं दुःखमिति व्यपश्यत् ॥१९॥

---

१ P. M. उपान्त°। २ P. M. तस्मात्।

यतश्च संस्कारगतं विविक्तं न कारकः कश्चन वेदको वा ।
सामग्यतः सम्भवति प्रवृत्तिः शून्यं ततो लोकमिमं ददर्श ॥२०॥
यस्माच्चिरोढं जगदक्षतत्वं नैर्ग्रन्थ्यमेकः[1] कुरुते क्रियासु ।
तत्तत् प्रतीत्य प्रभवन्ति भावा निरात्मकं तेन विवेद लोकम् ॥२१॥

ततः स वातं व्यजनादिवोष्णे काष्ठाश्रितं निर्मथनादिवाग्निम् ।
अन्तःक्षितिस्थं खननादिवाम्भो लोकोत्तरं वर्त्म दुरापमाप ॥२२॥
सज्ज्ञान-चाप-स्मृति-वर्म्म बद्ध्वा विशुद्धशीलव्रतवाहनस्थः ।
क्लेशारिभिश्चित्तरणाजिरस्थैः सार्द्धं युयुत्सु र्विजयाय तस्थौ ॥२३॥
ततः स बोध्यङ्गशिताग्रशस्त्रः सम्यक्प्रधानोत्तमवाहनस्थः ।
मार्गाङ्गमातङ्गवता बलेन शनैः शनैः क्लेशचमूं जगाहे ॥२४॥
स स्मृत्युपस्थानमयैः पृषत्कैः शत्रून् विपर्य्यासमयान् क्षणेन ।
दुःखस्य हेतूंश्चतुरश्चतुर्भिः स्वैः स्वैः प्रचारायतने ददार ॥२५॥
आर्य्यैर्बलैः पञ्चभिरेव पञ्च चेतःखिलान्यप्रतिमैर्बभञ्ज ।
मिथ्याङ्गनागांश्च तथाङ्गनागैर्विनिर्दुधावाष्टभिरेव सोऽष्टौ ॥२६॥

अथात्मदृष्टिं सकलां विधूय चतुर्षु सत्येष्वकथंकथः सन् ।
विशुद्धशीलव्रतदृष्टधर्मा धर्म्मस्य पूर्वां फलभूमिमाप ॥२७॥
स दर्शनादार्य्यचतुष्टयस्य क्लेशैकदेशस्य च विप्रयोगात् ।
प्रत्यात्मिकाच्चापि विशेषलाभात् प्रत्यक्षतो ज्ञानसुखस्य चैव ॥२८॥
दार्ढ्यात् प्रसादस्य धृतेः स्थिरत्वात् सत्येष्वसंमूढतया चतुर्षु ।
शीलस्य चाच्छिद्रतयोत्तमस्य निःसंशयो धर्म्मविधौ बभूव ॥२९॥

---

१ P. M. एकं ।

कुदृष्टिजालेन स विप्रयुक्तो लोकं तथाभूतमवेक्षमाणः ।
ज्ञानाग्रयं प्रीतिमुपाजगाम भूयः प्रसादञ्च गुरावियाय ॥ २ ० ॥
यो हि प्रवृत्तिक्षियतामवैति नैवान्यहेतोरिह नाप्यहेतोः ।
प्रतीत्य तत्तत्[१] समवैति तत्तत् स नैष्ठिकं पश्यति धर्ममार्य्यम् । २ १ ॥
शान्तं शिवं निर्ज्वरसं विरागं निःश्रेयसं पश्यति यच्च धर्म्म ।
तस्योपदेष्टारमथार्य्यवर्य्यं संप्रेक्षते बुद्धमवाप्तचक्षुः ॥ २ २ ॥
यथोपदेशेन शि[वे]न मुक्तो रोगाद्रोगो भिषजं क्षतघ्नः ।
अनुस्मरन् पश्यति चित्तदृष्ट्या मैत्र्या च शान्ते ज्ञतया च तुष्टः ॥ २ ३ ॥
आर्य्येण मार्गेण तथैव मुक्तस्तथागतं तत्त्वविदार्य्यतत्त्वः ।
अनुस्मरन् पश्यति कायमाद्यौ मैत्र्या च सर्वज्ञतया च तुष्टः ॥ २ ४ ॥
स नाग्रकैर्दृष्टिगतैर्विमुक्तः पर्य्य[न्त]मालोक्य पुनर्भवस्य ।
वक्त्रे घृणाक्लेशविजृम्भितेषोर्मृत्योर्न तत्रास न दुर्गतिभ्यः ॥ २ ५ ॥
त्वक्पायुमेदोरुधिरास्थिमांसकेशादिनाऽमेध्यगणेन पूर्णम् ।
ततः स कायं समवेक्षमाणः सारं विचिन्वाणपि नोपलेभे ॥ २ ६ ॥

स कामरागप्रतिघौ स्थिरात्मा तेनैव योगेन तनू चकार ।
हत्वा महोरस्कतनुस्तनू तौ प्रापद्द्वितीयं फलमार्य्यधर्म्मे ॥ २ ७ ॥
स लोभचापं परिकल्पवाणं रागं महावैरिणमल्पशेषम् ।
कायस्वभावाधिगतैर्विभेद योगायुधास्तरशुभाशुपत्कैः ॥ २ ८ ॥
द्वेषायुधं क्रोधविकीर्णवाणं व्यापादमन्तःप्रसवं सपत्नम् ।
मैत्रीशुपत्कै र्धृतितूणसंस्थैः क्षमाधनुर्ज्याविसृतै र्जघान ॥ २ ९ ॥

---

१ P. M. drops तत्त० ।

मूर्च्छान्यथ चौष्णशुभस्य वीरस्त्रिभिर्विमोचायतनैस्सकर्त्तृ ।
समूलमुत्खान् धृतकार्मुकांस्त्रीनरीनिवारिस्त्रिभिराशयास्यैः ॥ ४० ॥
स कामधातोः समतिक्रमाय पार्ष्णिग्रहांस्तानभिभूय शत्रून् ।
योगादनागामिफलं प्रपद्य दारीव निर्व्वाणपुरस्य तस्थौ ॥ ४१ ॥

कामैर्विविक्तं मलिनैश्च धर्मैर्वितर्कवच्चापि विचारवच्च ।
विवेकजं प्रीतिसुखोपपन्नं ध्यानं ततः स प्रथमं प्रपेदे ॥ ४२ ॥
कामाग्निदेहेन स विप्रमुक्तो ह्लादं परं ध्यानसुखादवाप ।
सुखं विगाह्याप्सिव घर्मखिन्नः प्राप्येव चार्थं विपुलं दरिद्रः ॥ ४३ ॥
तत्रापि तद्धर्मगतान् वितर्कान् गुणागुणे च प्रसृतान् विचारान् ।
बुद्ध्वा मनःक्षोभकरानशान्तांस्तद्विप्रयोगाय मतिश्चकार ॥ ४४ ॥
क्षोभं प्रकुर्व्वन्ति यथोर्म्मयो हि धीरप्रसन्नाम्बुवहस्य सिन्धोः ।
एकाग्रभूतस्य तथोर्म्मिभूतास्त्विन्नाम्भसः क्षोभकरा वितर्काः ॥ ४५ ॥
खिन्नस्य सुप्तस्य च निर्वृतस्य बाधां यथा मंजनयन्ति शब्दाः ।
अध्यात्ममेकाग्र्यमुपागतस्य भवन्ति बाधाय तथा वितर्काः ॥ ४६ ॥

अथावितर्कं क्रमशोऽविचारमेकाग्रभावान्मनसः प्रसन्नम् ।
समाधिजं प्रीतिसुखं द्वितीयं ध्यानं तदाध्यात्मगिवं स दध्यौ ॥ ४७ ॥
तद्ध्यानमागम्य च चित्तमौनं लेभे परां प्रीतिमलब्धपूर्व्वाम् ।
प्रीतौ तु तत्रापि स दोषदर्शी यथा वितर्कोद्भवतत्तथैव ॥ ४८ ॥
प्रीतिः[1] परा वस्तुनि यत्र यस्य विपर्य्ययात्तस्य हि तत्र दुःखम् ।
प्रीतेरतः प्रेक्ष्य स तत्र दोषान् प्रीतिक्षये योगमुपाददोह ॥ ४९ ॥

---

१ P. M. प्रीतीवतः T.

प्रीते विरागात् सुखमार्य्यजुष्टं कायेन विन्दन्नथ संप्रजानन् ।
उपेक्षकः स स्मृतिमान् व्यहार्षीत् ध्यानं तृतीयं प्रतिलभ्य धीरः ॥५०॥
यस्मात् परं तत्र सुखं सुखेभ्यस्ततः परं नास्ति सुखप्रवृत्तिः ।
तस्माद् बभाषे मुदभक्तत्लभूमिं परापरज्ञः परमेति मैत्र्या ॥५१॥
ध्यानेऽपि तस्याथ ददर्श दोषं मेने परं शान्तिमनिञ्जमेव ।
आभोगतोऽपीञ्जयति स्म तस्य चित्तं प्रवृत्तं सुखमित्यजस्रम् ॥५२॥
यच्चेञ्जितं स्पन्दितमस्ति तत्र यत्रास्ति च स्पन्दितमस्ति दुःखम् ।
यस्मादतस्तत्सुखमिञ्जकत्वात् प्रशान्तिकामा यतयस्त्यजन्ति ॥५३॥
अथ प्रहाणात् सुखदुःखयोश्च मनोविकारस्य च पूर्व्वमेव ।
दध्यावुपेक्षास्मृतिमद्विशुद्धं ध्यानं तथाऽदुःखसुखं चतुर्थम् ॥५४॥
यस्मात्तु तस्मिन् न सुखं न दुःखं ज्ञानं च तत्रास्ति तदर्थचारि ।
तस्मादुपेक्षा स्मृतिपारिशुद्धि[1] र्निरुच्यते ध्यानविधौ चतुर्थे ॥५५॥
ध्यानं स निःश्रित्य ततश्चतुर्थमर्हत्वलाभाय मतिं चकार ।
सत्त्वाय मित्रं बलवन्तमार्य्यं राजेव देशानजिताञ् जिगीषुः ॥५६॥
चिच्छेद कार्त्स्न्येन ततः स पञ्च प्रज्ञासिना भावनयेरितेन ।
ऊर्द्ध्वंगमान्युत्तमबन्धनानि संयोजनान्युत्तमबन्धनानि ॥५७॥
बोध्यङ्गनागैरपि सप्तभिः स सप्तैव चित्तानुशयान् ममर्द्द ।
द्वीपानिवोपस्थितविप्रणाशान् कालो यदैः सप्तभिरेव सप्त ॥५८॥
अग्निद्रुमाज्याम्बुषु या हि वृत्तिः कबन्धवाय्वग्निदिवाकराणाम् ।
दोषेषु तां वृत्तिमियाय नन्दो निर्व्वापणोत्पाटनदाहशोषैः ॥५९॥

---

१ P. M. पारिशुद्धं ।

इति विवेगं विमलं विवीचमेकाग्रमं पञ्चरयं दिकूलम् ।
दिग्याहमष्टाङ्गवता प्लवेन दुःखार्णवं दुस्तरमुत्ततार ॥६०॥

अर्हत्वमासाद्य स सत्क्रियार्हो निरुत्सुको निष्पृणयो निराग्रः ।
विभीर्विमुग्वीतमदो विरागः स एव धृत्यान्य इवावभासे ॥६१॥
भ्रातुश्च शास्तुश्च तथानुशिष्या नन्दस्ततः स्वेन च विक्रमेण ।
प्रशान्तचेताः परिपूर्णकाम्यो वाणीमिमामात्मगतां जगाद ॥६२॥

नमोऽस्तु तस्मै सुगताय येन हितैषिणा मे करुणात्मकेन ।
बहूनि दुःखान्यपवर्त्तितानि सुखानि भूयांस्युपसंहृतानि ॥६३॥
अहं ह्यनार्य्येण शरीरजेन दुःखात्मके वर्त्मनि क्षिप्यमाणः ।
निवर्त्तितस्तद्वचनाङ्कुशेन दर्पान्वितो नाग इवाङ्कुशेन ॥६४॥
तस्याज्ञया कारुणिकस्य शास्तुः हृदिस्थमुत्पाट्य हि रागशल्यम् ।
अद्यैव तावत् सुमहत्सुखं मे सर्व्वक्षये किं वत निर्वृतस्य ॥६५॥
निर्व्वाप्य कामाग्निमहं हि दीप्तं धृत्याम्बुना पावकमम्बुनेव ।
ह्रादं परं साम्प्रतमागतोऽस्मि शीतं हृदं घर्म्म इवावतीर्णः ॥६६॥
न मे प्रियं किञ्चन नाप्रियं मे न मेऽनुरोधोऽस्ति कुतो विरोधः ।
तयोरभावात्सुखितोऽस्मि सद्यो हिमातपाभ्यामिव विप्रमुक्तः ॥६७॥
महाभयात् क्षेममिवोपलभ्य महावरोधादिव विप्रमोक्षम् ।
महार्णवात् पारमिवाप्लवः सन् भौमान्धकारादिव च प्रकाशम् ॥६८॥
रोगादिवारोग्यमसह्यरूपादृणादिवानृण्यमनन्तसंख्यात् ।
द्विषत्सकाशादिव चापयानं दुर्भिक्षयोगाच्च यथा सुभिक्षम् ॥६९॥
तद्वत् परां शान्तिमुपागतोऽहं यस्यानुभावेन विनायकस्य ।
करोमि भूयः पुनरुक्तमस्मै नमो नमोऽर्हाय तथागताय ॥७०॥

येनाहं गिरिमुपनीय रुक्मशृङ्गं
स्वर्गञ्च स्रवगवधूनिदर्शनेन।
कामात्मा त्रिदिवचरीभिरङ्गनाभि-
र्निष्कृष्टो युवतिमये कलौ निमग्नः ॥७१
तस्माच्च व्यसनपराद्नर्थपङ्कात्
उत्क्षिप्य क्रमशिथिलः करीव पङ्कात्।
शान्तेऽस्मिन् विरजसि विज्वरे विशोके
सद्धर्मे वितमसि नैष्ठिके विमुक्तः ॥७२॥
तं वन्दे परमनुकंपकं[1] महर्षिं
मूर्द्धाहं प्रकृतिगुणज्ञमाप्तयज्ञम्।
संबुद्धं दृग्बलिनं भिषक्प्रधानं
त्रातारं पुनरपि चास्मि सन्नतस्तम् ॥७३॥

आर्य्याश्वघोषकृतौ महाकाव्ये सौन्दरनन्दे
अमृताधिगमो नाम सप्तदशः सर्गः।

---

१ P. M. drops °पकं।

## अष्टादशः सर्गः ।

अथ द्विजो बाल दवाग्निवेदः क्षिप्रं वणिक् प्राप्त दवाग्निलाभः ।
जित्वा च राजन्य दवारिसैन्यं नन्दः कृतार्थो गुरुमभ्यगच्छत् ॥१॥
द्रष्टुं मुखं ज्ञानसमाधि[1]काले गुरुर्हि शिष्यस्य गुरोश्च शिष्यः ।
परिश्रमस्ते [स]फलो मयीति यतो दिदृक्षाभ्य सुनौ बभूव ॥२॥
यतो हि येनाधिगतो विशेषस्तस्योत्तमां सोऽर्हति कर्त्तुमीड्याम् ।
आर्य्यः सरागोपि कृतज्ञभावात् प्रक्षीणमानः किमु वीतरागः ॥३॥
यस्याथ कामप्रभवा हि भक्तिः स्वतोऽस्य[2] सा तिष्ठति दृढमूला ।
धर्मान्वयो यस्य तु भक्तिरागस्तस्य प्रसादो हृदयावगाढः ॥४॥
काषायवासाः कनकावदातस्ततः स मूर्द्धा गुरवे प्रणेमे ।
वातेरितः पल्लवतास्रराग: पुष्पोज्ज्वलश्रीरिव कर्णिकारः ॥५॥

अथात्मनः शिष्यगुणस्य चैव महामुनेः शास्तृगुणस्य चैव ।
सन्दर्शनार्थं स न मानहेतोस्त्वां कार्य्यसिद्धिं कथयाम्बभूव ॥६॥
यो दृष्टिग्राह्यो हृदयावगाढः प्रभो भृशं मामतुदत्सुतीक्ष्णः ।
त्वद्वाक्यसंदंशमुखेन मे स समुद्धृतः शल्यहृतेव शल्यः ॥७॥
कथंकथीभावगतोऽस्मि येन छिन्नः स निःसंशय संशयो मे ।
त्वच्छासनात् सत्यपथमागतोऽस्मि सुदेशिकस्येव पथि प्रनष्टः ॥८॥
यत्पीतमास्वाद्य वशेन्द्रियेण दर्पेण कन्दर्पविषं मयाशीत् ।
तन्मे हतं त्वद्वचनागदेन विषं विनाशीव महागदेन ॥९॥
त्वयं गतं जन्म निरस्तजन्म सद्धर्मचर्य्यासुषितोऽस्मि सम्यक् ।

---

१ P. M. समाप्त ।

२ P. M. सुतस्य P. L. M. lacuna T.

कृत्स्नं कृतं मे कृतकार्य्य कार्य्यं लोके प्रभूतोऽस्मि न लोकधर्म्मा ॥ १० ॥
मैत्रीसनीं व्यञ्जनचारुसास्नां सद्धर्म्मदुग्धां प्रतिभानशृङ्गाम् ।
तवास्मि गां साधु निपीय तृप्तस्तृषेव गामुत्तमवत्सवर्णः ॥ ११ ॥
यत्पश्यतश्चाधिगमो मयायं तन्मे समासेन मुने निबोध ।
सर्वज्ञ कामं विदितं तवैतत् स्खल्नूपचारं प्रविवक्षुरस्मि ॥ १२ ॥
अन्येऽपि सन्तो विमुमुक्षवो हि श्रुत्वा विमोक्षाय नयं परस्य ।
मुक्तस्य रोगादिव रोगवन्तस्तेनैव मार्गेण सुखं घटन्ते ॥ १३ ॥

द्रव्यादिकान् जन्मनि वेद्मि धातून् नात्मात्मसुर्व्यादिषु तेषु किञ्चित् ।
यस्मादतस्तेषु न मेऽस्ति भक्तिर्बहिश्च कायेन समा मतिर्मे ॥ १४ ॥
स्कन्धांश्च रूपप्रभृतीन् दृशार्द्रान् पश्यामि यस्माच्चपलानसारान् ।
अनात्मकांश्चैव वधात्मकांश्च तस्मादिमुक्तोऽस्म्यधिवेभ्य एभ्यः ॥ १५ ॥
यस्माच्च पश्याम्युदयञ्च सत्तां[1] सर्व्वास्ववस्थास्वहमिन्द्रियाणाम् ।
तस्मादनित्येषु निरात्मकेषु दुःखेषु मे तेष्वपि नास्ति सङ्गः ॥ १६ ॥
यतश्च लोकं समजन्मनिष्ठं पश्यामि निःसारमसच्च सर्वम् ।
अतो धिया मे मनसा विवद्धुमस्मीति मे नेङ्गितमस्ति येन ॥ १७ ॥
चतुर्विधे नैकविधप्रपञ्चे यतोऽहमाहारविधावसक्तः[2] ।
अमूर्च्छितश्चाग्रथितश्च तत्र विमुक्तोऽस्मि ततो भवेभ्यः ॥ १८ ॥
अनिःश्रितश्चाप्रतिबद्धचित्तो दृष्टश्रुतादौ व्यवहारधर्म्मे ।
यस्मात् समात्मानुगतश्च तत्र तस्माद्विसंयोगगतोऽस्मि मुक्तः ॥ १९ ॥

---

१ P. L. M. omits सत्तां P. M. सत्वां T.

२ P. M. •विचारशक्तः ।

इत्येवमुक्त्वा गुरुबाहुमान्यात् सर्वेण कायेन स गां निषण्णः ।
प्रवेरितो लोहितचन्दनार्क्षो हैमो महास्तम्भ[1] इवावभासे । २० ॥

ततः प्रमादात् प्रसृतस्य पूर्वं श्रुत्वा धृतिं व्याकरणञ्च तस्य ।
धर्मान्वयं चानुगतं प्रमादं मेघस्वरस्तं मुनिरावभाषे ॥ २१ ॥

उत्तिष्ठ धर्मे स्थित मिथ्यजुष्टे किं पादयोर्मे पतितोऽसि मूर्ध्ना ।
अभ्यर्चनं मे न तथा प्रणामो धर्मे यथैषा प्रतिपत्तिरेव ॥ २२ ॥

अद्यापि सुप्रव्रजितो जितात्मन्नैश्वर्यमप्यात्मनि येन लब्धम् ।
जितात्मनः प्रव्रजनं हि साधु चलात्मनो न त्वजितेन्द्रियस्य ॥ २३ ॥

अद्यापि शौचेन परेण युक्तो वाक्कायचेतांसि मृदूनि यत्ते ।
अतः पुनश्चाप्रयतामनौम्यां यत् सौम्य नो वेत्स्यसि गर्भशय्याम् ॥ २४ ॥

अद्यार्यवृत्त श्रुतवच्छ्रुतं तच्छ्रुतानुरूपं प्रतिपद्य धर्मम् ।
श्रुतश्रुतो विप्रतिपद्यमानो निन्द्यो हि निर्वीर्य इवात्तशस्त्रः । २५ ॥

अहो धृतिस्ते विषयात्मकस्य यत्त्वं मतिं मोक्षविधावकार्षीः ।
यास्यामि निष्ठामिति बालिशो हि जन्मक्षयात् चासमिहाभ्युपैति ॥ २६ ॥

[2]दिष्ट्या दुरापः क्षणसन्निपातो नायं कृतो मोहवशेन मोघः ।
उदेति दुःखेन गतोऽधस्तात् कूर्मो युगच्छिद्र इवार्णवस्थः ॥ २७ ॥

निर्जित्य मारं युधि दुर्निवारमद्यासि लोके रणशा[स्त्र]शूरः ।
शूरोऽप्यशूरः स हि वेदितव्यो दोषैरमित्रैरिव हन्यते यः ॥ २८ ॥

निर्वाप्य रागाग्निमुदीर्णमद्य दिष्ट्या सुखं स्वप्स्यसि वीतदाहः ।
दुःखं हि शेते शयनेऽप्युदारे क्लेशाग्निना चेतसि दह्यमानः ॥ २९ ॥

---

१ P. M. °स्तम्भः ।

२ P M. has श्रुतोविषादे before verse 27.

अभ्युच्छ्रितो द्रव्यमदेन पूर्व्वमद्यापि तृष्णोपरमात् समृद्धः ।
यावत् सतर्षः पुरुषो हि लोके तावत्समृद्धोऽपि सदा दरिद्रः ॥ ३० ॥
अद्योपदेष्टुं तव युक्तरूपं शुद्धोदनो मे नृपतिः पितेति ।
भ्रष्टस्य धर्म्मात् पितृभिर्निपाताद्दयावनीयो हि कुलोपदेशः । ३१ ॥
दिष्ट्यासि ग्लानिं परमामुपेतो निस्तीर्णकान्तार इवाप्तसारः ।
सर्व्वो हि संसारगतो भयार्त्तो यथैव कान्तारगतस्तथैव ।३२॥
आरण्यकं भैक्षचरं विनीतं द्रक्ष्यामि नन्दं निभृतं कदेति ।
आसीत् पुरस्तात् त्वयि मे दिदृक्षा तथापि दिष्ट्या मम दर्शनीयः ॥३३॥
भवत्यरूपोपि हि दर्शनीयस्त्वलंकृतः श्रेष्ठतमैर्गुणैः स्वैः ।
दोषैः परीतो मलिनीकरैस्तु सुदर्शनीयोऽपि विरूप एव ॥ ३४॥
अद्य प्रकृष्टा तव बुद्धिमत्ता कृत्स्नं यथा ते कृतमात्मकार्य्यम् ।
अतोऽतृप्तस्यापि हि नास्ति बुद्धिर्नेत्यद्यते श्रेयसि यस्य बुद्धिः ॥३५॥
उन्मीलितस्यापि जनस्य मध्ये निमीलितस्यापि तथैव चक्षुः ।
प्रज्ञामयं यस्य हि नास्ति चक्षुश्चक्षुर्न तस्यास्ति सचक्षुषोपि ॥३६॥
दुःखप्रतीकारनिमित्तमार्त्तः क्षुदादिभिः खेदमुपेति लोकः ।
अजस्रमागच्छति तच्च भूयो ज्ञानेन यस्माद्य कृतस्त्वयात्मः ॥ ३७॥
दुःखं न मे स्यात् सुखमेव मे स्यादिति प्रवृत्तः सततं हि लोकः ।
न वेत्ति तच्चैव तथा यथा स्यात् प्राप्तं त्वयाद्यासुखभं यथावत् ॥३८॥

इत्येवमादि स्थिरबुद्धिचित्तस्तथागतेनाभिहितो हिताय ।
स्तवेषु निन्दासु च निर्व्यपेक्षः कृताञ्जलिर्वाक्यमुवाच नन्दः ॥३९॥
अहो विशेषेण विशेषदर्शिंस्त्वयानुकम्पा मयि दर्शितेयम् ।
यत्कामपङ्के भगवन्निमग्नस्[ा]तोऽस्मि संसारभयादकामः ॥ ४०॥

भ्राता त्वया श्रेयसि दैशिकेन पिता फलस्थेन तथैव मात्रा ।
हतोऽभविष्यं यदि न त्वमोक्ष्यं सार्थात् परिभ्रष्ट इवाहतार्थः ॥४१॥
शान्तस्य तुष्टस्य सुखो विवेको विज्ञाततत्त्वस्य परीक्षकस्य ।
प्रहीणमानस्य च निर्मदस्य सुखं विरागत्वमसक्तबुद्धेः ॥४२॥
अ[थो] हि तत्त्वं परिगम्य सम्यग्निर्धूय दोषानधिगम्य शान्तिम् ।
स्वं नाश्रमं सम्प्रति चिन्तयामि न तं जनं नाप्सरसो न देवान् ॥४३॥
इदं हि भुक्त्वा शुचि ग्रामिकं सुखं न मे मनः कांक्षति कामजं सुखम् ।
महार्हमन्नममृतोपसेचनं दिवौकसो भुञ्जतः सुधामिव ॥४४॥
अहोऽन्धविज्ञाननिमीलितं जगत् पटान्तरे पश्यति नोत्तमं सुखम् ।
स्वाधीनमध्यात्मसुखं व्यपास्य हि भ्रमं तथा कामसुखार्थमृच्छति ॥४५॥
यथा हि रत्नाकरमेत्य दुर्मतिर्विहाय रत्नान्यसतो मणीन् हरेत् ।
अपास्य सम्बोधिसुखं तथोत्तमं भ्रमं व्रजेत् कामसुखोपलब्धये ॥४६॥
अहो हि सत्त्वेष्वतिमैत्रचेतसस्तथागतस्यानुजिघृक्षुता परा ।
अपास्य यज्ज्ञानसुखं मुने परं परस्य दुःखोपरमाय खिद्यसे ॥४७॥
मया नु शक्यं प्रतिकर्तुमद्य किं गुरौ हितैषिण्यनुकम्पके त्वयि ।
समुद्धृतो येन भवार्णवाद्दृढं महार्णवाच्चूर्णितनौरिवोर्मिभिः ॥४८॥

ततो मुनिस्तस्य निशम्य हेतुमत् प्रहीणमर्व्वास्रवसूचकं वचः ।
इदं बभाषे वदतामनुत्तमो यदर्हति श्रीघन एव भाषितुम् ॥४९॥
इदं कृतार्थः परमार्थवित् कृती त्वमेव धीमन्नभिधातुमर्हसि ।
अतीत्य कान्तारमवाप्तसाधनः सुदेशिकस्येव कृतं महावणिक् ॥५०॥
अवैति बुद्धं नरदम्य[1]सारथिं कृती यथार्हमुपशान्तमानसम् ।

१ P. M. ०दत्त०।

न दृष्टसत्योपि तथाच बुध्यते पृथग्जनः किं वत बुद्धिमानपि ॥५ १॥
रजस्तमोभ्यां परिमुक्तचेतसस्त्वमेव वेत्थ यदृगी कृतज्ञता ।
रजःप्रकर्षेण जगत्यवस्थिते कृतज्ञभावो हि कृतज्ञ दुर्लभः ॥५ २॥
स्वधर्म धर्मान्वयतो यतश्च ते मयि प्रसादोऽधिगमेन कौशलम् ।
अतोऽस्ति भूयस्त्वयि मे विवक्षितं ततो हि भक्तेष्वभियोगमर्हसि ॥५३॥

अवाप्तकार्योसि परां गतिं गतो न तेऽस्ति किञ्चित्करणीय-
मणवपि ।
अतःपरं सौम्य चरानुकम्पया विमोचयन् कृच्छ्रगतान् परानपि ॥५४॥
दृष्टार्थमेवारभते नरोऽधमो विमध्यमस्त्वभयलौकिकीं क्रियाम् ।
क्रियामसुचैव फलाय मध्यमा विशिष्टधर्मा पुनरप्रवृत्तये ॥५ ५॥
दृष्टोत्तमेभ्योपि मतः सुभूमो य उत्तमं धर्ममवाप्य नैष्ठिकम् ।
अचिन्तयित्वा सुगतं परिश्रमं श्रमं परेभ्योऽप्युपदेष्टुमिच्छति ॥५६॥
विहाय तस्मादिह कार्यमात्मनः कुरु स्थिरात्मान् परकार्यमप्यथो ।
भ्रमत्सु सत्त्वेषु तमोवृतात्मसु श्रुतप्रदीपो निशि धार्यतामयम् ॥५ ७॥
ब्रवीतु तावत्पुरि विस्मितो जनः त्वयि स्थिते कुर्वति धर्मदेशनाः ।
अहोवतार्यस्यमिदं विमुक्तये करोति रागी यदयं कथामिति ॥५८॥

ध्रुवं हि संश्रुत्य तव स्थिरं [म]नो
निवृत्तनानाविषयैर्मनोरथैः ।
वधूर्गृहे सापि तवानुकुर्वती
करिष्यते स्त्रीषु विरागिणीः कथाः ॥५८॥
त्वयि परमधृतौ निविष्टतत्त्वे
भवनगता न हि रंस्यते ध्रुवं सा ।

मनसि शमदमात्मके विविक्ते
मतिरविकामसुखेः परीप्सकस्य ॥६०॥

इत्यर्हतः परमकारुणिकस्य शास्तुः
मूर्ध्ना वचस्य चरणौ च समं गृहीत्वा ।
स्वस्थः प्रशान्तहृदयो विनिवृत्तकार्य्यः
पार्श्वान्मुनेः प्रतिययौ विमदः करीव ॥६१॥
भिक्षार्थं समये विवेश चै पुरीं दृष्टीर्जनस्याक्षिपन्
लाभालाभसुखासुखादिषु समः स्वस्थेन्द्रियो निस्पृहः ।
निर्मोक्षाय चकार तत्र च कथां काले जनायार्थिने
नैवोन्मार्गगतान् [जनान्] परिभवन्नात्मानमुत्कर्षयन्[1] ॥६२॥

सौन्दरनन्दे महाकाव्ये आज्ञाव्याकरणं
नामाष्टादशमः सर्गः ॥

---

१ P. M. उत्कर्षति ।

इत्येषा व्युपशान्तये न रतये मोक्षार्थगर्भाकृतिः
श्रोतॄणां ग्रहणार्थमन्यमनसां काव्योपचारात्कृता ।
यन्मोक्षात्कृतमन्यदत्र हि मया तत्काव्यधर्मात् कृतम्
पातुं तिक्तमिवौषधं मधुयुतं हृद्यं कथं स्यादिति ॥६३॥
प्रायेणालोक्य लोकं विषयरतिपरं मोक्षात् प्रतिहतं
काव्यव्याजेन तत्त्वं कथितमिह मया मोक्षपरमिति ।
तद्बुद्ध्वा ग्रामिकं यत् तदवहितमितो ग्राह्यं न लक्षितम्
पांशुभ्यो धातुजेभ्यो नियतमुपकरं धामीकरमिति ॥६४॥

आर्य्यसुवर्णाक्षीपुत्रस्य साकेतकस्य[1] भिक्षो-[2]
राचार्य्य-भदन्ताश्वघोषस्य महाकवेर्महावादिनः कृतिरियम् ॥

---

१ P. M. साङ्केतकस्य । २ P. L. भिक्षोः श्री ।

# APPENDIX.

## NOTES ON THE READINGS OF THE TEXT.

I. 2. सुश्रियाय is not classical Sanskrit. P.L.M. lacuna.

I. 3. अधोक्षत् is wrong in grammar, so it has been changed into अधुक्षत्. P.L.M. lacuna.

I. 7. P.L.M. lacuna. स्फेकटे: in P.M. The modern Nepalese scribes change very frequently ङ्ग into स्त and स्त into ङ्ग. So it has been changed into सैकतैः.

P.M. केसराक्षपाक्षुभिः. The reading of P.L.M. केशराक्षरपाक्षुभिः, which has been adopted.

I. 25. P.M. मनिरुद्धं कुमारञ्च. P.L.M. the lower parts of सु, नि and रु are gone. But there is sufficient indication to show that the subscript रु in सु was there. द्धुं is almost entire with an anusvāra at the top. But as the anusvāra cannot be construed, it has been changed into visarga.

I. 28. तेषां वृद्धिचिकीर्षया. P.M. has तेषां वृ प्रिय चिकीर्षया. P.L.M. has a long lacuna. But the anusvāra in तेषां is clearly visible. वृ is altogether gone. And after that, the upper part of द्धि, that is दि, is visible. There is room only for two letters after तेषां. So I have made it वृद्धिचिकीर्षया. The word वृद्धि in the sense of prosperity is well known in the Hindu ritualistic works, as in the term वृद्धिश्राद्ध. It is also used in the same sense in this work (I. 39 and 44).

I. 33. निर्म्मिमीष्वं. P.L.M. lacuna. P.M. निर्म्मिताष्वं which has been changed into the correct grammatical form of निर्म्मिमीष्वं.

I. 44. P.M. has विद्वषस्तस्यु पथ्यसु कर्म्मसु. In P.L.M. the upper parts of the letters from वि to क are corroded. There is the subscript त, subscript थु, and the lower curve of प or ष or य, then the lower part of subscript ष, and then the lower part of the subscript सु. From this I have made तस्युषष्षट्सु कर्म्मसु or तस्युषः षट्सु कर्म्मसु ।

I. 46. P.M. has evidently पेत्रे. P.L.M. has the upper portions above the mātrā corroded. The subscript below त is also corroded. The first letter प has a long nose, from which it may be either यत्र or यत्. I prefer the reading of P.M., because P.L.M. is so indistinct.

I. 58. P.M. has आल्लानां बाहुशालिनाम् P.L.M. आलानां बाहुशान्निनां. Both the readings are obscure. But as the word आलानं is well known and gives a clear meaning, I have ventured to change the first word into आलानं.

I. Col. P.L.M. invariably calls the work सौन्दरानन्द, but P.M. सौन्दरानन्द. I have preferred the reading of P.L.M. as more ancient.

II. 13. Very corrupt. P.M. has नश्यवाच्यच्युतः सत्यान्मुहूर्त्तमपि जीवितं. P.L.M has नश्य distinct. The lower parts of the next two letters are, to a certain extent, visible. These may be the lower part of क and the lower part of त ? The next two letters are absolutely gone. Then faint traces of सत्या. Then the lower part of न्मु. The whole of हूर्त्त. The greater part of the lower section मपि जावत. I suggest नश्यकाङ्क्षीच्युतः सत्यान्मुहूर्त्तमपि जीवितं as in the text.

II. 18. P.L.M. complete lacuna. P.M. has सत्वमर्थवत् which gives no meaning. I suggest स स्वमर्थवत्. (He gave wealth to good purpose.)

II. 30. P.L.M. मपप्रथत्. P.M. अवतपत् which has been neglected.

II. 31. Both MSS. read कालमश्च मसूषवत्. I cannot make any meaning out of this with grammatical consistency. I suggest कालं च स्वमसूषवत् (that is, he made time produce wealth).

II. 41. P.L.M. सेनाधिरपि. P.M. सेनारपि. I have suggested सेनारिरपि.

II. 53. According to classical Sanskrit वर्ष is masculine as a word formed by the suffix अल्, and so in the body of the book I restored a visarga. But I find that Aśvaghoṣa often uses an अलन्त word in neuter, both in this poem and Buddhacarita. And so in the errata I have corrected the restoration into anusvāra instead of visarga. In P.L.M. I find a slight trace of anusvāra too.

III. 3. P.M. has तथेन्द्रकं which is evidently wrong as this teacher is known in Buddhist traditions as रुद्रकः रामपुत्रः or उद्रक. P.L.M. has तथोर्द्रकः. But the scribe of this MS. is in the habit of adding a superscript र whenever there is a subscript र.

III. 4. P.M. has हन्तमागमम् । निश्चयमनवगतः in which हन्त is absolutely unmeaning, as there is no necessity for खेद here. I have accepted the reading of P.L.M.

III. 18. P.M. has अपरिग्रहस्य. But the sixth case-ending cannot be construed. The P.L.M. has only the left-hand half of स, and there is a faint trace of the tip of the nose of the subscript व. So I have ventured to make it अपरिग्रहः सः

III. 20. P.M. वर्ण० P.L.M. has only the lower subscripts visible, the first subscript is ऊ and the second subscript ण. I take it to be तूर्ण.

III. 22. P.M. निश्चलमतिरसयिषु पुनर्न्न बहुधाभवत् पुनरभूत्त-

येकधा. P.L.M. after a long lacuna has सु पुनर्न्नर्ब्बहुधा०. I make it as in the text. अवयिषु is ungrammatical, and so I make it शिश्रयिषुः After पुनः I drop न.

III. 28. Both P.L.M. and P.M. प्रसन० which destroys the metre. I make it प्रषन्न.

III. 34. P.M. पृ corrected into व; and द्व P.L.M. पृद्ध. I have taken the corrected reading of P.M.

P.M. तृप इव P.L.M. तृप्त इव. The latter reading has been accepted.

IV. I. P.M. मनोव्रुवाचे P.L.M. has the upper part of म and the superscript of ओ, from which I make it मुनो.

IV. 12. P.L.M. has a long lacuna. P.M. पइयांच. The letter resembling इ has been found several times in P.M. as an ornament. I have ventured to make it प्रियां चः

IV. 17. P.M. योक्तिताभ्यां. P.L.M. has lower part of यो, lower part of क्त्रु, lower part of त, and lower part of भ्यां. I take the right-hand vertical line of यो to be the vertical remain of left-hand र of क्त्रि. So the reading would be योक्त्रितास्यां. I suggest यक्त्रितास्यां. It may also be योक्त्रकाभ्यां, as the word योक्त्रक has been used in VI. 3. The त in P.L.M. is however distinct enough not to be क.

IV. 34. P.M. धर्म्मपीढां. P.L.M. धर्म्मयाचञां. This shews that P.M. is a copy of a manuscript other than our P.L.M.

V. 31. P.L.M. सविद्यो. P.M. स वैद्यो. The latter has been preferred because he has medicine in his hand.

VI. 16. Both the MSS. read यद्दिशिष्टा. महिशिष्टा would give a better meaning.

VII. 6. P.L.M. absolute lacuna. I have changed

प्रियं भूः in P.M. into प्रियङ्गु; and प्रियं वप्रवावदातां in the same into प्रियङ्गुप्रवावदातां. As the verse stands in P.M., it gives no meaning. प्रियङ्गु, a flowering tree, is a great favourite with Sanskrit poets. It is a delicate plant and well deserves the epithets प्रतनुं and भीतामिव निष्पतन्तीं.

VII. 9. P.M. पुष्पोत्कभरणा. In P.L.M. the whole line is a lacuna, with the exception of a cape-like projection containing the lower parts of रा and ला and the letters श्र, पि and ना almost entire. Before रा there is a slight trace with a letter with an ākāra. It may be रा. So I take it to have been (पुष्पै) राराला. But as the letter रा with an ākāra interferes with metre, I have made it पुष्पैरराला, bending down with flowers.

In the same verse P.M. reads दन्तैः वसुङ्गैः. It is not difficult to change ङ्ग into द्ग for a scribe who transcribes an old Newari MS. into modern Newari. I am tempted to make it वसुद्गै, as the flowers of the Nāga or the Nāgakeśara tree look like a flowerpot made of ivory. Inside the flower it is yellow. Therefore the flowers of Nāgakeśara answers to the description दान्तैः वसुद्गैरिव हेमगर्भैः.

VII. 11. P.M. reading is evidently the better one here. It shews also that it was copied from a MS. other than our P.L.M.

VIII. 14. P.L.M. तान्तव and P.M. आम्रमर. I do not know which reading to prefer. Along with wooden and iron chain, one would be tempted to prefer a chain made of stone. But I have preferred the P.L.M. reading, as that MS. is, as a rule, a surer guide than the P.M.

VII. 26. P.L.M. long lacuna. P.M. यतो which gives no meaning. I have ventured to change it into रतो.

VII. 30. P.L.M. lacuna. P.M. वेश्मवर्षा. This is वेश्मवध्वा as वेश्मवधू is a word often met with in contemporary literature. In Buddhacarita it is used in this very connection. See 4. 16.

VII. 38. P.M. has नकाशशाङ्कस्य. P.L.M. has न almost entire, and of the next letter the subscript त is entirely visible with a convex curve and an आकार. I take it to be नप्ता. I am justified by the fact that Budha's son was the grandson of the moon god as well as the explicit statement in Buddhacarita. See XIII. 12.

VII. 40. P.M. गङ्गाजलेनांग० P.L.M. गङ्गाजलेनङ्ग० which gives exactly the meaning wanted.

VIII. 5. P.L.M. long lacuna. P.M. रजस्समवस्त्व. वस्त्व with a guru अ in व spoils the metre. I have changed it into रजस्समःवतां. It saves the metre. But वत् as a substitute for वस्त्व is unusual. There is something like a dot in the centre of the vertical line of र. But I am sure it cannot be read as ष. It is a very doubtful passage.

VIII. 34. P.L.M. lacuna. P.M. कुराजा which spoils metre, sense and grammar. I have ventured to suggest सुजनाः which saves all the three.

VIII. 38. P.L.M. complete lacuna. P.M. वलिता वनितेव चञ्चला तदितरेष्विवनावद्यते. The fourth pāda has a letter less, and as it stands, it gives no sense. I have changed it as in the text. वद्यते has been changed into विद्यते and a न has been placed before विद्यते to supply the shortage of letters wanted in the metre. ष्वि has been changed into सु and ना into ने. These suggested changes have at least one recommendation. It gives a good sense. In the third pāda I was almost tempted to change वलिता into वनिता. But P.M. is against it.

VIII. 40. P.M. सूतवत् which is nonsense. P.L.M. has the lower parts of the two letters before वत्. The subscript र in the second letter is distinctly visible with a faint trace of उकार, which has suggested शत्रु and the first letter has turned out to be the lower part of श.

VIII. 42. Of this verse P.L.M. has only न वहन्ति सौहृदं fully and distinctly visible. In P.M. this portion ha been written in a very bad hand by one whos knew no Sanskrit. The first half of the verse as it stands in P.M. runs thus :—प्रविशत्यपि हि स्त्रियश्चितामवधन्त्यपि मक्त्रजीविताः। प्रविशति is certainly wrong as स्त्रियः, the subject, is in plural. So I read प्रविशन्ति. अवधन्ति is wrong. I have suggested अनुवध्नन्ति as a correct Sanskrit plural verbal form consistent with metre. मक्त्र has been changed into मुक्त.

VIII. 44. Covered by a long lacuna in P.L.M. P.M. has अपचं किलशो जित्सुता, which has been made शक्रजित्सुता ; and प्रमदानाच गति न विद्य which has been changed into प्रमदानामगतिर्न विद्यते.

VIII. 45. P.L.M. has श्र गोतमः समवापुर्वनितोद्वतं रजः. A little before this we have subscript त at the end of a vertical line with a concave curve faintly visible. This I take to be मु. After this letter, there is a vertical line representing the lower part of medial इ and the lower part of न. Then the lower part of र with a medial उ hanging from the middle of its vertical line ; and after that there is a subscript र. Next to this there is a subscript त. I have made the last two letters न्ति. Then there are three vertical strokes of मना. The whole would read मुनिरश्रान्त मना. P.M. reads मुनिरश्रांतवाच गोतमः. One would be tempted to read मुनिरश्रान्तमनाश्च. But I could not accept this reading, as there is a

medial ह after र and the ākāra in श्रान्त would come down vertically to the foot of the line. But it is not so. In the P.L.M., the 'Ā' stroke in ङ्गा need not come down so low. It generally comes down from the mātrā to a little above the subscript भ.

VIII. 47. In P.L.M. श्रय is visible, the lowest parts of सूक्ष्म are traceable. Then after a short complete lacuna the lowest parts of श्र and य are visible. Before श्र, the very lowest part of a vertical stroke is traceable. In P.M. the reading is श्रय श्रुक्ष्ममतीङ्गयांश्च धक्. But it is not justified by the traces in P.L.M. So I have made it सूक्ष्ममतिः प्रियाश्रया. In the next line I have changed व्रतं or त्रतं in P.M. into चरितं, thus saving the metre. Anyone having some experience of modern Newari manuscript, will, I believe, sympathize with me.

IX. 18. P.L.M. तुरंग० and P.M. तरंग०. Both readings are equally acceptable. But I have preferred तरङ्गराजस्य, as I know of a fight between Śrīkṛṣṇa and Samudra, but I know of no fight between a horse and Śrīkṛṣṇa.

IX. 22. P.M. ०ङ्गिपानरान्. From which I made it ०ङ्गिपान्नरान्. But P.L.M. has a better reading, ङ्गिपानरीन्.

IX. 36 P.L.M. complete lacuna. P.M. ०श्ररीरे न वशोऽस्ति. I have made it श्ररीरं न वशेऽस्ति.

IX. 45. Both the MSS. have चयं. So I have kept it. But चयं would give a better meaning, specially when read with the next line.

X. 9. P.L.M. covered by a long lacuna. P.M. तापीकृताश्चो. This has been changed into पीतीकृताङ्गो. For, the lion covered with मनःशिला, etc., is compared to golden leaves.

X. 26. P.M. ०विराजनाजायते, from which I have made विराजन् प्रजायते. But on a closer inspection of P.L.M. it turns out to be विराजन् राजायते. Corrected in the erratum.

X. 56. Both P.L.M. and P.M. बोद्धुः. This is in the 7th case-ending which is ungrammatical. I think it is the 6th case-ending of बोदु, a great Sāṃkhya teacher of antiquity. His name is sometimes written as बोद्धुः.

X. 57. यामी in both MSS. But यामी is very unusual. I have changed it into यायी with future णिन्, having in view लब्धा in the next line, which is in future तृन्.

XI. 15. Both MSS. read रक्षते. But as it cannot be construed, it has been changed into रक्षतां.

XI. 20. Both MSS. read तद्रजः. But in connection with ओषध, रजः as in the text seems to me to be a better reading. In P.M. in the middle of the vertical line of र there is a dot which is not, however, a medial उ.

XI. 29. P.L.M. मध्येव and P.M. मभ्येव. Both are unmeaning. A slight alteration in P.L.M. would make it मध्वेव which gives a better sense; as the honey-seeker in hilly tracts looks upwards for honey-combs, and thus fails to notice precipices.

XIII. 53. P.L.M. lacuna. P.M. संयोगः which destroys the metre. I have made it सङ्गः, which improves the metre as well as the sense.

XIII. 55. This is a peculiar metre. The first line contains 15 syllables, the odds being *guru* and the evens *laghu*. The second line contains 16 syllables with the odds *laghu* and the evens *guru*. The third corresponds to the first and the fourth to the

second. On this principle I had to add a क at the end of the second line. It was जिङ्गैः in P.M. Both being *guru* I have added a क and made जिङ्गकैः. The fourth line in P.M. has only 14 syllables. I had to restore a द both for the sense and the metre and to change चिकित्सेत् into चिकित्सयेत् for the sake of the metre. P.L.M. complete lacuna.

XIII. 56. P.M. माक्षिन्नवेक्षणेऽपि which gives no sense. I have adopted the P.L.M. reading.

XIV. 47. P.M. तख्यते. P.L.M. has only the superscript ए of ते.

XV. 16. P.M. स्वमनोदृशठ चेतसः. P.L.M. has in a projection in a long lacuna, only three letters, superscript स with anusvāra, म and नो. I have rendered it स्वं मनो दुष्टचेतसः

XV. 18. P.M. नति. Following the use of classical Sanskrit I have made it रति. But नति in the sense of परिणति is often used in Buddhist Sanskrit.

XV. 22. P.M. नत्वेककुशलं, which does not come in quite correctly at a place when अकुशलकर्म्म is the subject of teaching. I have changed it into नत्वेवाकुशलं.

XV. 26. P.M. मृद्वतोर्गाः खनन्निव. I have changed ओकार in तो of मृद्वतो, into ईकार.

XV. 50. P.M. लोके चित्रेषु मा कृथाः P.L.M. लोकचित्रेषु which gives better sense.

XVI. 6. Both MSS. अप्रतिवेधतः. But अप्रतिबोधतः would give a better meaning. The use of अवबुद्धव and प्रतिबुध्य in the previous verse justifies my observation. But it is difficult to go against both the MSS.

XVI. 11. Both the manuscripts read शरीरयोनिः But I believe it to be the adjective of दुःखं. So I have made it neuter.

XVI. 14. Both the MS[redacted] in classical Sanskrit.

XVI. 23. P.L.M. lacuna. [redacted] have adopted in the text, thoug[redacted] grammar.

XVI. 26. P.L.M. धर्म्मैं and P.[redacted] may be correct, as the author uses bo[redacted] form of धर्म्मन् and the classical form of [redacted]P.[redacted]

XVI. 27. Both MSS. व्याधियोः I h[redacted] classical Sanskrit व्याधयो.

XVI. 41. P.L.M. अपि मार्गसत्थे P.M. अभिमार्गसत्थे. I prefer the reading of P.L.M., as a cumulative conjunction is necessary here.

XVI. 74. P.M. मूर्च्छति. P.L.M. the upper part of a न with रेफ and एकार, the top of a letter, then ति almost entire. I have, therefore, adopted the P.L.M. reading नैच्छति.

XVI. 76. In P.L.M. nearly the whole of the two pādas are a lacuna. P.M. कच्छे which gives no meaning. But कप्पे and कच्छे in P.M. handwriting are so near that I have made it कप्पे, which means पापे and which fits with the context.

XVI. 83. P.M. दन्तेऽपि दत्तं which gives no meaning. P.L.M. the upper part absolutely gone; the lower parts of the 2nd and the 5th letters are the same. So I have made it दन्तेऽपि दन्तं.

XVI. 87. Both the MSS. ०कृमिल० which spoils the metre. I have therefore made it ०क्रमिल०.

XVI. 90. Both MSS. कपिणः which spoils the metre. I have made it कप्फिणः, as that appears to be the name (see Nep. Bud. Lit., p. 38). It is also justified by the name of a work entitled कप्फिणाभ्युदय discovered in Madras and Udiśyā.

MSS. कामाग्निदेहेन. But would
ne?

.M. शुद्धोदनोमनृपति. P.L.M. has a
with a cape-like projection in which
ible नृपतिः पितेति. I change म into मे
मे नृपतिः पितेति.

I have restored जनान् for the metre.
मोक्षात् I have changed into मोक्षात् as
epal for many centuries freely interchange
ख, क्ष and ष.

# ERRATA AND CORRI

| Page. | Line. | Incorrect. | |
|---|---|---|---|
| १ | १४ | ०रसङ्कीर्णः | ०रस |
| १ | N१ | ५ | ५ P.M. |
| ३ | ३ | तमाश्रमम | तमाश्रमम् |
| ७ | १५ | आपुः यज्ञो० | आपुर्यज्ञो० |
| १० | १० | नश्चकाङ्क्षीत | नश्चकाङ्क्षीत् |
| १० | १६ | नयेः भूमिं | नयेर्भूमिं |
| १२ | ९ | अभ्युदसीषहत् | अभ्युदसीषहत् |
| १२ | N१ | ह्वो | ह्वो |
| १२ | N३ | अभ्यदसीषत् | अभ्युदसीषत् |
| १२ | N४ | सोभ्य | सोम्य |
| १३ | १३ | निक्रियाः | निक्रिया |
| १४ | १३ | पुष्पवर्ष[ः] | पुष्पवर्ष[ं] |
| १५ | ६ | प्राप्तः चन्द्रो | प्राप्तश्चन्द्रो |
| १७ | ५ | ०मराडसु उपशम० | ०मराड्सुपशम० |
| १९ | १२ | नृपतिः जनता | नृपतिर्जनता |
| १९ | १६ | ०मधिगम्यसुनेः | ०मधिगम्य सुनेः |
| २२ | ३ | चक्रवाकः तया | चक्रवाकस्तया |
| २२ | ४ | नाचिन्तयत् वैश्रमणं | नाचिन्तयद्वैश्रमणं |
| २२ | १८ | परम्परा० | परस्परा० |
| २३ | ४ | भृषणं | भूषणं |
| २४ | १ | ०मवेक्षमाणा | ०मवेक्षमाणा |
| २४ | ३ | सतमालपत्रम् | सतमालपत्रं |
| २४ | ३ | ताम्राधरोष्ठम् | ताम्राधरोष्ठं |
| २४ | ४ | रक्ताधिकाग्रम् | रक्ताधिकाग्रं |
| २४ | ४ | पतितद्विरेफम् | पतितद्विरेफं |
| २४ | ५ | ०साक्षिभूतं | साक्षिभूतं |

| | | Incorrect. | Correct. |
|---|---|---|---|
| | | ेश्म | वेश्म |
| | | निष्प्रणयश्च | निष्प्रणयश्च |
| | | काचित् अवासयच्च | काचिदवासयच्च |
| | | कर्त्तुम् | कर्त्तुं |
| | | विबोधयेयम् च | विबोधयेयञ्च |
| | | अध्यापयनाश्यान० | अध्यापयनाश्यान० |
| | ६ | पुनः ललम्बे | पुनर्ल्ललम्बे |
| २६ | ७ | कृष्यमानः | कृष्यमाणः |
| २८ | ११ | मृदु(:) | मृदु(˙) |
| २८ | ११ | तीव्र(˙) | तीव्र(:) |
| २८ | १३ | दृष्टः तथा | दृष्टस्तथा |
| २८ | १४ | ०वलाधिकस्य | ०बलाधिकस्य |
| २८ | N१ | P.L.M. कालन्महार | Nothing. |
| २९ | ६ | चैवेदं उवाच | चैवेदमुवाच |
| २९ | २१ | श्लोकः नियतं | श्लोको नियतं |
| ३० | १२ | स्तम् | स्तं |
| ३१ | १० | प्रसक्तिः यदि | प्रसक्तिर्यदि |
| ३१ | १५ | लोष्टम् | लोष्टं |
| ३१ | १८ | तुभ्यम् | तुभ्यं |
| ३३ | ६ | ०क्षयात् अप्सरसां | ०क्षयादप्सरसां |
| ३३ | १५ | वलभी० | बलभी० |
| ३५ | ३ | स्वामिनम् | स्वामिनं |
| ३५ | १३ | भर्त्तुः दीर्घं | भर्त्तृदीर्घं |
| ३६ | १२ | अङ्गनाभिः चिन्ता० | अङ्गनाभिश्चिन्ता० |
| ३७ | १५ | क एवास्ति | क इवास्ति |
| ३८ | १० | प्रियां२ | प्रियां |
| ३८ | ११ | प्रियङ्गुं३ | प्रियङ्गुं२ |
| ३८ | १२ | प्रियङ्गुप्रसवावदाताम् | प्रियङ्गुप्रसवावदातामु३ |
| ३९ | २ | जक्षुः हृदयं | जक्षुर्हृदयं |
| ४० | १७ | ०वृद्धगोः वैवस्वतागृगोः | ०वृद्धगोर्वैवस्वतागृगोः |

| Page. | Line. | Incorrect. | |
|---|---|---|---|
| ४१ | ७ | वङ्को अषितो | |
| ४१ | १५ | ०मप्रतिपृच्छमानः | |
| ४४ | २ | शिवेन | |
| ४५ | ११ | ०भयात् विनिःचतः | |
| ४५ | १२ | मृगः चपलो | मृ० |
| ४५ | १९ | जातवेदसा | जात |
| ४६ | ८ | अविषक्तमतेः चलात्मनः | अविषक्तम |
| ४६ | ११ | वालिशः | बालिशः |
| ४६ | २० | वालिशः | बालिशः |
| ४६ | N१ | १ | १ P. M. |
| ४९ | २० | चलचित्तमौलिः | चलचित्रमौलिः |
| ५५ | १० | ०हिपान्नरान् | ०हिपानरीन् |
| ५७ | N१ | स्ति० | स्ति |
| ५९ | १४ | क्षयम् | क्षमम् |
| ६० | ८ | विमोक्षधर्म्मो | विमोक्षधर्म्मा |
| ६२ | १८ | ऋतूणां | ऋतूनां |
| ६२ | N१ | ०पित्तो | ०पित्तो० |
| ६३ | १२ | प्रजायते | राजायते |
| ६३ | १७ | वैदूर्य्यनीलैः नयनैः | वैदूर्य्यनीलैर्नयनैः |
| ६३ | १९ | वल्लरीभिः मध्येषु | वल्लरीभिर्मध्येषु |
| ६४ | १७ | चेष्टाः ततः | चेष्टास्ततः |
| ६४ | २० | जेक्ष्यीयमानो | जेक्ष्यीयमाणो |
| ६५ | १ | उज्जिहीर्षुः भूयो | उज्जिहीर्षुर्भूयो |
| ६५ | २२ | अद्यैव | अद्यैव |
| ७८ | ९ | अद्धाविशेषतः | अद्धा विशेषतः |
| ७८ | १९ | संवर्द्धि० | संवर्द्ध० |
| ८० | ६ | उपायाभ्यासू | उपायाभ्यां |
| ८० | १९ | त्वम् | त्वं |
| ८५ | ७ | ०अरीणासू | ०अरीणां |
| ८९ | १० | चत्तं | चित्तं |

| | | Incorrect. | Correct. |
|---|---|---|---|
| | | अन्वक्तम् | अन्वक्तं |
| | | यथा स्वभावेन | यथास्वभावेन |
| | | तथा | तदा |
| | | इवोऽपयुज्य | इवोपयुज्य |
| | | वाय्यात्मको | वाय्वात्मको |
| | ४ | धमन् न काले | धमन्नकाले |
| | ६ | वबन्ध | बबन्ध |
| ११४ | १८ | योगायुधास्त्र० | योगाधुधास्त्रे० |
| १२४ | १८ | वधुः | वधूः |

00057785

Digitized with financial assistance from
Hemendra Kothari
on 06 November, 2019